मुडेटीकरसंस्कृतग्रन्थावलिः ।

204

ग्रन्थाङ्कः १२

ॐ

श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयिनां

ब्रह्मनित्यकर्मसमुच्चयः ।

प्रयोजक—

गीर्वाणविद्याभूषण श्रीवालुकेश्वरसंस्कृतवैदिकपाठशाला-
प्रधानाध्यापकशास्त्रीदुर्गाशङ्कर उमाशङ्करशर्मा
मुडेटीकर.

स्व० पुत्र रामजीभाइना स्मरणार्थे अधिकारिद्विजोमाटे

छपावनार—शेठ पेराजभाई हरिराम पारपिया.

ठे०—वडगादि, मुंबई, नं ३.

विक्रमाब्दाः १९७४ शकाब्दाः १८४०

प्रथमावृत्तिः ।

अस्य पुनर्मुद्रणे सर्वेऽधिकारा राजशासनानुसारेण
स्वायत्तीकृताः ।

ધાર્મિક નીતિ રીતિ તરફ સારી શ્રદ્ધા હોવાથી ભાગવત, ગીતા આદિ ધાર્મિક ગ્રન્થોનું વાંચન રાખી પોતાની નીતિ રીતિને પ્રતિદિન ઉચ્ચ કક્ષામાં મૂકવા પ્રયત્નશીલ રહેતા હતા. આપ્રમાણે પ્રતિદિન ઉત્તમતાનો પ્રકાશ બહાર પાડતાં પંદર વર્ષની વયે કોટની ન્યુહાઈસ્કૂલમાં ઇંગ્રેજી ચાર ધોરણનો અભ્યાસ પૂર્ણ કરી એજ વર્ષમાં એટલે તેમના અવસાનના આઠમાસ પહેલાં સંવત્ ૧૯૭૩ ના માઘ માસમાં મુંબઈમાંજ કચ્છ અઢીવાલા ઠક્કર વેલજી દેવજીનાં પુત્રી લક્ષ્મીબાઈ સાથે તેમનાં લગ્ન સારી ધામધુમથી કરવામાં આવ્યાં હતાં.

પરંતુ સંસારમાં મનુષ્યનું જીવન ક્યારે નષ્ટ થાય છે તે કહી શકાતું નથી. વિધાતાના લેખો મિથ્યા થઈ શકતા નથી. છતાં પણ મનુષ્યો આ કલિયુગના ભયંકર વાતાવરણમાં ઘસડાઈ જઈ ધર્મના માર્ગને ઉલ્લંઘી, અધર્મનો સ્વીકાર કરી સંસારની પ્રપંચ જાળમાંથી મુક્ત થવાને બદલે વધારે દૃઢરીતે બંધાતા જાય છે. દરેક વ્યક્તિએ જાણવું જોઇએ કે—" अकालो नास्ति धर्मस्य जीविते चञ्चले सति " જીવન ચંચલ હોવાથી અમુક સમય ધર્મને માટે નથી એમ સમજવું નહિં. પરંતુ " दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः " મનુષ્યદેહ દુર્લભ છે તેવીજરીતે ક્ષણભંગુર પણ છે. એમ જાણી જીવન કાલમાં કોઇપણ સમયે ધર્મ કરતાં ચૂકવું નહિં. કારણ કે જે મનુષ્યો આપાતરમણીય વિષયોમાં લીન થઈ દેખાતાં અશાશ્વત સુખોથી આનંદસાગરમાં ડૂબી પોતાના જીવનની ખરી સાર્થકતા સમજી અનેક પ્રપંચી વિચારોથી સંસારમાં અનેક કાળાં ધોળાં કરી બાહોશ ગણાતા હોય છે. તેઓ " यमस्य करुणा नास्ति धर्मस्य त्वरिता गतिः " એ સૂત્રાનુસાર પ્રારબ્ધવશાત્ મરણની અંતિમ શય્યામાં સૂવાથી પોતાના અઘોર કર્મનો પશ્ચાત્તાપ કરતા અને જીવનને મિથ્યા સમજવાના વિચારમાં ગોથાં ખાતાં ખાતાં અનિચ્છાએ પણ પોતાના કુટુંબીઓને સદાને માટે છોડી જતા જણાય છે. માટે એવાં દૃષ્ટાન્તો જોઈ પ્રત્યેક મનુષ્યોએ ધર્મનીતિપૂર્વક સ્વાત્મતત્ત્વનો વિચાર કરવા ચૂકવું જોઇએ નહિં કેમકે ધર્મ અથવા અધર્મ પ્રત્યક્ષ આવી કંઈ પણ કહી શકતા નથી. પરંતુ સમયે કર્મનાં ફળ આપવામાંજ પોતાની પ્રત્યક્ષતાનું ભાન કરાવે છે. ત્યારે આચરેલાં પુણ્યપાપરૂપ ફળ ભોગવતાં સંસાર અમૃત-

મય છે કે વિષમય છે તેનો અનુભવ થાય છે. પ્રાચીન કાલના મહર્ષિઓએ બાંધેલી ધર્મગ્રન્થિ એવી મજબૂત છે કે જો મનુષ્યો તેનો આશ્રય કરે તો સંસારમાં નિર્ભયપણે પોતાનું જીવન પુરૂં કરી પારલૌકિક શ્રેય સંપાદન કરી શકે, માટે દરેક વ્યક્તિએ પોતાનું ધાર્મિક તેમજ નૈતિક જીવન તથા નિત્ય નૈમિત્તિક કર્મો પરિવર્તન ન પામે તે માટે અવશ્ય લક્ષ્ય રાખવું. "ગૃહીત इव केशेषु मृत्युना धर्ममाचरेत्" મૃત્યુએ પોતાના કેશો હમણાંજ પકડ્યા છે એમ સમજી આપણા આ ચરિત્રનાયકનું હૃદયદ્રાવક મૃત્યુદૃષ્ટાન્ત ધ્યાનમાં રાખી ધર્મસરણિનો ત્યાગ ન કરતાં ધાર્મિક જીવન ગુજારવું. સ્વર્ગસ્થ રામજીભાઈ "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते" અર્થાત્ યોગભ્રષ્ટ પુરૂષ પવિત્ર એવા શ્રીમાનોને ત્યાં જન્મ લે છે. એ વચનાનુસાર યોગીની પેઠે જાણે પોતાના અવશેષ કર્મોનો ઉપભોગ કરવા જન્મ્યા હોય તેમ જે માસની જે તિથિ અને જે સમયે જન્મ થએલો તેજ માસની તેજ તિથિ અને તેજ સમયે પંદર વર્ષની અલ્પવયે પોતાના પ્રારબ્ધકર્મની સમાપ્તિ થતાં લોકાન્તરમાં ચાલ્યા ગયા છે. "मनसा चिन्तते कार्यं दैवो अन्यत्र चिन्तते" એ સૂત્રાનુસાર તેમનાં લગ્ન થયા પછી સંસારના અનેક અનુભવો સાથે ભવિષ્યમાં સારૂં ઈંગ્રેજી અને ધાર્મિક જ્ઞાન મેળવી ઉત્તમ કોટિમાં ગણાઈ સૌજન્યતાના દૃષ્ટાન્તરૂપ થવાની ઉચ્ચતર અભિલાષાવાળા હતા. પરંતુ તેજ અભિલાષામાં જ્વર અને સન્નિપાતની નજીવી બે ત્રણ દિવસની માંદગી ભોગવી સંવત્ ૧૯૭૩ ના આશ્વિન વદ અમાસને દિવસે રાત્રિના સવાબાર વાગે પંદર વર્ષની અલ્પવયે માતાપિતા અને કુટુંબીઓને તેમજ અલ્પવયસ્ક વિધવાને સદાને માટે વિલાપ કરતાં મૂકી મનુષ્યોને સંસારરૂપ વિષવૃક્ષની અસારતા તથા કમલપત્રપર પડેલા જલબિંદુવત્ ચપલ તેમજ પાણીના પરપોટા જેવા જીવનની ક્ષણિકતા અને આશામાં નિરાશા સમાએલી છે. એ દૃષ્ટાન્ત લોકોને પ્રત્યક્ષ કરાવી આ નશ્વર સંસારને ચિરકાલને માટે ત્યાગ કરી ગયા છે. શોક અને દુઃખનો અવધિ નથી પણ દૈવેચ્છા પ્રબલ છે. એમ સમજી છેવટે પરમાત્મા તેમના આત્માને પોતાના સ્વરૂપમાં સ્થિત કરે એવા આશીર્વાદ સહ વિરમીશું.

चर्पटपंजरिकास्तोत्रम् ।

श्रीगणेशाय नमः ॥ दिनमपि रजनी सायं प्रातः शिशिरवसंतौ पुनरायातः । कालः क्रीडति गच्छत्यायुस्तदपि न मुंचत्याशावायुः ॥ १ ॥ भज गोविंदं भज गोविंदं भज गोविंदं मूढमते । प्राप्ते सन्निहिते मरणे नाहे नाहे रक्षति डुकृञ्करणे । (ध्रुवपदम्) । अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानुः । करतलभिक्षा तरुतलवासस्तदपि न मुंचत्याशापाशः । भज गो० ॥ २ ॥ यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः । पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोपि न गेहे । भज गो० ॥३॥ जटिलो मुंडी लुंचितकेशः काषायांबरबहुकृतवेषः । पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः । भज गोविं० ॥४ ॥ भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता । सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चा । भज गोविंदं भज० ॥ ५ ॥ अंगं गलितं पलितं मुंडं दशनविहीनं जातं तुंडम् । वृद्धो याति गृहीत्वा दंडं तदपि न मुंचत्याशापिंडम् । भज गोविंदं भ० ॥ ६ ॥ बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः । वृद्धस्तावच्चिंतामग्नः परे ब्रह्मणि कोपि न लग्नः । भज गोविंदं भज० ॥ ७ ॥ पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् । इह संसारे भवदुस्तारे कृपयाऽपारे पाहि मुरारे । भज गोविंदं भज० ॥ ८ ॥ पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः । पुनरप्ययनं पुनरपि वर्षं तदपि न मुंचत्याशामर्षम् । भज गोविंदं भज० ॥ ९ ॥ वयसि गते कः कामविकारः शुष्के नीरे कः कासारः । नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः । भज गोविंदं भज० ॥ १० ॥ नारीस्तनभरनाभिनिवेशं मिथ्यामायामोहावेशम् । एतन्मांसवसादिविकारं मनसि विचारय वारंवारम् । भज गोविंदं भज० ॥ ११ ॥ कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः । इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् । भज गोविंदं भज० ॥ १२ ॥ गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् । नेयं सज्जनसंगे चित्तं देयं दीनजनाय च वित्तम् । भज गोविंदं० ॥ १३ ॥ यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे । गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये । भज गोविंदं भज० ॥ १४ ॥ सुखतः क्रियते रामाभोगः पश्चाद्धंत शरीरे रोगः । यद्यपि लोके मरणं शरणं तदपि न मुंचति पापाचरणम् । भज गोविंदं० ॥१५॥ रथ्याचर्पटविरचितकंथः पुण्यापुण्यविवर्जितपंथः । नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः । भज गोविंदं भज० ॥ १६ ॥ कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम् । ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन । भज गोविंदं० ॥१७॥

इति श्रीमच्छंकराचार्यविरचितं चर्पटपंजरिकास्तोत्रं संपूर्णम् ॥

ॐ

श्रीगणेशाय न

श्रीशुक्लयजुर्वेदीयमाध्यन्दिनवाजसनेयना ब्रह्मनित्यकर्मसमुच्चयः ।

॥ १ ॥ अथमङ्गलाचरणम् ।

आदौश्रीगणनाथंसरस्वतींचैवकेवलंभक्त्या । प्रणमामिशंकरपुरः-सरान्यथाविधितथाऽखिलान्देवान् ॥१॥ तातोमौनसगोत्रजद्विजवरः-श्रीठाकरोपाधिभृद्गोविंदात्मजभाइशङ्करसुतःश्रीमानुमाशंकरः ॥ मे-नानाम्न्यपिचैवयस्यजननीगङ्गास्वरूपिण्यसौदुर्गाशङ्करआत्मजोहमन-योर्वंदेङ्घ्रियुग्ममुहुः ॥ २ ॥ श्रीभाईशङ्कराज्जातःसउमाशङ्करोद्विजः ॥ पितामेकेवलंजन्मप्रदातागुरुरादिमः ॥ ३ ॥ शुक्लोपाह्वमहानंदतनयो-देवशंकरः ॥ दीक्षागुरुर्द्वितीयोऽगात्पश्चाद्भूत्वायतिर्दिवम् ॥ ४ ॥ वेदान्तादिबृहद्ग्रंथांसरहस्यामुपादिशत् ॥ गुरुश्रीचेतनानंदब्रह्मचारी-तृतीयकः ॥ ५ ॥ स्मृत्वैतान्त्रीन्गुरून्ब्रह्मनित्यकर्मसमुच्चयम् ॥ ग्रथ्ना-म्यमुंशुक्लयजुर्वेदीयद्विजहेतवे ॥ ६ ॥ क्रियतेश्रमोमयाऽयंनिःसंदेहंपरो-पकृतयेऽत्र ॥ यत्किञ्चिन्यूनंस्यात्तत्क्षंतव्यंबुधैःस्वयंकृपया ॥ ७ ॥

॥ २ ॥ प्रातरुत्थानम् ।

ब्राह्मेमुहूर्तेउत्थायस्वकरतलावलोकनम् । तस्यमंत्रः—कराग्रेवसते-लक्ष्मीःकरमध्येसरस्वती । करमूलेस्थितोब्रह्माप्रभातेकरदर्शनम् ॥

---

१ रात्रेःपश्चिमयामस्यमुहूर्तोयस्तृतीयकः । सब्राह्मइतिविज्ञेयोविहितःसप्रबो-धने ॥ रात्रेःपश्चिमयामेतुघटिकाषट्कमेवहि । वेदाभ्यासंद्विजः कुर्यात्सावेला-

॥ ३ ॥ भूमिस्पर्शः ।

तस्यमंत्रः—समुद्रवसनेदेविपर्वतस्तनमण्डिते । विष्णुपत्निनमस्तुभ्यंपादस्पर्शंक्षमस्वमे ॥ ततःमुखशुद्ध्यर्थंगंडूषत्रयंकृत्वा । नेत्रेप्रक्षाल्याचम्यगवादिमङ्गलानिपश्येत् । स्वेष्टदेवतांनमस्कृत्यप्रातःस्मरणंकुर्यात् ॥

॥ ४ ॥ अथप्रातःस्मरणम् ।

प्रातःस्मरामिहृदिसंस्फुरदात्मतत्वं, सच्चित्सुखंपरमहंसगतिंतुरीयम् । यत्स्वप्नजागरसुषुप्तमवैतिनित्यं, तद्ब्रह्मनिष्कलमहंनचभूतसंघः ॥ १ ॥ प्रातर्भजामिमनसोवचसामवाच्यं, वाचोविभान्तिनिखिलायदनुग्रहेण । यन्नेतिनेतिवचनैर्निगमाअवोचुस्तन्देवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥ प्रातर्नमामितमसःपरमर्कवर्णं, पूर्णंसनातनपदंपुरुषोत्तमाख्यम् । यस्मिन्निदंजगदशेषमशेषमूर्त्तौ, रज्ज्वांभुजंगमइवप्रतिभासितंवै ॥ ३ ॥ शंकरंशंकराचार्यं, केशवंबादरायणम् । सूत्रभाष्यकृतौवन्देभगवन्तौ पुनःपुनः ॥ महर्षिंभगवान्व्यासःकृत्वेमांसंहितां

पाठदायिनी ॥ ब्राह्मेमुहूर्तेबुध्येतधर्मार्थौचानुचिन्तयेत् । कायक्लेशांश्चतन्मूलान्वेदतत्त्वार्थमेवच ॥ ब्राह्मेमुहूर्तेयानिद्रासापुण्यक्षयकारिणी । तांकरोतिद्विजोमोहात्पादकृच्छ्रेणशुद्ध्यति ॥ ब्राह्मेमुहूर्तेपुरुषस्त्यजेन्निद्रामतन्द्रितः । पद्मंप्रातःप्रबुद्धंहिश्रयतिश्रीर्गुणाश्रयम् ॥ ब्राह्मेमुहूर्तेचोत्थायचिन्तयेदात्मनोहितम् ॥ धर्मार्थकामान्स्वेकालेयथाशक्तिनहापयेत् ॥ ब्राह्मेमुहूर्तेचोत्थायपरंब्रह्मविचिन्तयेत् ॥ ब्राह्मोमुहूर्तश्चद्वेधा ॥ अन्त्ययामात्मकोरात्रेरुपान्त्यमुहूर्तश्च । २ उत्थायपश्चिमेरात्रेततआचम्यचोदकम् । मुखशुद्ध्यर्थमादौतुगण्डूषत्रितयंचरेत् ॥ ३ ब्राह्मेकालेसमुत्थायगणेशादीन्स्मरेत्ततः । प्रातःस्तोत्रंमंगलानिपठित्वाशौचमाचरेत् ॥

पुरा । श्लोकैश्चतुर्भिर्धर्मात्मापुत्रमध्यापयच्छुकम् ॥ मातापितृसहस्राणिपुत्रदारशतानिच । संसारेष्वनुभूतानियान्तियास्यन्तिचापरे ॥ हर्षस्थानसहस्राणिभयस्थानशतानिच । दिवसेदिवसेमूढमाविशन्तिनपंडितम् ॥ ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे । धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते ॥ नजातुकामान्नभयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापिहेतोः । धर्मोनित्यःसुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यत्वनित्यः ॥ इमांभारतसावित्रींप्रातरुत्थाययःपठेत् । सभारतफलंप्राप्यपरंब्रह्माधिगच्छति ॥ अन्यच्च ॥ ब्रह्मामुरारिस्त्रिपुरांतकारिर्भानुःशशीभूमिसुतोबुधश्च । गुरुश्चशुक्रःशनिराहुकेतवःकुर्वन्तुसर्वेममसुप्रभातम् ॥ भृगुर्वसिष्ठःक्रतुरंगिराश्चमनुःपुलस्त्यःपुलहश्चगौतमः । रैभ्योमरीचिश्च्यवनश्चदक्षःकुर्वंतुसर्वेममसुप्रभातम् ॥ सनत्कुमारःसनकःसनंदनःसनातनोऽप्यासुरिपिंगलौच । सप्तस्वराःसप्तरसातलानिकुर्वंतुसर्वेममसुप्रभातम्॥सप्तार्णवाःसप्तकुलाचलाश्चसप्तर्षयोद्वीपवनानिसप्त। भूरादिकृत्वाभुवनानिसप्तकुर्वंतुसर्वेममसुप्रभातम् ॥पृथ्वीसगंधासरसास्तथापःस्पर्शीचवायुर्ज्वलनःसतेजः । नभःसशब्दंमहतासहैतेकुर्वन्तुसर्वेममसुप्रभातम् ॥ इत्थंप्रभातेपरमंपवित्रंपठेत्स्मरेद्वाशृणुयाच्चतद्वत् । दुःस्वप्ननाशस्त्विहसुप्रभातंभवेच्चनित्यंभगवत्प्रसादात् ॥ अन्यच्च ॥ वैन्यंपृथुंहैहयमर्जुनंचशाकुन्तलेयंभरतंनलंच । रामंचयोवैस्मरतिप्रभातेतस्यार्थलाभोविजयश्चहस्ते ॥ बलिर्विभीषणोभीष्मःप्रह्लादोनारदोध्रुवः । षडेतेवैष्णवाःप्रोक्ताःस्मरणंपापनाशनम् ॥ अश्वत्थामाबलिर्व्यासोहनुमांश्चविभीषणः । कृपःपरशुरामश्चसप्तैतेचिरजीविनः ॥ सप्तैतान्संस्मरेन्नित्यंमार्कंडेयमथाष्टमम् । जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः ॥

इत्यादिपौराणश्लोकान्पठित्वावैदिकंप्रातःस्मरणंपठेत् । यथा—ॐप्रा-
तरग्निम्प्रातरिन्द्रंहवामहेप्रातर्मित्रावरुणाप्रातरश्विना । प्रातर्भगंपूषणम्ब्रह्मणस्पतिम्प्रातः सोममुतरुद्रंहुवेम । ३४॥ प्रातर्जितम्भगमुग्रंहुवेमवयम्पुत्रमदितेर्योविधर्त्ता । आद्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजाचिद्यम्भगम्भक्षीत्याह ॥ ३५ ॥ भगप्रणेतर्भगसत्यराधोभगेमान्धियमुदवादन्न ॥ भगप्रनोजनयगोभिरश्वैर्भगप्रनृभिर्नृवन्तः स्याम॥ ३६॥ उतेदानीम्भगवन्तःस्यामोतप्रपित्वऽउतमध्येऽअह्नाम् ॥ उतोदितामघवन्त्सूर्य्यस्यव्वयन्देवानाꣳसुमतौस्याम ॥ ३७ ॥ भगऽएवभगवाँ२ऽअस्तुदेवास्तेनव्वयम्भगवन्तःस्याम ॥ तन्त्वाभगसर्व्वऽइज्जोहवीतिसनोभगपुरऽएताभवेह ॥ ३८ ॥ समध्वरायोषसोनमन्तदधिक्रावेवशुचयेपदायं ॥ अर्व्वाचीनंव्वसुविदम्भगन्नोरथमिवाश्वाव्वाजिनऽआवहन्तु ॥ ३९ ॥ अश्वावतीर्गोमतीर्न्नऽउषासोवीरवतीꣳसदमुच्छन्तुभद्राः ॥ घृतन्दुहानाव्विश्वतःप्रपीतायूयंपातस्वस्तिभिःसदानः ॥ ४० ॥ इतिप्रातःस्मरणम् ॥

॥ ५ ॥ अथमूत्रपुरीषोत्सर्गविधिः ॥

ग्रामाद्बहिर्नैर्ऋत्यामिषुक्षेपात्ययेशुद्धमृत्तिकांजलपात्रंचादायकीटादिरहितस्थलंगत्वामृज्जलपात्रेनिधायअयज्ञियैरनार्द्रैस्तृणैर्भूमिमाच्छाद्यपावृतशिराःपृष्ठतःकंठलंबितयज्ञोपवीतोयद्येकवस्त्रश्चेद्दक्षिणकर्णेनिहितयज्ञोपवीतोमौनीघ्राणास्येपिधायदिवासंध्ययोरुदङ्मुखोरात्रौदक्षिणाभिमुखोमौनमासीनोमूत्रपुरीषेकुर्यात् ॥ प्राणबाधाभयेतुरात्रावहनिवाछायायामन्धकारेचगृहेपियथासुखंमुखंकृत्वामूत्रपुरीषेकुर्यात् ॥ लोष्ठादिनागुदंपरिमृज्यगृहीतशिश्नउत्थायपूर्वगृहीतमृज्जलपात्रेगृहीत्वार्द्रम-

लकमात्रमृज्जलैर्द्विवारंलिंगशौचंकृत्वार्धप्रसृतितदर्धार्धैर्मृज्जलैस्त्रिवारम-
पानंशोध्यपुनर्जलैरेवलिंगगुदेप्रक्षाल्यशुद्धमृत्तिकयैकवारंहस्तंप्रक्षाल्य-
शुद्धभूमिमागत्यान्यमृज्जलैर्दशवारंवामकरंप्रक्षाल्यततःकरद्वयंसप्तवारं-
तावद्भिरेवमृज्जलैःप्रक्षाल्यवामदक्षिणपादौप्रत्येकंत्रिःप्रक्षाल्यान्यजले-
नद्वादशगंडूषान्वामभागेकृत्वाजलपात्रंत्रिःपर्युक्ष्यजलबिंदून्जलेनिक्षि-
प्योपवीतीद्विराचामेत् ॥ मूत्रमात्रोत्सर्गेतुपूर्ववदेकवारंलिंगंप्रक्षाल्य-
वामकरंत्रिःप्रक्षाल्यकरद्वयंद्विःप्रक्षाल्यैकैकयामृदापादौप्रक्षाल्यगंडूष-
चतुष्टयंविधायाचामेत् ॥ इतिमूत्रपुरीषोत्सर्गविधिः ॥

॥ ६ ॥ अथदन्तधावनविधिः ॥

प्रतिपच्छष्ठ्यष्टमीनवम्येकादशीचतुर्दशीपूर्णिमासंक्रान्तिव्यतीपातव्र-

---

१ एकालिङ्गेगुदेतिस्रस्तथावामकरेदश । उभयोःकरयोःसप्तसप्तत्रिर्वापि-
पादयोः ॥ २ मूत्रमात्रोत्सर्गेतु——एकालिङ्गेकरेतिस्रउभयोर्मृत्तिकाद्वयम् । एकै-
कयामृदापादौप्रक्षाल्यतुशुचिर्भवेत् ॥ ३ एकांद्वेवाऽथवातिस्रोमृदःपादद्वयेपृथक् ।
पादावाजानुतःशोध्यकरौवैमणिबंधनात् ॥ ४ मूत्रेपुरीषेभुक्त्यन्तेरेतःप्रस्रवणे-
तथा । चतुरष्टद्विषट्द्वयष्टगण्डूषैःशुद्धिमाप्नुयात् ॥ कुर्याद्वादशगण्डूषान्पुरीषो-
त्सर्जनेततः । मूत्रोत्सर्गेतुचतुरोभोजनान्तेतुषोडश ॥ भक्ष्यभोज्यावसानेतुगण्डू-
षाष्टकमाचरेत् ॥ पुरतःसर्वदेवाश्चदक्षिणेपितरस्तथा । ऋषयःपृष्ठतःसर्वेवामे-
गण्डूषमाचरेत् ॥ ५ मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः । दन्तधावनमुद्दिष्टंजि-
ह्वोल्लेखनिकातथा ॥ अथोमुखविशुद्ध्यर्थंगृह्णीयाद्दन्तधावनम् । आचान्तोऽप्यशु-
चिर्यस्मादकृत्वादन्तधावनम् ॥ ६ प्रतिपद्दर्शषष्ठीषुनवम्यांरविवासरे । दन्तानां-
काष्ठसंयोगोदहत्यासप्तमंकुलम् ॥ अष्टम्योश्चचतुर्दश्योःपञ्चदश्यांत्रिजन्मसु । व्यती-
पातेचसङ्क्रान्त्यांदन्तकाष्ठंनभक्षयेत् ॥

तोपवासश्राद्धदिनार्कभौमशुक्रमन्ददिननिषिद्धदिनातिरिक्तदिनेषुब्राह्मणोद्वादशाङ्गुलप्रमाणेनदशाङ्गुलप्रमाणेनवाकनिष्ठाङ्गुलिवत्स्थूलेनोदुम्बरकण्टकिक्षीरवृक्षापामार्गादिविहितवृक्षोद्भवेनाव्रणेनचूर्णीकृताग्रेणप्रक्षालितेनशुष्केणार्द्रेणवाकाष्ठेनप्राङ्मुखोमौनेनदन्तधावनंकुर्यात् ॥

१ तत्रादौदन्तपवनंद्वादशाङ्गुलमायतम् । कनिष्ठिकापरीणाहमृज्वग्रान्थिकमव्रणम् ॥ कनीन्यग्रसमस्थौल्यंसकूर्चंद्वादशाङ्गुलम् । प्रातर्भूत्वाचयतवाग्भक्षयेदन्तधावनम् ॥ २ दशाङ्गुलंतुविप्राणांक्षत्रियाणांनवाङ्गुलम् । अष्टाङ्गुलंतुवैश्यानांशूद्राणांसप्तसम्मितम् । चतुरङ्गुलमात्रंतुनारीणांनात्रसंशयः ॥ ३ कनिष्ठिकाग्रवत्स्थूलंसत्वचंनिर्व्रणंऋजुम् । द्वादशाङ्गुलिकंविप्रेकथितंदन्तधावनम् ॥ ४ करञ्जोदुम्बरश्लूतःकदम्बोलोध्रचम्पकौ । बदरीतिद्रुमाश्चैतेप्रोक्तादन्तप्रधावने ॥ आम्रामातकधात्रीजमङ्कोटखदिरोद्भवम् । शम्यपामार्गखर्जूरीशेलुश्रीपार्णीपीलुजम् ॥ राजादनंचनारङ्गंकषायंकटुकण्टकम् । क्षीरवृक्षोद्भवंवापिप्रशस्तंदन्तधावने ॥ तिन्तिणिर्वेणुपृष्ठंचह्याम्रनिम्बौतथैवच । सर्जेधैर्यंवटेदीप्तिःकरञ्जेविजयोरणे ॥ प्लक्षजेचार्थसंपत्तिर्बदर्यांमधुरःस्वरः । खादिरेचैवसौभाग्यंबिल्वेतुविपुलंधनम् ॥ उदुम्बरेचवाक्सिद्धिर्बन्धूकेचदृढामतिः । सैध्रेचकीर्तिःसौभाग्यंपालाशेसिद्धिरुत्तमा ॥ कदम्बेसकलालक्ष्मीराम्रआरोग्यमेवच । अपामार्गेस्मृतिर्मेधाप्रज्ञात्राणिवपुर्धृतिः ॥ आयुःशीलंयशोलक्ष्मीःसौभाग्यंचोपजायते । अर्केणहन्तिरोगाँस्तुबीजपूरेणतुव्यथाम् ॥ दाडिमेसिन्दुवारेचह्युटजेकुटजेतथा । जातीचकरमर्दीचदुःस्वप्ननाशयेदिति ॥ ककुभेनतथायुष्मान्भवेत्पलितवार्जितः । तस्माच्छुष्कंतदार्द्रंवाभक्षयेदन्तधावनम् ॥ ५ प्राङ्मुखस्यधृतिःसौख्यंशरीरारोग्यमेवच । दक्षिणेनतथाकष्टंपश्चिमेनपराजयः ॥ उत्तरेणगवांनाशःस्त्रीणांपरिजनस्यच । पूर्वोत्तरेतुदिग्भागेसर्वान्कामानवाप्नुयात् ॥ ६ उच्चारेमैथुनेचैवप्रस्तावेदन्तधावने । श्राद्धेभोजनकालेचषट्सुमौनंसमाचरेत् ॥

निषिद्धंकाष्ठानिवर्जयेत् ॥ तत्रदन्तधावनकाष्ठाभिमन्त्रणम् ॥ तस्य-मन्त्रः—आयुर्बलंयशोवर्चःप्रजाःपशून्वसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वं-नोदेहिवनस्पते ॥ इत्यभिमन्त्र्य ॥ मुखदुर्गन्धिनाशायदन्तानांचविशु-द्धये ॥ ष्ठीवनायचगात्राणांकुर्वेऽहंदन्तधावनम् ॥ इतिमन्त्रमुक्त्वाप-श्चादन्तधावनमन्त्रंपठेत् ॥ यथा—ॐअन्नाद्यायव्यूहध्वꣳसोमोराजाय-मागमत् ॥ समेमुखंप्रमार्क्षतेयशसाचभगेनच ॥ इत्यनेनदन्तान्संशोध्य-तेनैवकाष्ठार्धेनवारजतादिनिर्मितयाजिह्वोल्लेखिन्याजिह्वामुल्लिख्यद्वाद-शगण्डूषाँश्चकृत्वाॐकारंगायत्रींचस्मृत्वाँशिखांचबध्नीयात् ॥ (काष्ठा-लाभेश्राद्धोपवासादिनिषिद्धदिनेचपर्णादिनाप्रदेशिनीवर्ज्याङ्गुल्यावा-

---

१ कुशकाशंचकार्पासंपालाशंब्रह्मवृक्षजम् । पुत्रमांससमंज्ञेयंबाबुल्यंदन्तधा-वनम् ॥ कुशंकाशंपलाशंचनिशुपंयस्तुभक्षयेत् । तावद्भवतिचाण्डालोयावद्गङ्गां-नपश्यति ॥ अर्धशुष्कंत्वचाहीनंयत्नेनपरिवर्जयेत् । पतितंचातिरिक्तंचकीटविद्धं-तथैवच ॥ नाङ्गुलीभिश्चमृद्भिश्चपर्णैर्लोष्टैश्चभस्मना । नायसैश्चतथालोहैःसदादन्ता-न्मृजेद्द्विजः ॥ २ अयुग्मग्रन्थियचापिप्रत्यग्रंशस्तभूमिजम् । अवेक्ष्यर्तुंचदोषंचर-संवीर्यंचयोजयेत् ॥ कषायंमधुरंतिक्तंकटुकंप्रातरुत्थितः । निम्बश्चतिक्तकेश्रेष्ठः-कषायेखदिरस्तथा ॥ मधूकोमधुरेश्रेष्ठःकरञ्जःकटुकेतथा ॥ क्षौद्रव्योषत्रिवर्गोक्तं-सतैलंसैन्धवेनच ॥ चूर्णेनतेजोवत्याश्चदन्तान्नित्यंविशोधयेत् ॥ एकैकंघर्षयेद्दन्तं-मृदुनाकूर्चकेनच । दन्तशोधनचूर्णेनदन्तमांसान्यबाधयन् ॥ ३ जिह्वानिर्लेख-नंरौप्यंसौवर्णंवार्क्षमेवच । तन्मलापहरंशास्तंमृदुश्लक्ष्णंदशाङ्गुलम् ॥ मुखवैरस्यदौ-र्गन्ध्यशोफजाड्यहरंपरम् ॥ ४ पश्चाद्वादशगण्डूषैर्विदध्याद्दन्तधावनम् । स्मृत्वो-ङ्कारंचगायत्रींबध्नीयाद्वैशिखांततः ॥

द्वादशगण्डूषैर्वादन्तान्संशोधयेत् ॥) पश्चात्–अपवित्रःपवित्रोवासर्वा-
वस्थांगतोऽपिवा॥यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्यन्तरःशुचिः ॥ इत्यने-
नाद्भिःशरीरंमार्जयेत्॥ तदनन्तरंसूर्यतुलसीगोदर्शनंप्रार्थनांचकुर्यात् ॥
आदित्यस्यनमस्कारंयेकुर्वन्तिदिनेदिने ॥ जन्मान्तरसहस्रेषुदारिद्र्यं-
नोपजायते ॥ आदित्यंभास्करंभानुंरविंसूर्यंदिवाकरम् । षण्नामस्म-
रणान्नित्यंमहापातकनाशनम्॥ महाप्रसादजननीसर्वसौभाग्यवर्धिनी ।
आधिव्याधिहरानित्यंतुलसित्वांनमाम्यहं ॥ गावोमेह्यग्रतःसन्तुगावोमे-
सन्तुपृष्ठतः।गावोमेहृदयेसन्तुगवांमध्येवसाम्यहम्।इतिदन्तधावनविधिः

॥ ७ ॥ अथ प्रातःस्नानप्रयोगः ॥

नद्यादौनित्यस्नानम्–स्नानकर्ताघटिकाद्वयंवशिष्टायांरात्र्यांमृदं-

---

१ अभावेदन्तकाष्ठस्यप्रतिषिद्धदिनेतथा । अपांद्वादशगण्डूषैर्विद्यादन्तधाव-
नम् ॥२ स्नानसूत्रम्–अथातोनित्यस्नानंनद्यादौमृद्गोमयकुशातिलसुमनसऽआहृत्यो-
दकान्तंगत्वाशुचौदेशेस्थाप्यप्रक्षाल्यपाणिपादंकुशोपग्रहोबद्धशिखीयज्ञोपवीत्याच-
म्योरुद्धहीतितोयमामन्त्र्यावर्त्तयेद्वेतेशतमितिसुमित्रियानऽइत्यपोञ्जलिनादायदुर्मित्रि-
याऽइतिद्वेष्यंप्रतिनिषिञ्चेत्कटिम्बस्त्यूरूजङ्घेचरणौकरौमृदात्रिस्त्रिःप्रक्षाल्याचम्यम-
नस्योदकमालभेदङ्गानिमृदेदंविष्णुरितिसूर्याभिमुखोनिमज्जेदापोऽअस्मानितिस्नात्वो-
दिदाभ्यऽइत्युन्मज्यनिमज्योन्मज्याचम्यगोमयेनविलिम्पेन्मानस्तोकऽइति । ततोऽ-
भिषिञ्चेदिमंमेवरुणेतिचतसृभिर्मापऽउदुत्तमंमुञ्चत्वेवमृथेत्यन्तेचैतन्निमज्योन्मज्या-
चम्यदभैःपावयेदापोहिष्ठेतितिसृभिरिदमापोहविष्मतीर्दैवीरापऽइतिद्वाभ्यामपोदेवा-
द्रुपदादिवशन्नोदेवीरपाꣳरसमपोदेवीःपुनन्तुमेतिनवभिश्चित्पतिर्मेत्योङ्कारेणव्याहृति-
भिर्गायत्र्याचादावन्तेचान्तर्जलेऽघमर्षणंत्रिरावर्तयेद्रुपदादिवायङ्गौरितिवातृचंप्राणा-
यामंवासशिरसमोमितिवाविष्णोर्वास्मरणम् ॥ ३ अरुणकिरणयुक्तांप्राचींदिश-
मवलोक्यस्नायात् ॥ ४ घटिकाद्वयावशिष्टायांरात्र्यांगच्छेज्जलाशये । तिलगन्धा-

आर्द्रगोमयंकुशान्तिलान्सुरभीणिपुष्पाणिभस्मचादायनद्यादितीर्थत-
टेगत्वाआनीतसम्भाराञ्छुचौदेशेपृथक्पृथक्संस्थाप्यतदनन्तरंहस्तौ-
पादौचप्रक्षाल्यकुशपवित्रधारणम् ॥ तस्यमंत्रः—ॐपवित्रेस्थोवै-
ष्णव्यौसवितुर्वः÷प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्यस्यरश्मि-
भिः÷। १२/१ ॥ तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामःपुनेतच्छकेयम् ।४/१॥
अनेनमन्त्रेणकुशपवित्रंधृत्वापश्चात्बद्धत्रिकच्छशिखः यज्ञोपवीतीजा-
नूर्ध्वजलेतिष्ठन्अन्यथातूपविश्याचमनंकुर्यात् ॥ तत्प्रकारः—बाहू-
जान्वन्तराकृत्वामुक्ताङ्गुष्ठकनिष्ठिकेनदक्षिणहस्तेनफेनबुद्बुदवर्जंस्व-
च्छम्माषमज्जनपरिमितंजलमादायांगुष्ठमूलस्थब्राह्मेणतीर्थेनशब्दमकु-
र्वन्त्रिःपिबेत् । पश्चात्प्रवाहाभिमुखोवासूर्याभिमुखैःसङ्कल्पंकुर्यात्
यथा—अद्यपूर्वोच्चारितएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममा-
त्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंममइहजन्मनिजन्मान्तरेवाका-
यिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पर्शास्पर्शभुक्ताभुक्तपीता-
पीतादि सकलपातकनिरासपूर्वकमासनभोजनशयनगमनादिष्वनृत-

क्षतापुष्पैर्दर्भैश्चैःसहितःशुचिः ॥ प्रातर्मध्याह्नयोःस्नानंवानप्रस्थगृहस्थयोः ।
यतेस्त्रिषवणंप्रोक्तंसकृत्तुब्रह्मचारिणः ॥ प्रातःस्नानंसनक्षत्रंसन्ध्यानक्षत्रसंयुता ।
होमः प्रागुदयाद्भानोर्गायत्र्यास्तुततोजपः ॥ १ दक्षिणंबाहुमुद्धृत्यवामस्कन्धे-
निवेशितम्। यज्ञोपवीतमित्युक्तंदेवकार्येषुशस्यते ॥ २ स्रोतसोऽभिमुखंस्नायान्नदी-
षुप्रवहज्जले । स्थावरेचतडागेचरवेरभिमुखंसदा ॥ स्रोतसोऽभिमुखोमज्जेद्यत्रापः-
प्रवहन्तिवै । स्थावरेषुचसर्वेषुआदित्याभिमुखस्तथा ॥ तडागादिषुतोयेषुप्रत्यर्क-
स्नानमाचरेत् । नद्यांस्रवत्सुचस्नायात्प्रतिस्रोतःस्थितोद्विजः ॥ यायाःसमुद्रगा-
नद्यस्तासुस्नानंतुसंमुखम् । सर्वेषांशाखिनामेवंविनावाजसनेयिनः ॥

भाषणादिदोषनिरासद्वाराश्रीपरमेश्वरप्रीत्यर्थममुकतीर्थेप्रातःस्नानमहं-
करिष्ये ॥ इतिसङ्कल्प्यतीर्थप्रार्थनांकुर्यात्तथा—त्वंराजासर्वतीर्था-
नांत्वमेवजगतःपिता । याचितंदेहिमेतीर्थंतीर्थराजनमोऽस्तुते ॥
अपामधिपतिस्त्वंचतीर्थेषुवसतिस्तव । वरुणायनमस्तुभ्यंस्नानानुज्ञां-
प्रयच्छमे ॥ अधिष्ठात्र्यश्चतीर्थानांतीर्थेषुविचरन्तियाः । देवतास्ताःप्र-
यच्छन्तुस्नानाज्ञांममसर्वदा ॥ गङ्गेचयमुनेचैवगोदावरिसरस्वति ।
नर्मदेसिन्धोकावेरिजलेऽस्मिन्सन्निधिंकुरु ॥ इतिसंप्रार्थ्यअधोलि-
खितंदेवमुक्त्वाञ्जलिहस्तेनतीर्थाभिमंत्रणंकुर्यात् । उरुहीत्यस्यशुनः-
शेपऋषिर्वरुणोदेवतात्रिष्टुप्छन्दःजलाभिमंत्रणेविनियोगः॥ॐउरुहि-
राजावरुणश्चकारसूर्य्यायपन्थामन्वेतवाऽउ । अपदेपादाप्प्रतिधातवे-
करुतापवक्ताहृदयाविधश्चित् । नमोवरुणायाभिष्टितोवरुणस्यपाश॑ः
। ३ ॥ इत्यभिमन्त्र्यपश्चाज्जलावर्तनम्—श्वेतेशतमितिमंत्रस्यवामदेवऋ-
षिर्वरुणसवितृविष्णुविश्वमरुत्स्वर्कादेवताःत्रिष्टुप्छन्दःजलावर्तनेविनि-
योगः ॥ ॐश्वेतेशतंवरुणंयेसहस्रंयज्ञियाःपाशावितताम्महान्तः । तेभि-
र्नोऽअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्काः ॥ पा० गृ०॥ इतिमं-
त्रेणजलंदक्षिणहस्ताङ्गुलिभिर्दक्षिणावर्तंत्रिवारंभ्रामयेत् ॥ पूर्णाञ्जलि-

---

१ नदीदेवनिखातेषुतडागेषुसरस्सुच । स्नानंसमाचरेन्नित्यंगर्तप्रस्रवणेषुच ॥
निपानादुद्धृतंपुण्यंततःप्रस्रवणोदकम् । ततोऽपिसारसंपुण्यंततोनादेयमुच्यते ॥
तीर्थतोयंततःपुण्यंगङ्गातोयंततोऽधिकम् ॥ २ अस्नातस्यक्रियाःसर्वाभवन्ति-
निष्फलायतः । प्रातःसमाचरेत्स्नानंतच्चनित्यमुपस्थितम् ॥ अस्नातस्तुपुमान्नार्हो-
जपहोमादिकर्मसु । प्रातःस्नानंतदर्थंतुनित्यस्नानंप्रकीर्तितम् ॥ स्नानमूलाःक्रियाः-
सर्वाःस्मृतिश्रुत्युदितानृणाम् । तस्मात्स्नानंनिषेवेतश्रीपुष्टयारोग्यवर्द्धनम् ॥ ३ सङ्क-
ल्पश्चयथाकुर्यात्स्नानदानव्रतादिके ॥

नापोग्रहणम् ॥ सुमित्रियान इतिमंत्रस्यप्रजापतिऋषिरापोदेवताय-
जुश्छन्दःआपोग्रहणेविनियोगः ॥ ॐसुमित्रियानऽआपऽओषधयः-
सन्तु २२/६ इतिमन्त्रेणजलाञ्जलिंगृहीत्वा—दुर्मित्रियेत्यस्यप्रजापतिऋ-
षिरापोदेवतायजुश्छन्दःजलाञ्जलिप्रक्षेपेविनियोगः ॥ ॐदुर्म्मित्रि-
यास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ २२/६ ॥ इतिमन्त्रेणा-
ञ्जलिस्थमुदकंस्वशत्रून्मनसाविचिन्त्यतन्नाशार्थंस्ववामभागेतीर्थतटे-
क्षिपेत् ॥ द्वेष्टुरभावेकामादीन्स्मृत्वाञ्जलिंप्रक्षिपेत् ॥ मृत्तिकामादा-
यतस्याःत्रिभागान्कृत्वाप्रथमभागंवामहस्तेनगृहीत्वातेननाभेरधःक-
टिप्रदेशमनुलेपयेत् ॥ हस्तंप्रक्षाल्यपुनस्तेनैवहस्तेनद्वितीयभागेनब-
स्तिंऊरूजङ्घेचरणौकरौचप्रत्येकंतूष्णींत्रिस्त्रिरनुलिप्यपुनर्हस्तंप्रक्षाल्या
चम्यतीर्थोदकंनमस्कुर्यात् ॥ ततस्तृतीयभागमादाय ॥ इदंविष्णुरि-
तिमेधातिथिऋषिर्विष्णुर्देवतागायत्रीछन्दःमृत्तिकानुलेपनेविनियोगः ।
ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ।१५। ।
इतिमंत्रेणतृतीयभागेनदक्षिणहस्तेनललाटादिनाभिपर्यन्तानिगात्राण्यु
पलिप्यहस्तंप्रक्षाल्याचम्यतीर्थोदकंनमस्कुर्यात् ॥ अश्वक्रान्तेरथक्रा-
न्तेविष्णुक्रान्तेवसुन्धरे । उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥
मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् ॥ मृत्तिकेब्रह्मपूतासिकाश्यपेना-
भिवन्दिता । त्वयाहतेनपापेनगच्छामिपरमांगतिम् ॥ इतिसंप्रार्थ्य ॥
नाभिमात्रंतीर्थजलंप्रविश्यसूर्याभिमुखःस्थित्वाहस्तेजलमादायआपोऽ-
अस्मानितिमंत्रस्यप्रजापतिऋषिरापोदेवताअत्यष्टिछन्दःमज्जनोन्म-
ज्जनेविनियोगः ॥ ॐआपोऽअस्मान्मातरꣳशुन्धयन्तुघृतेननोघृत-
प्वꣳपुनन्तु ॥ विश्वꣳहिरिप्रम्प्रवहन्तिदेवीः । ३/४ ॥ इतिमंत्रेण-

निमज्यपुनः-ॐउदिदाभ्यꣳशुचिरापूतऽएमि । ३/४ ॥ इतिमंत्रेणद्वितीयवारंनिमज्यपुनस्तूष्णींनिमज्योन्मज्याचामेत् ॥ ततोगोमयमादायतस्यत्रिभागान्कृत्वाप्रथमभागंवामहस्तेगृहीत्वातेननाभेरधःकटिप्रदेशमनुलेपयेत्हस्तंप्रक्षाल्यपुनस्तेनैवहस्तेनद्वितीयभागेनबस्तिउरूजङ्घेचरणौकरौचप्रत्येकंतूष्णींत्रिस्त्रिरनुलिप्यपुनर्हस्तंप्रक्षाल्याचम्यतीर्थोदकंनमस्कुर्यात् ॥ पुनस्तृतीयभागमादाय ॥ अग्रमग्रंचरन्तीनामोषधीनांवनेवने । तासांत्वृषभपत्नीनांपवित्रंकायशोधनम् ॥ तन्मेरोगांश्चशोकांश्चपापंमेहरगोमय ॥ इतिमंत्रेणगोमयमभिमंत्र्य ॥ ॐमानस्तोकइतिमंत्रस्यकुत्सऋषिःरुद्रोदेवताजगतीच्छन्दःगोमयानुलेपनेविनियोगः ॥ ॐमानस्तोके तनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषꣳ ॥ मानोबीरान्बुद्रभामिनोवधीर्हविष्मन्तꣳसदमित्त्वाहवामहे । १६/६६ ॥ इतिमंत्रेणतृतीयभागेनदक्षिणहस्तेनललाटादिनाभिपर्यन्तानिगात्राण्युपलिप्यक्षालयेत् ॥ भस्मादाय ॥ जलमितिभस्मस्थलमितिभस्मव्योमेतिभस्मसर्वꣳहवाइदंभस्ममनएतानिचक्षूꣳषिभस्मानि ॥ इतिमंत्रेणभस्माभिमंत्र्य ॥ ॐप्रसद्येत्यस्यविरूपऋषिरग्निर्देवताऽनुष्टुप्छन्दःभस्मानुलेपनेविनियोगः ॥ ॐप्रसद्यभस्मनानागोनिमपश्चपृथिवीमग्ने । सङ्गसृज्यमातृभिष्ट्वङ्ज्योतिष्मान्पुनरासदꣳ । ३८/१३ ॥ इतिमंत्रेणललाटाद्यङ्गेषुभस्मलेपनंकुर्यात् ॥ ततोवक्ष्यमाणैरष्टभिर्मंत्रैःप्रतिमंत्रंकुम्भमुद्रयादक्षिणचुलकेनवाशिरोऽभिषिञ्चेत् ॥ इमम्मेवरुणेतिमंत्रस्यशुनःशेपऋषिर्वरुणोदेवतागायत्रीछन्दः तत्त्वाया-

१ इदंभस्मानुलेपनंक्षेपकंकात्यायनपरिशिष्टसूत्रेतुनोक्तम् ॥ २ दक्षाङ्गुष्ठंपराङ्गुष्ठेक्षिप्त्वाहस्तद्वयेनतु । सावकाशामेकमुष्टिंकुर्यात्साकुम्भमुद्रिका ॥

मीतिमंत्रस्यशुनःशेपऋषिर्वरुणोदेवतात्रिष्टुप्छन्दः त्वन्नःसत्वन्नइति-द्वयोःवामदेवऋषिरग्निर्वरुणोदेवतेत्रिष्टुप्छन्दः मापइतिप्रजापतिऋषिर्हृ-दयशूलंदेवतायजुश्छन्दःउदुत्तममितिमंत्रस्यशुनःशेपऋषिर्वरुणोदेवता-त्रिष्टुप्छन्दः मुञ्चन्तिवतिमंत्रस्यबन्धुऋषिरोषधयोदेवताउष्णिक्छन्दःअ-वभृथेत्यस्यप्रजापतिऋषिर्यज्ञोदेवतानुष्टुप्छन्दः सर्वेषामभिषेकेविनियो-गः॥ ॐइमम्मेवरुणश्रुधीहवंमद्याचमृडय । त्वामवस्युराचके ।१/२१॥ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः । अहे-डमानोवरुणेहबोध्युरुशꣳसमानऽआयुꣳप्रमोषीꣳ । २/२१ ॥ त्वन्नोऽ-अग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाꣳ । यजिष्ठोवह्नितमꣳ शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् । ३/२१ ॥ सत्वन्नोऽअ-ग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोवरुणꣳ-रराणोवीहिमृडीकꣳसुहवोनऽएधि । ४/२१ ॥ मापोमौषधीर्हिꣳसीर्द्धा-म्नोधाम्नोराजँस्ततोवरुणनोमुञ्च । यदाहुरघ्न्याऽइतिवरुणेति-शपामहेततोवरुणनोमुञ्च । ५/२१ ॥ उदुत्तमंवरुणपाशमस्मदवाधमं-विमध्यमꣳश्रथाय । अथावयमादित्यव्रतेतवानागसोऽअदितयेस्याम । ६/२१ ॥ मुञ्चन्तुमाशपत्थ्यादथोवरुण्यादुत । अथोयमस्यपड्वी-शात्सर्वस्मादेवकिल्बिषात् । ७/२१ ॥ अवभृथनिचुम्पुणनिचेरुरसि-निचुम्पुणꣳ । अवदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यैकृतम्पु-रुराव्णोदेवरिषस्पाहि । ८/२१ ॥ एतैर्मंत्रैराभिषेचनंकृत्वापश्चान्निम-ज्योन्मज्याचामेत् ॥ ततोवक्ष्यमाणमंत्रैःप्रतिमंत्रंकुशत्रयेणस-जलेननाभिदक्षिणपार्श्वमारभ्यपाणिंशिरोपरिनीत्वानाभिवामपार्श्वप-र्यन्तंप्रदक्षिणमात्मानंपावयेत् ॥ यथा—आपोहिष्ठेतितिसृणां-

सिन्धुद्वीपऋषिरापोदेवतागायत्रीच्छन्दः इदमित्यस्यदीर्घतमाऋषिरापोदेवतामहापङ्क्तिश्छन्दः हविष्मतीरित्यस्यदीर्घतमाऋषिर्लिङ्गोक्तादेवतागायत्रीच्छन्दः देवीरापइत्यस्यमेधातिथिऋषिरापोदेवतापङ्क्तिश्छन्दःकार्षिरसीत्यस्यमेधातिथिऋषिराज्यंदेवताबृहतीच्छन्दः अपोदेवाइत्यस्यवरुणऋषिरापोदेवतात्रिष्टुप्छन्दः द्रुपदादिवेत्यस्यकोकिलराजपुत्रऋषिरापोदेवताअनुष्टुप्छन्दःशन्नोदेवीत्यस्यसिन्धुद्वीपऋषिरापोदेवतागायत्रीच्छन्दः अपाꣳरसमित्यस्यबृहस्पतिऋषिःरसोदेवतानुष्टुप्छन्दःअपोदेवीरित्यस्यसिन्धुद्वीपऋषिरापोदेवताबृहतीच्छन्दः पुनन्त्वित्यस्यहैमवर्चिऋषिः पितरोदेवताअनुष्टुप्छन्दः अग्नइत्यस्यप्रजापतिऋषिरग्निर्देवताअनुष्टुप्छन्दःपुनन्तुमेत्यस्यवैखानसऋषिर्लिङ्गोक्तादेवताअनुष्टुप्छन्दः पवित्रेणेत्यस्यप्रजापतिऋषिरग्निर्देवतागायत्रीच्छन्दःयत्तइत्यस्यप्रजापतिऋषिर्ब्रह्माग्निर्देवतागायत्रीच्छन्दःपवमानइत्यस्यप्रजापतिऋषिः सोमोदेवतागायत्रीच्छन्दः उभाभ्यामित्यस्यप्रजापतिऋषिः सूर्योदेवतागायत्रीच्छन्दः वैश्वदेवीत्यस्यप्रजापतिऋषिर्वैश्वदेवीदेवतात्रिष्टुप्छन्दःसर्वेषांपावनेविनियोगः ॥ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन । महेरणायचक्षसे । ५१ ॥ योवꣳशिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः । ५१ ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचनः । ५२ ॥ इदमापꣳप्रवहतावद्यच्चमलञ्चयत् । यच्चाभिदुद्रोहानृतंयच्चशेपेऽअभीरुणम् । आपोमातस्मादेनसꣳपवमानश्चमुञ्चतु । ५७ ॥ हविष्मतीरिमाऽआपोहविष्माऽआविवासति । हविष्मान्देवोऽअध्वरोहविष्माꣳऽअस्तुसूर्य्यः । २३ ॥ देवीरापोऽअपान्नपादयोवऽऊर्म्मिर्हविष्यऽइन्द्रि-

यावान्मादिन्तमꣳ । तन्देवेभ्योदेवत्रादत्तशुक्रपेभ्योषेषाम्भागस्त्य-
स्वाहा । २७ ॥ कार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि । समापोऽ-
अद्भिरग्मतसमोषधीभिरोषधीः । २८ अपोदेवामधुमतीरगृभ्णन्नूर्ज्जं-
स्वतीराजस्वञ्चितानाꣳ । याभिर्म्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्र-
मनयन्नत्यरातीꣳ । २९ ॥ द्रुपदादिवमुमुचानꣳस्विन्नꣳस्नातोमलादिव ।
पूतम्पवित्रेणेवाज्ज्यमापः÷शुन्धन्तुमैनसꣳ । ३० ॥ शन्नोदेवीराभिष्टय-
ऽआपोभवन्तुपीतये । शंय्योरभिस्रवन्तुनः । ३१ ॥ अपाꣳरसमुद्व्ययसꣳसूर्य्ये सन्तꣳसमाहितम् । अपाꣳरसस्यय्योरसस्तंवोगृह्णाम्युत्त-
ममुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टत-
मम् ॥ ३२ ॥ अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाभ्यः÷ ॥ तासा-
मास्थानादुज्जिहतामोषधयꣳसुपिप्पला? । ३३ ॥ पुनन्तुमापितरः÷
सोम्म्यासः÷पुनन्तुमापितामहाऽपुनन्तुप्रपितामहाꣳ । पवित्रेणशतायु-
षा । पुनन्तुमापितामहाऽपुनन्तुप्रपितामहाꣳ । पवित्रेणशतायुषावि-
श्वमायुर्व्यश्नवै । ३४ ॥ अग्नऽआयूꣳषिपवसऽआसुवोर्ज्जमिषञ्च-
नꣳ । आरेबाधस्वदुच्छुनाम् । ३५ ॥ पुनन्तुमादेवजनाऽपुनन्तुमनसा-
धियः÷ । पुनन्तुविश्वाभूतानिजातवेदः पुनीहिमा । ३६ ॥ पवित्रेणपु-
नीहिमाशुक्रेणदेवदीद्यत् । अग्नेक्रत्वाक्रतूꣳरनु । ३७ ॥
यत्तेपवित्रमर्चिष्यग्नेवितंतमन्तरा । ब्रह्मतेनपुनातुमा । ३८ ॥
पवमानꣳसोऽअद्यनः÷पवित्रेणविचर्षणिꣳ । यऽपोतासपुनातुमा । ३९ ॥
उभाभ्यान्देवसवितः पवित्रेणसवेनच । माम्पुनीहिविश्वतः÷ । ४० ॥
वैश्वदेवीपुनतीदेव्यागादयस्यामिमाबह्व्यस्तनूर्वीतपृष्टाꣳ । तयामदं-

न्त८सधमादेषुव्वयꣳस्यामपतयोरयीणाम् । ४४/१९ ॥ एभिर्मंत्रैःसजले-
नकुशत्रयेणनाभिदक्षिणपार्श्वमारभ्यशिरोवधिनीत्वानाभिवामपार्श्व-
पर्यन्तंप्रदक्षिणमात्मानंपावयेत् ॥ पश्चादुदकंस्पृशेत् ॥ ततोमार्जनम्-
तस्यमंत्राः-चित्पतिर्म्मेतित्रयाणांप्रजापतिऋषिः चित्पतिर्मावाक्पति-
र्मेत्युभयोःप्रजापतिर्देवतादेवोमेत्यस्यसवितादेवतायजुश्छन्दः मार्जने-
विनियोगः ॥ ॐचित्पतिर्म्मापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मि-
भिः । तस्यतेपवित्रपतेपवित्रेपूतस्ययत्कामःपुनेतच्छकेयम् । ४/४ ॥
इतिमंत्रेणनाभेरूर्ध्वंमार्जयित्वा ॥ ततोनाभेर्मध्येमार्जनम्-वाक्पति-
र्म्मापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः । तस्यतेपवित्रपतेप-
वित्रेपूतस्यत्कामःपुनेतच्छकेयम् ॥ इतिमंत्रेणनाभेर्मध्यंमार्जयित्वा ॥
ततोनाभेरधः मार्जनम्-देवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्य-
रश्मिभिः । तस्यतेपवित्रपतेपवित्रेपूतस्यत्कामःपुनेतच्छकेयम् ॥
इतिमंत्रेणनाभेरधोमार्जयित्वाततःसर्वाङ्गेमार्जनम्-ॐचित्पतिर्म्मापु-
नातुवाक्पतिर्म्मापुनातुदेवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्य-
रश्मिभिः ॥तस्यतेपवित्रपतेपवित्रेपूतस्यत्कामःपुनेतच्छकेयम् ॥४/४॥
इतिसंपूर्णमन्त्रेणसर्वाङ्गंमार्जयित्वा ॥ ततोऽधोलिखितमंत्रैःकुशैः-
पुनर्मार्जयेत् ॥ यथा-ॐइमम्मेव० ॐपुनातु ॥ ॐतत्त्वायामा० ॐभूः-
पुनातु ॥ ॐत्वन्नोऽअ० ॐभुवःपुनातु ॥ ॐसत्त्वन्नोऽअ० ॐस्वः-
पुनातु ॥ ॐमापोमौष० ॐमहःपुनातु ॥ ॐउदुत्तमम्० ॐजनः-
पुनातु ॥ ॐमुञ्चन्तुमा० ॐतपःपुनातु ॥ ॐअवंभृथनि० ॐसत्यं-
पुनातु ॥ ॐतत्सवितुर्व० सर्वंपुनातु ॥ इतिकुशैर्मार्जयि-

त्वाऽन्तर्जलेमग्नोऽनुच्छ्वसन्नघमर्षणंकुर्यात् ॥ द्रुपदादिवेत्यस्यकोकिल-राजपुत्रऋषिरापोदेवताअनुष्टुप्छन्दःअघमर्षणेविनियोगः ॥ ॐद्रुप-दादिवमुमुचानःस्विन्नःस्नातोमलादिव । पूतम्पवित्रेणेवाज्ज्यमापः÷

---

१ अपामार्गैस्तथादूर्वाभिर्मार्जनंश्रावण्यादिनैमित्तिकस्नानेकुर्यान्नतुनित्यस्नाने ॥ तद्यथा ॥ अपामार्गेणमार्जनम् ॥ ॐअपाघमित्यस्यशुनःशेपऋषिर्लिङ्गोक्तादे-वताअनुष्टुप्छन्दःमार्जनेविनियोगः—ॐअपाघमपकिल्बिषमपकृत्यामपोरपः÷ । अपामार्गत्वमस्मदपदुःष्वप्न्यꣳसुव । ११/३५ ॥ इतिमंत्रेणापामार्गपत्रैस्त्रिभिर्मार्ज-येत् ॥ ततः—दूर्वाङ्कुरेणमार्जनम्—काण्डात्काण्डादित्यस्याग्निर्ऋषिर्दूर्वेष्टकादेवता-अनुष्टुप्छन्दःमार्जनेविनियोगः—ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि । एवानोदूर्व्वेप्रतनुसहस्रेणशतेनच । २०/१३ ॥ इतिमन्त्रेणदूर्वाभिस्त्रिभिर्मार्जयेत् ॥ २ पक्षान्तरेणाघमर्षणंतुषड्विधमस्ति ॥ तत्रैकपक्षस्तुप्रयोगेसूचितोऽस्ति ॥ द्वितीयःपक्षः—ॐऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ॥ ततोरात्र्यजायततःतः-समुद्रोऽअर्णवः । समुद्रादर्णवादधिसंवत्सरोऽअजायत । अहोरात्राणिविदधद्वि-श्वस्यमिषतोवशी । सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत् । दिवंचपृथिवींचान्त-रिक्षमथोस्वः । ८४/८ ॥ इतित्रिःपठेत् ॥ तृतीयःपक्षः—ॐआयङ्गौऽपृश्निरक्रमी-दसदन्मातरंपुरः । पितरञ्चप्रयन्त्स्वः÷ । ६/३ ॥ इतित्रिःपठेत् ॥ चतुर्थःपक्षः—सशिरसंप्राणायामम् ॥ यथा—ॐभूःॐभुवःॐस्वःॐमहःॐजनःॐतपःॐस-त्यम्ॐतत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि । धियोयोनः÷प्रचोदयात् । ३५/३ ॥ इतित्रिःपठेत् ॥ पञ्चमःपक्षः—ॐइतित्रिःपठेत् ॥ षष्ठःपक्षः—परमात्मानं विष्णुंशेषशायिनंसायुधंसश्रीकमेकाग्रमनसास्मरेत् ॥

शुन्धन्तुमैनंसऽं । ३६० ॥ इतिमंत्रंत्रिःपठेत् ॥ पश्चात्स्नानाङ्गतर्पणम् । प्रथमंदेवतर्पणम्—पूर्वाभिमुखःसन्कुशत्रयंगृहीत्वातदग्रैःसव्येनदेवतीर्थेनोंकारपूर्वकंदेवेभ्यएकैकमञ्जलिंदद्यात् ॥ ॐब्रह्मादयोदेवास्तृप्यन्ताम् । ॐभूर्देवास्तृप्यन्ताम् । ॐभुवर्देवास्तृप्यन्ताम् । ॐस्वर्देवास्तृप्यन्ताम् । ॐभूर्भुवःस्वर्देवास्तृप्यन्ताम् ॥ द्वितीयमृषितर्पणम्—उदगग्रान्दर्भान्धृत्वातदग्रैर्निर्वीत्यप्रजापतितीर्थेनोंकारपूर्वकमृषिभ्योद्वौद्वावञ्जलीदेयौ । ॐसनकादिद्वैपायनादयोऋषयःस्तृप्यन्ताम् । ॐभूर्ऋषयस्तृप्यन्ताम् । ॐभुवर्ऋषयस्तृप्यन्ताम् । ॐस्वर्ऋषयस्तृप्यन्ताम् । ॐभूर्भुवःस्वर्ऋषयस्तृप्यन्ताम् । तृतीयं पितृतर्पणम्—शुग्रान्दक्षिणाग्रमूलान्दर्भान्धृत्वाऽपसव्येनपितृतीर्थेनोंकारपूर्वकंपितृभ्यस्त्रींस्त्रीन्तिलमिश्राञ्जलीन्द्द्यात् । ॐकव्यवाडनलादयःपितरस्तृप्यन्ताम् । ॐभूःपितरस्तृप्यन्ताम् । ॐभुवःपितरस्तृप्यन्ताम् । ॐस्वःपितरस्तृप्यन्ताम् । ॐभूर्भुवःस्वःपितरस्तृप्यन्ताम् । ततआचम्यसव्येनतिलमिश्राञ्जलिंगृहीत्वायक्ष्मंतर्पणंकुर्यात् ॥ तद्यथा—यन्मयादूषितंतोयंशरीरमलसंभवात् । तस्यपापस्यशुद्ध्यर्थं यक्ष्मैतत्तेतिलोदकम् ॥ इतिमंत्रेणतीर्थतटेतिलमिश्रजलाञ्जलिंनिक्षिपेत् ॥ पश्चात् शिखोदकत्यागः—लतागुल्मेषुवृक्षेषुपितरोयेव्यवस्थिताः । तेसर्वेतृप्तिमायान्तुमयोत्सृष्टैःशिखोदकैः ॥ इति-

---

१ नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते । तर्पणंतुभवेत्तस्यतदङ्गत्वेनकीर्तितम् ॥ २ हस्तौकृत्वातिलैःपूर्णौजलस्थस्तर्पयेत्पितॄन् । स्थलस्थेननकर्तव्यंपितॄणांतृप्तिमिच्छता ॥

मंत्रेणस्वदक्षिणभागेशिखाग्रंनिष्पीडयेत् ॥ ततोजलाद्बहिर्निष्क्रम्याहतेश्वेतधौतवासंसीपरिधायभस्मादिधारयेत् ॥ ततोगृहेव्रजेत् ॥ ॥ इतिनद्यादौनित्यस्नानप्रयोगः ॥

॥ ८ ॥ अथ गृहेप्रातःस्नानप्रयोगः ॥

शिलासनेदारुजासनेवामूर्याभिमुखउपविश्यहस्तौपादौप्रक्षाल्यगण्डूषत्रयंकुर्यात् ॥ आचम्यशिखांबद्ध्वाहस्तेजलमादायस्नानसङ्कल्पंकुर्यात् ॥ यथा–विष्णुर्विष्णुर्विष्णुःश्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्तमानस्यअद्यब्रह्मणःद्वितीयेपरार्द्धेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वन्तरेअष्टाविंशतितमेकलियुगेकलिप्रथमचरणेभारतवर्षेजम्बुद्वीपेरामक्षेत्रेपरशुरामाश्रमेदण्डकारण्यदेशेश्रीगोदावर्याः पश्चिमदिग्भागेश्रीमल्लवणाब्धेरुत्तरेतीरेश्रीशालिवाहनशाकेबौद्धावतारेअस्मिन्वर्तमानेअमुकनामसंवत्सरेअमुकायनेअमुकर्तौअमुकमासे अमुकपक्षे अमुक-

---

१ कार्पासंकटिमुक्तंचकौशेयंभोजनोत्तरम् । क्षालनाच्छुद्धिमाप्नोतिऊर्णावातेनशुद्ध्यति ॥ २ विभूतिर्यस्यनोभालेनाङ्गेरुद्राक्षधारणम् । नहिशिवमयीवाणीतंत्यजेदन्त्यजंयथा ॥ श्राद्धेयज्ञेजपेहोमेवैश्वदेवेसुरार्चने । भस्मत्रिपुण्ड्रैःपूतात्मामृत्युंजयतिमानवः ॥ ३ स्नात्वाशिरोनावधुनेत् । म्लेच्छान्त्यजपतितैःसंभाषणंनकुर्यात् । ४ प्रातःस्नानंप्रशंसन्तिदृष्टादृष्टकृतंहितत् । सर्वमर्हतिशुद्धात्माप्रातःस्नायीजपादिकम् ॥ अत्यन्तमलिनःकायोनवच्छिद्रसमन्वितः । स्रवत्येवदिवारात्रौप्रातःस्नानंविशोधनम् ॥ प्रातःस्नानंचरित्वाथशुद्धेतीर्थेविशेषतः । प्रातःस्नानाद्यतःशुद्धयेत्कायोऽयंमलिनःसदा ॥ नोपसर्पन्तिवैदुष्टाःप्रातःस्नायिजनंक्वचित् । दृष्टादृष्टफलंतस्मात्प्रातःस्नानंसमाचारेत ॥

वासरेऽमुकतिथौ ममात्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंममइहजन्मनिकायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पर्शास्पर्शासनभोजनशयनगमनादिकृतकर्मदोषनिरासद्वारात्रिविधतापोपशमनार्थं श्रीपरमेश्वरप्रीत्यर्थंउष्णोदकेनप्रातःस्नानमहंकरिष्ये॥इतिसङ्कल्प्यपात्रेशीतोदकंप्रक्षिप्यतदुपर्युष्णोदकेनपात्रमापूर्यतेनजलेनगङ्गादितीर्थानिस्मरन्सन्स्नायात्॥तीर्थप्रार्थना—पुष्कराद्यानितीर्थानिगङ्गाद्याःसरितस्तथा। आगच्छन्तुपवित्राणिस्नानकालेसदाममा॥नमामिगङ्गेतवपादपंकजंसुरासुरैर्वन्दितदिव्यरूपम्। मुक्तिंचमुक्तिंचददासिनित्यंभावानुसारेणसदानराणाम् ॥ गङ्गागङ्गेतियोब्रूयाद्योजनानांशतैरपि। मुच्यतेसर्वपापेभ्योविष्णुलोकेसगच्छति ॥ सुरधुनिमुनिकन्येतारयेःपुण्यवन्तंसतरतिनिजपुण्यैस्तत्रकिंतेमहत्त्वम्। यदिचगतिविहीनंपापिनंतारयेर्मांतदपिचतवमातस्त्वन्महत्त्वंमहत्त्वम् ॥ नन्दिनीनलिनीसीतामा-

---

१ अस्नात्वानाचरेत्कर्मजपहोमादिकंतथा। लालास्वेदसमाकीर्णःशयनादुत्थितःपुमान्॥ स्विद्यन्तेहिसुषुप्तस्यइन्द्रियाणिस्रवन्तिच। अङ्गानिसमतांयान्तिचोत्तमान्यधमैःसह ॥ अगम्यागमनाच्चैवपापेभ्यश्चपरिग्रहात्। रहस्यचरितात्पापान्मुच्यतेस्नानयोगतः ॥ गुणादशस्नानपरस्यनित्यंरूपंचतेजश्चबलंचशौचम्। आयुष्यमारोग्यमलोलुपत्वंदुःस्वप्ननाशश्चयशश्चमेधा ॥ २ चित्तमन्तर्गतंदुष्टंतीर्थस्नानान्नशुद्ध्यति। शतशोऽथजलैर्धौतंसुराभाण्डमिवाशुचि ॥ यस्यहस्तौचपादौचमनश्चैवसुसंयतम्। विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते ॥ मनोविशुद्धंपुरुषस्यतीर्थंवाचांयमस्त्विन्द्रियनिग्रहस्तपः। एतानितीर्थानिशरीरजानिस्वर्गस्यमार्गंप्रतिबोधयन्ति ॥

लतीचमलापहा । विष्णुपादाब्जसंभूतागङ्गात्रिपथगामिनी ॥ भा-
गीरथीभोगवतीजाह्नवीत्रिदशेश्वरी । द्वादशैतानिनामानिस्नानकाले-
सदास्मरेत् ॥ आपोनाराइतिप्रोक्तास्ताएवास्यायनंपुनः । तस्मा-
न्नारायणंदेवंस्नानकालेस्मराम्यहम् ॥ सत्यंतीर्थंक्षमातीर्थंतीर्थमिन्द्रि-
यनिग्रहः । सर्वभूतदयातीर्थंसर्वत्रार्जवमेवच ॥ दानंतीर्थंदमस्तीर्थं
सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्यंपरंतीर्थंतीर्थंचप्रियवादिता ॥ ज्ञानं-
तीर्थंधृतिस्तीर्थंपुण्यंतीर्थमुदाहृतम् । तीर्थानामपितत्तीर्थंविशुद्धिर्मनसः
परा ॥ इतिस्मरणपूर्वंकंस्नात्वाचामेत् ॥ इतिगृहेप्रातःस्नानप्रयोगः ॥

श्रावण्यादिनैमित्तिकस्नानेप्रायश्चित्तेतीर्थस्नानादिषुचहेमाद्रिप्रोक्तं
महास्नानसंकल्पंकुर्यात् ॥

॥ ९ ॥ अथ हेमाद्रिप्रोक्तस्नानसङ्कल्पः ॥

स्वस्तिश्रीसमस्तजगदुत्पत्तिस्थितिलयकारणस्यरक्षाशिक्षाविचक्ष-
णस्यप्रणतपारिजातस्यअशेषपराक्रमस्यश्रीमदनन्तवीर्यस्यादिनाराय-
णस्याचिन्त्यापरिमितशक्त्याध्रियमाणस्यमहाजलौघमध्येपरिभ्रममा-
णानामनेककोटिब्रह्माण्डानामेकतमेव्यक्तमहदहंकारपृथिव्यप्तेजोवा-
य्वाकाशाद्यावरणैरावृतेअस्मिन्महतिब्रह्माण्डखण्डेआधारशक्तिश्रीम-
दादिवाराहदंष्ट्राग्रविराजितेकूर्मानन्तवासुकितक्षककुलिककर्कोटकपद्म-
महापद्मशंखाद्यष्टमहानागैर्ध्रियमाणे ऐरावतपुंडरीकवामनकुमुदांजनपु-
ष्पदन्तसार्वभौमसुप्रतीकाष्टदिग्गजोपरिप्रतिष्ठितानामतलवितलसुतल-
तलातलरसातलमहातलपाताललोकानामुपरिभागे भूर्लोकभुवर्लोक-
स्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकाख्यसप्तलोकानामधोभा-

गेचक्रवालशैलमहावलयनागमध्यवर्तिनो महाकालमहाफणिराजशेष-
स्यसहस्रफणामणिमंडलमंडितेदिग्दन्तिशुंडादंडोद्दंडितेअमरावत्यशो-
कवतीभोगवतीसिद्धवतीगान्धर्ववतीकाञ्च्यवन्त्यलकावतीयशोवतीति-
पुण्यपुरीप्रतिष्ठितेलोकालोकाचलवलयितेलवणेक्षुसुरासर्पिर्दधिक्षीरो-
दकार्णवपरिवृतेजंबूप्लक्षकुशक्रौञ्चशाकशाल्मलिपुष्कराख्यसप्तद्वीपयुते-
इन्द्रकांस्यताम्रगभस्तिनागसौम्यगन्धर्वचारणभारतेतिनवखण्डमंडिते-
सुवर्णगिरिकर्णिकोपेतमहासरोरुहाकारपञ्चाशत्कोटियोजनविस्तीर्ण-
भूमंडलेअयोध्यामथुरामायाकाशीकाञ्च्यवंतिकाद्वारावतीतिसप्तपुरी-
प्रतिष्ठितेसुमेरुनिषधत्रिकूटरजतकूटताम्रकूटचित्रकूटहिमवद्विन्ध्याचला-
नांहरिवर्षाकिंपुरुषभारतवर्षयोश्चदक्षिणेनवसहस्रयोजनविस्तीर्णेमलया-
चलसह्याचलविंध्याचलानामुत्तरे स्वर्णप्रस्थचंडप्रस्थचंद्रशुक्लआवन्त-
करमणकमहारमणकपांचजन्यसिंहललंकेतिनवखण्डखण्डितेगङ्गाभा-
गीरथीगोदावरीक्षिप्रायमुनासरस्वतीनर्मदातापीचंद्रभागाकावेरीपयो-
ष्णीकृष्णावेण्याभीमरथीतुंगभद्राताम्रपर्णीविशालाक्षीचर्मण्वतीवेत्रव-
तीकौशिकीगंडकीविश्वामित्रीसरयूकरतोयाब्रह्मानंदामहीत्यनेकपुण्य
नदीविराजितेभरतखंडेभारतवर्षेजंबुद्वीपेरामक्षेत्रेकूर्मभूमौसाम्यवति-
कुरुक्षेत्रादिसमभूमौमध्येरेखायापूर्वदिग्भागेश्रीशैलात्पश्चिमदिग्भागे-
श्रीकृष्णावेण्याकावेरीमध्यदेशेतुंगभद्रायाउत्तरेतीरेगोदावर्यादक्षिणे-
तीरेआर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे हेमकूटमातंगमाल्यवान्किष्किंधास-
हितपंचक्रोशमध्येचंपकारण्यनैमिषारण्यबदरिकारण्यकामिकारण्यदंड-
कारण्यार्बुदारण्यधर्मारण्यपद्मारण्यजंबुकारण्यसमस्तपुण्यारण्यानांम-

ध्यदेशेभास्करक्षेत्रेसकलजगत्स्रष्टुःपरार्धद्वयजीविनोब्रह्मणोद्वितीयेपरार्धेएकपञ्चाशत्तमेवर्षेप्रथममासे प्रथमपक्षेप्रथमदिवसेअह्नोद्वितीययामेतृतीयेमुहूर्तेरथन्तरादिद्वात्रिंशत्कल्पानांमध्येअष्टमेश्वेतवाराहकल्पेस्वायंभुवादिमन्वंतराणांमध्येसप्तमेवैवस्वतमन्वंतरेकृतत्रेताद्वापरकलिसंज्ञकानांचतुर्णां युगानांमध्येवर्तमाने अष्टाविंशतितमेकलियुगेप्रथमचरणेभारतवर्षेभारतखंडेजम्बुद्वीपेरामक्षेत्रे परशुरामाश्रमेदंडकारण्यदेशेश्रीगोदावर्याःपश्चिमदिग्भागेश्रीमल्लवणाब्धेरुत्तरेतीरेश्रीशालिवाहनशाकेबौद्धावतारेप्रभवादिषष्टिसंवत्सराणांमध्येऽस्मिन्वर्तमाने अमुकनाम्निसंवत्सरेअमुकायनेअमुकर्तौअमुकमासे अमुकपक्षेअमुकतिथौअमुकवासरेअमुकनक्षत्रे अमुकराशिस्थितेचंद्रेअमुकराशिस्थितेश्रीसूर्येअमुकराशिस्थितेदेवगुरौ शेषेषुग्रहेषुयथायथाराशिस्थानस्थितेषुसत्सुएवं गुणविशेषणविशिष्टायांशुभपुण्यतिथौ ममइहजन्मनिजन्मान्तरेवाबाल्ययौवनवार्द्धक्यावस्थासुजाग्रत्स्वप्नसुषुप्त्यवस्थासुचवाक्पाणिपादपायूपस्थघ्राणरसनाचक्षुःस्पर्शनश्रोत्रमनोभिश्चरितानांज्ञाताज्ञातकामाकाममहापातकोपपातकादिसंचितानांपापानांब्रह्महननसुरापानस्वर्णस्तेयगुरुदारगमनतत्संसर्गरूपमहापातकानांतद्व्यतिरिक्तानांबुद्धिपूर्वकाणांअबुद्धिपूर्वकाणांचमनोवाक्कायकृतानामुपपातकानांस्पृष्टास्पृष्टसङ्करीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरणविहिताकरणकर्मलोपजनितानां रसविक्रयकन्याविक्रयहयविक्रयगोविक्रयसुतविक्रयधा-

---

१ ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमः । महान्तिपातकान्याहुःसंसर्गश्चापितैःसह ॥

न्यविक्रयरसरोष्ट्रविक्रयदासीविक्रयपशुविक्रयपण्यविक्रयजलचरादिजं-
तुविक्रयस्थलचरादिविक्रयखेचरादिविक्रयसंभूतानांब्राह्मणपितृमातृ-
गुरुभ्रात्रादितर्जनताडनादिदोषकथनदेवद्विजगोसंबन्धिभूम्यपहारअ-
न्यायार्जितद्विजवित्तापहारगुरुवधाक्षेपसुहृद्वधस्त्रीवधतडागाद्यारामा-
च्छेदनदहनकर्मविषप्रयोगाभिचारसहसंग्रामोन्मादनअसच्छास्त्राध्यय-
नचिकित्साप्रायश्चित्तशकुननीतिज्योतिःशास्त्रप्रयोगछन्दोनिन्दाकर-
णक्रय्यत्वकरणन्यायाकरणधरणीवित्तहरणादिधर्मकार्यविघ्नाचरणा-
त्मोत्कर्षपरनिन्दानृतभाषणपंक्तिभेदवृथापाकपरिभृतानांब्रह्महत्यासम-
मानांपुष्पिणीमुखास्वादनक्षालनोदकपाननखमुखास्वादनमुखनिःसृ
तनीरपानकपिलापयःपानपञ्चयज्ञोपासनपरित्यागअतिनिषिद्धभक्ष-
कूटसाक्ष्यादीनांसुरापानसमानांदंभास्त्रधारणांगवैकृत्यशूद्रसेवानग्नि-
कत्वबह्वाशिष्ट्वापुरोहितत्वदेवलकत्वाध्वसंरक्षणअश्वरत्नमनुष्यस्त्रीभू-
धेनुविक्षेपहरणकृषिकर्महयादिशिक्षाभारवाहित्वशिल्पविद्याभ्यासा-
दीनांस्वर्णस्तेयसमानानांपितृष्वसृमातृष्वसृभ्रातृपत्नीमातुलानीभगि-

---

१ गुरूणामध्यविक्षेपोवेदानिंदासुहृद्वधः । ब्रह्महत्यासमंज्ञेयमधीतस्यविनाशनम् ॥ अनृतंचसमुत्कर्षेराजगामिचपैशुनम् । गुरोश्चालीकनिर्बन्धःसमानिब्रह्महत्यया ॥ २ ब्रह्मोज्झतावेदनिन्दाकौटसाक्ष्यंसुहृद्वधः । गर्हितान्नाद्ययोर्जग्धिःसुरापानसमानिषट् ॥ निषिद्धभक्षणंजैह्म्यंमुत्कर्षेचवचोनृतम् । रजस्वलामुखास्वादःसुरापानसमानिषट् ॥ ३ निक्षेपस्यापहरणंनराश्वरजतस्यच । भूमिवज्रमणीनांचरुक्मस्तेयसमंस्मृतम् ॥ अश्वरत्नमनुष्यस्त्रीभूधेनुहरणंतथा । निक्षेपस्यचसर्वेहिसुवर्णस्तेयसंमितम् ॥

न्याचार्यतनयामातृसपत्नीसखिभार्याप्रवृत्ताशरणागताधात्रीसाध्वीवर्णोत्तमांत्यजाद्यगम्यागमनानांगुरुदारगमनसमानांनांगजाश्वोष्ट्रखरखड्गमहिषशरभशार्दूलसिंहभल्लूकसूकरवृकशुकहारिणवानरचतुष्पदजंबूकाविमेषमृगादिप्राणिवधानांसंकरीकरणसमानानाम् ॥ मयूरचाषभारद्वाजशुकचक्रवाकमीनादिबकशरहंसगृहगोधिकावधानांधैर्यादिमलिनीकरणानाम् ॥ ब्राह्मणकरणाघ्रेयाघ्राणादिजिह्वामैथुनादिकोपात्यंतविषयासक्तकृतघ्रतादीनामपात्रीकरणानाम् ॥ अयोनिपशुयोनिरेतोत्सर्जनयतिब्राह्मणवृत्तिच्छेदनशास्त्रनिंदागोसंचिततृणसंचयाग्निप्रदानानांजातिभ्रंशकरणानाम् ॥ मुखनासारंध्रकरणनाहासनप्रदानविमयवृद्धयुपजीवनविषमवाक्शार्दंडपाशसंग्रहणक्रीडानाट्यतत्कालदंतधावनाभ्यंगमैथुनक्षौरनिस्वापादीनाम् ॥ वैश्यागमनदासीगमनकन्यागमनपितृव्यपत्नीगमनरजस्वलागमन स्वगोत्रागमनतिर्यग्योनिगमनप्रतिलोमजागमनसाधारणस्त्रीगमनअनृतौभार्याभि-

---

१ मनुः—रेतःसेकःस्वयोनीषुकुमारीष्वन्त्यजासुच । सख्युपुत्रस्यचस्त्रीषुगुरुतल्पसमंविदुः ॥ याज्ञवल्क्यः—सखिभार्याकुमारीषुस्वयोनीष्वंत्यजासुच । स्वगोत्रासुसुतस्त्रीषुगुरुतल्पसमंस्मृतम् ॥ पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि । मातुःसपत्नींभगिनीमाचार्यतनयांतथा ॥ आचार्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगः॥

२ मनुः—खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा । संकरीकरणंज्ञेयंमीनाहिमहिषस्यच ॥ ३ कृमिकीटवयोहत्यामद्यानुगतभोजनम् । फलैधःकुसुमस्तेयमधैर्यंचमलावहम् ॥ ४ मनुः—निन्दितेभ्योधनादानंवाणिज्यंशूद्रसेवनम् । अपात्रीकरणंज्ञेयमसत्यस्यचभाषणम् ॥ ५ ब्राह्मणस्यरुजःकृत्याघ्रातिरघ्रेयमद्ययोः । जैह्म्यंचमैथुनंपुंसिजातिभ्रंशकरंस्मृतम् ॥

गमनसुतवधूगमनानाम् ॥ एकादश्यन्नगणिकान्नगणकान्नभिन्नकांस्य-
भोजनादियानक्रमुकभक्षणतांबूलादिचर्वणानाम् ॥ अहःखट्वासंग-
मचित्रवस्त्रालंकारस्वमेन्द्रियनिपातितानाम् ॥ संधानादिनाष्टमीचतु-
र्दशीदिवाभोजनभानुवारे पर्वरात्रिभोजनादिगृहण्यागर्भिण्यागमनम-
नोरथक्षारव्रात्यान्नपतितप्रेरितान्नतुरुष्कान्नकारागृहनिवासभोजनतुरु-
ष्कमध्येनिवासतुरुष्कस्पृष्टद्रव्योपभोगतुरुष्कस्पर्शतुरुष्कदेश निवासा-
दीनाम् ॥ कुग्रामवासवाङ्निष्ठुरदुर्गृहदुर्भोजनापक्वपाकय-
त्नकटकान्ननखनिकृंतननदीलंघनसमुद्रस्नानब्राह्मणवृत्तिच्छेदन अनि-
मित्तभार्याविसर्जनब्राह्मणद्वेषद्विजभेद मित्रभेदस्त्रीपुरुषभेदस्थूलसूक्ष्म-
जीवहिंसनक्रूरकर्मअनृतलुब्धकपिशुनचौरपाखंडनारी लंपटचांडालश-
वास्थिस्पर्शगृंजनभक्षणलशुनभक्षणमसूरान्नभक्षणमार्जारोच्छिष्टभोज-
नपतितपंक्तिभोजनपतितसंभाषणादीनाम् ॥ बालस्तेयऋणापाकर-
णअनाहिताग्नितापक्रयपरिवेदभृतकाध्ययनादानभृतकाध्ययनपरदार-
परवित्तवात्सल्यस्त्रीशूद्रक्षत्रविट्बंधुनिंदार्थोपजीवननास्तिक्यव्रतलोप-
कुप्यपशुस्तेयायाज्ययाजनपितृमातृसुतत्यागतडागारामविक्रयकन्या-
संदूषणपरनिंदकयाजनतत्कन्यापदानकौटिल्यव्रतलोपन स्वार्थक्रिया-
रंभपरस्त्रीनिषेवणस्वाध्यायाग्निसुतत्यागबांधवत्यागइन्धनार्थद्रुमच्छेद-
नस्त्रीहिंसौषधिजीवनहिंस्रे मंत्रविधानव्यसनात्मकविक्रयशूद्रप्रेष्यहीन-
योनिनिषेवणानाम् ॥ भ्रमवासपरान्नपुष्टत्वासच्छास्त्राधिगतप्राकारा-
धिकारित्वभार्याविक्रयाद्युपपातकानाम् ॥ तथैकादशाहादिश्राद्धान्न-
भोजनहस्तदत्तशूद्रदत्तघृतादिभोजनआपोशनरहितभोजन यज्ञोपवीत-
रहितान्नभोजनरेतोमूत्रादिभक्षणमृल्लोष्टभक्षणवैश्वदेवरहितादि दूषिता-

न्नभोजनशूद्रादिम्लेच्छान्नभोजनपुंसवनसीमंतोन्नयनादिभोजनजात-
कर्मादिभोजननीलवस्त्रपरिधानभोजनोच्छिष्टभोजनकुत्सितपंक्ति-
भोजनचांडालकूपभांडोदकपानचांडालस्पृष्टजलक्षीरादिपानद्विजद्र-
व्यापहरणश्राद्धदिनेगमनदिवामैथुनोन्मादकद्रव्यभक्षणसूर्योदयास्त-
शयनपतितादिदुष्टप्रतिग्रहप्रायश्चित्तद्रव्यप्रतिग्रहस्वनिषिद्धवृत्तिधनार्ज-
नमिथ्याब्राह्मणक्रोधोत्पादनबलात्कारितम्लेच्छादिसंसर्गम्लेच्छभा-
षणपरस्परानुरक्तद्वेषोत्पादनइन्द्रधनुःप्रदर्शनश्राद्धनिमंत्रितब्राह्मणा-
नाह्वानदेवागारकृतेष्टशिलादिहरणव्रतभंगखरोष्ट्रादियानशिवनिर्माल्य-
स्पर्शशिवद्रव्योपजीवनविष्णुद्रव्योपजीवनउपाधिकत्रैवर्णिकदेवार्चनद्वे-
ष्यभिचारणकूटमंत्रकूटहोमकरणपूज्यापूजनअपूज्यपूजन शरणागतप-
रित्राणाकरणकृतोपकारविस्मरण विविधकपटविद्योपजीवनपरविवा-
हान्तरायकरणदेवर्षिद्विजनिन्दाकरणपरमसन्मानदूरीकरणगुणयुक्त-
स्यापमानकरणअकालभोजनअदेशभोजनसार्वकालिकपरद्वेष्याभिनि-
वेशपरमार्थाचिन्तनयजनयाजनहोमदानान्तरायकरणादिपापानां वि-
नाशार्थंश्रीपरमेश्वरप्रीत्यर्थंदेवब्राह्मणसवितृसूर्यनारायणसन्निधौअमु-
कतीर्थस्नानमहंकरिष्ये ॥ इतिहेमाद्रिकृतस्नानसंकल्पः ॥

॥ १० ॥ अथ गौणस्नानानि ॥

अतिबाल्यवार्द्धक्यातुरतयाअस्वास्थ्येसतिउष्णोदकेनापिस्नानं-

---

१ असामर्थ्याच्छरीरस्यदेशकालाद्यपेक्षया । मन्त्रस्नानादिकाःसप्तकेचिदि-
च्छन्तिसूरयः ॥ स्नानंतुद्विविधंप्रोक्तंमुख्यगौणप्रभेदतः । चतुर्विधंतत्रमुख्यंगौण-
वैषड्विधंभवेत् ॥ अशिरस्कंभवेत्स्नानंस्नानाशक्तौतुकर्मिणाम् । आर्द्रेणवाससा-
वापिमार्जनंदैहिकंविदुः ॥

कर्तुमशक्तश्चेत् गौणस्नानंकर्तव्यम् । यथा—आचम्यसंध्याद्यधिकारार्थंअमुकस्नानमहंकरिष्ये इतियथानिमित्तंसंकल्पादिकृत्वास्नानंविधेयम् । गौणस्नानानि—आपोहिष्ठेतितिसृभिर्मंत्रैःअङ्गानांप्रोक्षणंमंत्रस्नानम् । गायत्र्यादशकृत्वोजलमभिमंत्र्यतेनसर्वाङ्गप्रोक्षणंगायत्रम् । अग्निरितिभस्मेत्यादिमंत्रैरंगेषुभस्मलेपनंआग्नेयस्नानम् । आर्द्रवस्त्रेणाङ्गमार्जनंकापिलम् । गोरजसांअङ्गेलेपनंवायव्यस्नानम् । मृदालंभंपार्थिवस्नानम् । सातपवर्षेणस्नानंदिव्यम् । आत्मचिन्तनंमानसम् । विष्णुपादोदकविप्रपादोदकप्रोक्षणविष्णुध्यानादिभिश्चस्नानांतराणिसन्तितेषांमध्येयथासंभवंविधेयम् । गौणस्नानैर्जपसंध्यादौशुद्धिर्नतुश्राद्धदेवार्चनादौब्रह्मयज्ञेविकल्पः ॥

॥ ११ ॥ अथ दशविधस्नानानि ॥

तीर्थस्नानेतथाप्रायश्चित्तादिषुकेचनदशविधनास्नानंकुर्वन्तियथा—१ भस्मस्नानम्—ॐनमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः । बाहुभ्यामुतेनमः ॥ १/१६ ॥ यथाग्निर्दहतेभस्मतृणकाष्ठादिसंचयम् । तथामेदह्यतांपापंकुरुभस्मशुचेशुचिम् ॥ २ अथ मृत्तिकास्नानम्—ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाꣳसुरेस्वाहा ॥ १/५ ॥ अश्वक्रान्तेरथक्रान्तेविष्णुक्रान्तेवसुन्धरे । शिरसाधारयिष्यामिरक्षस्वमांपदेपदे ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना । मृत्तिकेहरमेपापं यन्मयादुष्कृतंकृतम् ॥ मृत्तिकेब्रह्मपूतासिकाश्यपेनाभिवन्दिता । मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितम् ॥ ३ अथगोमयस्नानम्—ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ६ ॥

मानोवि॒रान्त्रु॒द्र भा॒मिनो॑वधीर्हविष्म॒न्त॑ꣳसद॒मित्वा॑हवामहे ॥ ९६/१६ ॥ गोमयेवसतेलक्ष्मीःपवित्रासर्वमंगला । स्नानार्थंसंस्कृतादेवीपापंमेहर गोमय ॥ अग्रमग्रंचरन्तीमामोषधीनांवनेवने । तासामृषभपत्नीनां पवित्रंकायशोधनम् ॥ यन्मेरोगंचशोकंचतन्मेदहतुगोमय ॥ ४ अथ पंचगव्यस्नानम्—ॐ स॒हस्र॑शीर्षा॒ पुरु॑ष॒ꣳसह॒स्रा॒क्ष॒?स॒हस्र॑पात् ॥ सभू॒मिꣳस॒र्व॒तस्पृ॒त्वात्य॑तिष्ठद्दशाङ्गु॒लम् ॥ ९/३१ ॥ गोमूत्रंगोमयंक्षीरं॒दधिसर्प्पिःसमन्वितम् । सर्वपापविशुद्ध्यर्थंपञ्चगव्यंपुनातुमाम् ॥ ५ अथ गोरजस्नानम्—ॐ आय॑ङ्गौ॒?पृ॒श्नि॒र॑क्र॒मी॒दस॑द॒न्मा॒तर॑म्पु॒र॒?॥ पि॒तर॑ञ्च॒प्र॒यं॒त्स्व॑÷॥ ६/३॥ गवांखुरेणनिर्द्धूतंयद्रेणुगगनेगतम् । शिरसातेनसंलेपेमहापातकनाशनम् ॥ ६ अथ धान्यस्नानम्—ॐ या॒न्य॒मसि॑धि॒नु॒हि॒देवान्प्राणायत्त्वोदा॒नाय॑त्वा॒व्या॒नाय॑त्वा ॥ दीर्घाम॒नुप्र॑सिति॒मायु॑षेधान्दे॒वोव॑÷स॒वि॒ताहि॑र॒ण्यपा॑णि॒ꣳप्रति॑गृ॒ब्भ्णा॒त्वच्छि॒द्रेणपा॒णि॒ना॒चक्षु॑षेत्वा॒महीना॒म्पयो॑सि ॥ २०/१ ॥ धान्यौषधीमनुष्याणां जीवनंपरमंस्मृतम् । तेनस्नानेनदेवेशममपापंव्यपोहतु ॥ ७ अथफलस्नानम्—ॐ या॒?फ॒लिनी॒र्या॒ऽअ॑फ॒ला॒ऽअ॑पु॒ष्पा॒या॒श्च॒पु॒ष्पि॒णी॒ꣳ॥ बृह॒स्प॒ति॒प्र॒सू॒ता॒स्तानो॑मुञ्च॒न्त्व॒ꣳह॒सꣳ ॥ ९९/१२ ॥ वनस्पतिरसोदिव्यः फलपुष्पवृतःसदा । तेनस्नानेनमेदेवफललब्धमनंतकम् ॥ ८ अथ सर्वौषधीस्नानम्—ॐ ओष॑धय॒ꣳसम॑वदन्त॒सोमे॑न स॒ह॒राज्ञा॑ ॥ यस्मै॑कृ॒णोति॑ब्राह्म॒ण॒स्त॒ꣳराज॑न्पारयामसि ॥ ९६/१२ ॥ ओषधयःसर्ववृ-

---

१ कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचन्दनम् । वचाचंपकमुस्तंचसर्वौषध्यो-दशस्मृताः ॥

क्षाणांतृणगुल्मलतास्तुयाः । दूर्वासर्षपसंयुक्तासर्वौषध्यःपुनंतुमाम् ॥ ९ अथकुशोदकस्नानम्—ॐदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् ॥ १० ॥ कुशमूलेस्थितोब्रह्माकुशमध्येजनार्दनः ॥ कुशाग्रेशंकरोदेवस्तेननश्यतुपातकम् ॥ १० अथहिरण्यस्नानम्—ॐआकृष्णेनरजसावर्त्तमानोनिवेशयंन्नमृतम्मर्त्यंञ्च । हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ११ ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः । अनंतपुण्यफलदमतःशान्तिम्प्रयच्छमे ॥ इतिदशविधस्नानानि ॥

॥ १२ ॥ अथ प्रातःसन्ध्याप्रयोगः ॥

यथोक्तस्नानानंतरंश्वेतंधौतंवस्त्रंपरिधायउपवस्त्रंगृहीत्वाततःकुशा-

---

१ उत्तमातारकोपेतामध्यमालुप्ततारका । अधमासूर्यसहिताप्रातःसंध्यात्रिधामता ॥ अहोरात्रस्ययःसन्धिःसूर्यनक्षत्रवर्जितः । सातुसन्ध्यासमाख्याताामुनिभिस्तत्वदर्शिभिः ॥ २ स्नात्वैववाससीधौतेअक्लिन्नेपरिधापयेत् । अभावेधौतवस्त्रस्यपट्टक्षौमादिकानिच । कुतपंयोगपट्टंवाविवासायेननोभवेत् ॥ वस्त्रधारणमंत्रः पा० गृ० सू० परिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि । शतंचजीवामिशरदःपुरूचीरायस्पोषमभिसंव्ययिष्ये ॥ ३ उपवस्त्रधारणावश्यकता—होमदेवार्चनाद्यासुक्रियासुपठनेतथा । नैकवस्त्रःप्रवर्तेतद्विजोनाचमनेजपे ॥ तथाचएकवस्त्रंविनापात्रंसव्ययज्ञोपवीतकम् । प्रत्यक्षंतुनदीशौचंकुर्वन्छूद्रत्वमाप्नुयात् ॥ उपवस्त्रधारणेमंत्रः—यशसामाद्यावापृथिवीयशसेन्द्राबृहस्पती । यशोभगश्चमाविदद्यशोमाप्रतिपद्यताम् ॥

दिविहितासनेप्राङ्मुखउपविश्यसव्यहस्तेकुशत्रैयं दक्षिणहस्तेकुशद्वयं धारयेत् तस्यमंत्रः-ॐपवित्रेस्थोवैष्णव्यौसवितुर्वः÷प्रसवऽउत्पु-नाम्म्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः÷ ॥ १/१ ॥ तस्यतेपवित्रपते पवित्रपूतस्ययत्कामऽपुनेतच्छकेयम् ॥ ४/४ ॥ आचमनम्—अन्त-र्जानुहस्तःसंहताङ्गुलिनाशुद्धजलंगृहीत्वामुक्ताङ्गुष्ठकनिष्ठेनवामेना-न्वारब्धपाणिनाब्रह्मतीर्थेनत्रिरपःपिबेत्—ॐकेशवायनमः स्वाहा । ॐनारायणायनमः स्वाहा । ॐमाधवायनमः स्वाहा । हस्तप्रक्षा-लनम्—ॐगोविंदायनमः स्वाहा ॥ प्राणायामः-प्रणवस्यपरब्रह्म-

---

१ काम्यार्थेकंबलंचैवश्रेष्ठंचरक्तकंबलम् । कृष्णाजिनेज्ञानसिद्धिर्मोक्षस्तु-व्याघ्रचर्मणि ॥ कुशासनेज्ञानसिद्धिर्नात्रकार्याविचारणा । धरण्यांदुःखसंभूति-र्दौर्भाग्यंदारुजासने ॥ वंशासनेदरिद्रःस्यात्पाषाणेव्याधिपीडनम् । तृणासनेय-शोहानिःपल्लवैश्चित्तविभ्रमः ॥ जपध्यानतपोहानिंकुर्वन्वस्त्रासनंतथा ॥ २ समू-लाग्रैर्विगर्भैंतुकुशैर्द्वादक्षिणेकरे । सव्येचैवतथात्रींश्चैबिभृयात्सर्वकर्मसु ॥ दर्भ-हीनातुयासन्ध्यायच्चदानंविनोदकम् । असंख्यातंतुयज्जप्तंतत्सर्वंनिष्फलंभवेत् ॥ कुशपवित्राभावेहेमपवित्रंधार्यम्—जपेहोमेतथादानेस्वाध्यायेपितृतर्पणे । अशून्यं-तुकरंकुर्यात्सुवर्णरजतैःकुशैः ॥ स्नानेहोमेजपेदानेस्वाध्यायेपितृकर्मणि । करौ-सदर्भौंकुर्वीततथासन्ध्याभिवादने ॥ उभयत्रस्थितैर्दर्भैःसमाचामतियोद्विजः । सोमपानफलंतस्यभुक्त्वायज्ञफलंलभेत् ॥ सपवित्रेणहस्तेनकुर्यादाचमनक्रियाम् । नोच्छिष्टंतत्पवित्रंतुभुक्तोच्छिष्टंतुवर्जयेत् ॥ ३ भोजनंहवनंदानमुपहारःप्रति-ग्रहः । बहिर्जानुनकार्याणितद्वदाचमनंविदुः ॥ ४ संहताङ्गुलिनातोयंगृही-त्वापाणिनाद्विजः । मुक्ताङ्गुष्ठकनिष्ठेनशेषेणाचमनंचरेत् ॥ ५ सव्याहृति-सप्रणवांगायत्रींशिरसासह । त्रिःपठेदायतप्राणःप्राणायामःसउच्यते ॥

ऋषिःपरमात्मादेवतादेवीगायत्रीच्छन्दः प्राणायामेविनियोगः ॥ ॐभूः ॐभुवः ॐस्वः ॐमहः. ॐजनः ॐतपः ॐसत्यम् ॐतत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः÷प्रचोदयात् ॥ ३५/३ ॥ ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम् ॥ एवंपूरकः कुम्भकःरेचकःक्रमेणत्रिवारंपठेत् ॥ भस्मधारणम्—वामहस्तेदक्षिणहस्तेनभस्मगृहीत्वाजलमिश्रणानंतरंदक्षिणहस्तेनमर्दयेत् तस्यमन्त्रः—ॐ अग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थलमितिभस्मव्योमेतिभस्मसर्वंह वाइदंभस्ममनएतानिचक्षूंषिभस्मानि ॥ इतिमंत्रेणमर्दनानंतरंदक्षिणहस्तेनाच्छाद्यअभिमंत्रणम्—ॐ त्र्यंबकमित्यस्यवसिष्ठऋषिःरुद्रोदेवताअनुष्टुप्छन्दः प्रसद्येत्यस्यविरूपऋषिःअग्निर्देवता अनुष्टुप्छन्दःभस्माभिमंत्रणेविनियोगः ॥ ॐत्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ ६०/३ ॥ ॐप्रसद्यभस्मम्मनायोनिमपश्चपृथिवीमग्ने ॥ सꣳसृज्यमातृभिष्टुङ्ज्योतिष्मान्पुनरासदꣳ ॥ ३६/१२ ॥ इत्यभिमंत्र्यधारणम्—त्र्यायुषमित्यस्यनारायणऋषिःरुद्रोदेवताउष्णिक्छन्दःभस्मधारणेविनियोगः ॥ ॐत्र्यायुषंजमदग्नेः—ललाटे । कश्यपस्यत्र्यायुषम्—ग्रीवायाम् ।

---

१ करोतिशिवमंत्रेणयस्त्रिपुंड्रंद्विजोत्तमः । त्र्यक्षःशुद्धतरःसौम्यःशिवलोकेमहीयते ॥ अन्यच्च—वामहस्ततलेभस्मक्षिप्त्वाऽच्छाद्यान्यपाणिना । अग्निरित्यादिमन्त्रेणस्पृशन् भस्माभिमंत्र्यच ॥ मध्याङ्गुलित्रयेणैवस्वदक्षिणकरस्यच । त्रिपुंड्रंधारयेद्विद्वान्सर्वकल्मषनाशनम् ॥ सत्यंशौचंजपोहोमस्तीर्थदेवादिपूजनम् । तस्यव्यर्थमिदंसर्वंयस्त्रिपुण्ड्रंनधारयेत् ॥

यद्देवेषुत्र्यायुषम्—बाह्वोः । तन्नोऽअस्तुत्र्यायुषम्—हृदये ॥ शिखा[१]-बन्धनम्-मानस्तोकेतिमंत्रस्यकुत्सऋषिःजगतीच्छन्दःएकोरुद्रोदेवता-शिखाबन्धनेविनियोगः—ॐमानस्तोकेतनयेमानऽआयुषिमानोगो-षुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥ $\frac{१६}{१६}$ ॥ चिद्रूपिणिमहामायेदिव्यतेजःसमन्विते । तिष्ठदेविशिखाबन्धेतेजोवृद्धिंकुरुष्वमे ॥ इतिअङ्गुष्ठमात्रांशिखांनैर्ऋ-त्यांबद्ध्वा ॥ कण्ठेरुद्राक्ष[२]मालाधारणम्—त्र्यम्बकमित्यस्यवसिष्ठऋ-षिःरुद्रोदेवताअनुष्टुप्छन्दः रुद्राक्षमालाधारणेविनियोगः—ॐत्र्यम्ब-कंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षी-यमामृतात् ॥ $\frac{६०}{३}$ ॥ अनेनमन्त्रेणरुद्राक्षमालांधृत्वा ॥ पवित्रकरणम्—ॐविष्णुर्विष्णुर्विष्णुः । ॐवाग्वाक्—जलार्द्रहस्तेनदक्षिणकराङ्गुल्य-ग्रैरोष्ठौस्पृशेत् ॥ ॐप्राणःप्राणः—अङ्गुष्ठतर्जनीभ्यांनासारन्ध्रेस्पृशेत् । ॐचक्षुश्चक्षुः—अङ्गुष्ठानामिकाभ्यांअक्षिणीस्पृशेत् । ॐश्रोत्रंश्रोत्रम्—अङ्गुष्ठानामिकाभ्यांकर्णौस्पृशेत् । ॐनाभिः—अङ्गुष्ठकनिष्ठिकाभ्यां नाभिंस्पृशेत् । ॐहृदयम्—हस्ततलेनहृदयंस्पृशेत् । ॐकण्ठः—कराग्रेणकण्ठंस्पृशेत् । ॐशिरः—कराग्रेणशीर्षंस्पृशेत् । ॐबाहुभ्यां-यशोबलम्—कराग्रेणबाहुमूलेस्पृशेत् । अपवित्रःपवित्रोवासर्वावस्थां-

---

१ स्नानेदानेजपेहोमेसन्ध्यायांदेवतार्चने। शिखाग्रन्थिविनाकर्मनकुर्याद्वैकदा-चन ॥ २ रुद्राक्षायस्यगात्रेषुललाटेचत्रिपुण्ड्रकम् । संचाण्डालोपिसंपूज्यः सर्ववर्णोत्तमोभवेत् ॥ अभक्तोवापिभक्तोवानीचोनीचतरोपिवा । रुद्राक्षान्धार-येद्यस्तुमुच्यतेसर्वपातकैः ॥

गतोऽपिवा । यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्यन्तरःशुचिः ॥ अनेनमंत्रेणकिञ्चिज्जलंशिरसिसिंचेत् ॥ अथसङ्कल्पः-विष्णुर्विष्णुर्विष्णुःश्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्तमानस्यअद्यब्रह्मणःद्वितीयेपरार्द्धे श्रीश्वेतवाराहकल्पेवैवस्वतमन्वन्तरेअष्टाविंशतितमेकलियुगेकलिप्रथमचरणेभारतवर्षेजम्बुद्वीपेरामक्षेत्रेपरशुरामाश्रमेदण्डकारण्यदेशेश्रीगोदावर्याःपश्चिमदिग्भागेश्रीमल्लवणाब्धेरुत्तरेतीरेअमुकेश्रीशालिवाहनशाकेअमुकनामसंवत्सरेतथाअमुकेश्रीविक्रमवर्षेअमुकसंवत्सरेअमुकायनेअमुकर्तौअमुकमासेअमुकपक्षेअमुकतिथौअमुकवासरेअमुकनक्षत्रेअमुकराशिस्थितेचन्द्रेअमुकराशिस्थितेश्रीसूर्येअमुकराशिस्थितेदेवगुरौशेषेषुग्रहेषुयथायथंराशिस्थानस्थितेषुसत्सुएवं गुणविशेषणविशिष्टायांशुभपुण्यतिथौममोपात्तदुरितक्षयपूर्वकब्रह्मवर्चसकामार्थंश्रीपरमेश्वरप्रीतयेप्रातस्सन्ध्योपासनंकरिष्ये ॥ इतिसङ्कल्प्यभूमिप्रार्थना-पृथिवीत्यस्यमेरुपृष्ठऋषिःकूर्मोदेवतासुतलंछंदः आसनेविनियोगः-पृथिवित्वयाधृतालोकादेवित्वंविष्णुनाधृता । त्वंचधारयमांदेविपवित्रंकुरुचासनम् ॥ इतिमंत्रेणदक्षिणहस्तस्यमध्यमानामिकाभ्यांआसनोपरिकिञ्चिज्जलंक्षिपेत् ॥भूतशुद्धिः-अपसर्पंतुतेभूतायेभूताभूमिसंस्थिताः। येभूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया ॥ अपक्रामन्तुभूतानिपिशाचाः सर्वतोदिशम् । सर्वेषामविरोधेनसन्ध्याकर्मसमारभे ॥ इतिद्वाभ्यांवामपादपार्ष्णिनात्रिवारंभूमिंताडयित्वाभूतान्युत्सार्यभैरवनमस्कारः-तीक्ष्णदंष्ट्रमहाकायकल्पान्तदहनोपम । भैरवायनमस्तुभ्यमनुज्ञांदातु-

---

१ अयंसङ्कल्पःदेशविशेषेणग्राह्यः ॥

महसि ॥ अभिषेचनम्–ॐकारस्यब्रह्माऋषिःपरमात्मादेवतागा-यत्रीछन्दःसर्वकर्मारंभेविनियोगः । भूरादिसप्तव्याहृतीनांविश्वामित्र-जमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपाऋषयः । अग्निवायुसूर्यबृह-स्पतिवरुणेन्द्रविश्वेदेवादेवताः । गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तित्रिष्टुप्-जगत्यश्छन्दांसि । तत्सवितुरित्यस्यविश्वामित्रऋषिःसवितादेवता-गायत्रीछन्दःअभिषेकेविनियोगः–ॐभूःपुनातु–शिरसि । ॐभुवः पुनातु–नेत्रयोः । ॐस्वःपुनातु–कण्ठे । ॐमहःपुनातु–हृदये । ॐजनःपुनातु–नाभ्याम् । ॐतपःपुनातु–पादयोः । ॐसत्यंपु-नातु–पुनःशिरसि । ॐतत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ३५/३ ॥–सर्वाङ्गंपुनातु ॥ इतिप्रतिमंत्रं दक्षिणेनपाणिनाकुशानादायवामकरस्थिततोयैरभिषिञ्चेत् ॥ व्याहृ-तिपूर्वकगायत्रीकरन्यासाः–ॐभूः–अङ्गुष्ठाभ्यांनमः । ॐभुवः–तर्जनीभ्यांनमः । ॐस्वः–मध्यमाभ्यांनमः । ॐतत्सवितुर्वरेण्यम्–अनामिकाभ्यांनमः । ॐभर्गोदेवस्यधीमहि–कनिष्ठिकाभ्यांनमः । ॐधियोयोनःप्रचोदयात्–करतलकरपृष्ठाभ्यांनमः ॥ अथव्याहृति-पूर्वकंगायत्रीषडङ्गन्यासाः–ॐभूः–हृदयायनमः । ॐभुवः–शिरसे-स्वाहा । ॐस्वः–शिखायैवषट् । ॐतत्सवितुर्वरेण्यम्–कवचायहुम् । ॐभर्गोदेवस्यधीमहि–नेत्रत्रयायवौषट् । ॐधियोयोनःप्रचोद-यात्–अस्त्रायफट् ॥ अथप्रणवन्यासाः–ॐअकारम्–नाभौ । ॐ-उकारम्–हृदये । ॐमकारम्–मूर्ध्नि ॥ अथव्याहृतिन्यासाः–ॐ-भूःपादयोः । ॐभुवः–जान्वोः । ॐस्वः–ऊर्वोः । ॐमहः–जठरे । ॐजनः–कण्ठे । ॐतपः–मुखे । ॐसत्यम्–शिरसि ॥ अथ गाय-

त्र्यक्षरन्यासाः—ॐतकारम्—पादाङ्गुष्ठयोः । ॐसकारम्—गुल्फयोः । ॐविकारम्—जङ्घयोः । ॐतुकारम्—जान्वोः । ॐवकारम्—ऊर्वोः । ॐरेकारम्—गुदे । ॐणिकारम्—लिङ्गे । ॐयकारम्—कट्याम् । ॐभकारम्—नाभौ । ॐगोकारम्—उदरे । ॐदेकारम्—स्तनयोः । ॐवकारम्—हृदये । ॐस्यकारम्—कण्ठे । ॐधीकारम्—मुखे । ॐमकारम्—तालुदेशे । ॐहिकारम्—नासिकाग्रे । ॐधिकारम्—नेत्रयोः । ॐयोकारम्—भ्रुवोर्मध्ये । ॐद्वितीययोकारम्—ललाटे । ॐनकारम्—पूर्वमुखे । ॐप्रकारम्—दक्षिणमुखे । ॐचोकारम्—पश्चिममुखे । ॐदकारम्—उत्तरमुखे । ॐयाकारम्—मूर्ध्नि । ॐव्यंजनंतकारम्—व्यापकंसर्वतोन्यसेत् ॥

अथशिरोन्यासाः—ॐआपोगुह्ये । ॐज्योतिश्चक्षुषि । ॐरसोवक्त्रे । ॐअमृतंजानुनि । ॐब्रह्महृदये । ॐभूःपादयोः । ॐभुवः नाभौ । ॐस्वःललाटे । ॐकारम्मूर्ध्नि । अथगायत्र्यावाहनम्—गायत्रींत्र्यक्षरांबालांसाक्षसूत्रकमंडलुम् । रक्तांगींरक्तवस्त्रांचहंसवाहनसंस्थिताम् ॥ ऋग्वेदक्रतोत्संगांचतुर्वक्त्रांचतुर्भुजाम् । ब्रह्माणींब्रह्मदैवत्यांब्रह्मलोकनिवासिनीम् ॥ आवाहयाम्यहंदेवीमायान्तींसूर्यमंडलात् । आगच्छवरदेदेविव्यक्षरेब्रह्मवादिनि ॥ गायत्रिछन्दसांमातर्ब्रह्मयोनिनमोस्तुते ॥ प्राणायामः—प्रणवस्यपरब्रह्मऋषिः-

---

१ प्राणायामैर्विनायद्यत्कृतंकर्मनिरर्थकम् । अतोयत्नेनकर्त्तव्यःप्राणायामःशुभार्थिना ॥ श्रुतिस्मृत्यादिकर्मादौसगर्भःप्राणसंयमः । अगर्भोध्यानमात्रेतुसचामंत्रःप्रकीर्तितः ॥ द्वौद्वौप्रातस्तुमध्याह्नेत्रिस्त्रिःसन्ध्यासुरार्चने । भोजनादौभोजनान्तेप्राणायामास्तुषोडश ॥

परमात्मादेवतागायत्रीछन्दःभूरादिसप्तव्याहृतीनांविश्वामित्रजमदग्नि-भरद्वाजगौतमात्रिवसिष्ठकश्यपाऋषयःअग्निवायुसूर्यबृहस्पतिवरुणेन्द्र-विश्वेदेवादेवताःगायत्र्युष्णिगनुष्टुप्बृहतीपङ्क्तित्रिष्टुप्जगत्यश्छन्दांसि-तत्सवितुरित्यस्यविश्वामित्रऋषिः सवितादेवतागायत्रीछन्दः आपो-ज्योतिरित्यस्यप्रजापतिऋषिः ब्रह्माग्निवायुसूर्यादेवताः यजुश्छन्दः-सर्वेषांप्राणायामेविनियोगः॥ ॐभूःॐभुवःॐस्वःॐमहःॐजनः ॐतपःॐसत्यम्ॐतत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोन-÷प्रचोदयात् ॥ ३५/३ ॥ ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम् ॥ एवंपूरकःकुम्भकःरेचकःक्रमेणत्रिवारंपठेत् ॥ अंबुप्राशनम्—सूर्यश्च-मेत्यस्यनारायणऋषिःसूर्योदेवताअनुष्टुप्छन्दःअम्बुप्राशनेविनियोगः। ॐसूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षन्तांयद्राज्यापा-पमकार्षमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नारात्रिस्तदवलुम्पतु-यात्किञ्चिदुरितंमयिइदमहंाममृतयोनौसूर्येज्योतिषिजुहोमिस्वाहा ॥ एतन्मंत्रेणजलंप्राश्य ॥ तूष्णींद्विराचामेत् ॥

मार्जनम्—ॐआपोहिष्ठामयोभुवः—मस्तके । ॐतानऽऊर्जेदधातन—चरणयोः । ॐमहेरणायचक्षसे—हृदये । ॐयोव÷शिवतमोरसः—हृदये । ॐतस्यभाजयतेहन÷चरणयोः । ॐउशतीरिवमातर÷—मस्तके । ॐतस्माऽअरङ्गमामवः—मस्तके । ॐयस्यक्ष-

---

१ सेसथत्रयमाकाशेववरत्रीणिमस्तके । नकारैस्तुक्षिपेद्भूमावापोहिष्टेतिमार्जनम् ॥ भूमिशब्देनचरणावाकाशंहृदयंस्मृतम् । शिरस्येवशिरःशब्दोमार्जनज्ञैरुदाहृतः ॥

र्यायजिन्वथ—हृदये । ॐआपोजनयथाचन—चरणयोः । इति-
नवभिःपादैः वर्णादिपात्रस्थैर्वामहस्तस्थैर्वाजलैःकुशत्रयेणमार्जयेत् ॥
अपोऽअलावादानम्—सुमित्रियानइत्यस्यप्रजापतिऋषिः आपोदेवता-
अनुष्टुप्छन्दःअम्बुग्रहणेविनियोगः—ॐसुमित्रियान ऽआप ऽओषधयः
सन्तु—इत्यंजलिनाजलमादाय । ॐदुर्मित्रियानइत्यस्यप्रजापतिऋषिः
आपोदेवताअनुष्टुप्छन्दः जलप्रक्षेपेविनियोगः—ॐदुर्म्मित्रियास्तस्मै-
सन्तुयोऽस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ इत्यनेनवामभागेजन्तुहीन-
स्थलेनिक्षिपेत् ॥ अपोवामहस्तेगृहीत्वान्युब्जेनदक्षिणहस्तेनाच्छा-
दनम्—द्रुपदादिवेत्यस्यकोकिलराजपुत्रऋषिःआपोदेवताअनुष्टुप्छन्दः-
जलग्रहणेआच्छादनेचविनियोगःॐद्रुपदादिवमुमुचान?स्विन्न?स्ना-
तोमलादिव ॥ पूतम्पवित्रेणेवाज्यमापः शुन्धन्तुमैनसः ॥ २० ॥
अनेनमंत्रेणजलंवामहस्तेगृहीत्वातंन्युब्जेनदक्षिणहस्तेनाच्छादयेत् ।
अघमर्षणम्—ॐऋतंचसत्यंचेत्यस्याघमर्षणऋषिःभाववृत्तोदेवताअनु-
ष्टुप्छन्दःउदकावघ्राणपूर्वकप्रक्षेपणेविनियोगः ॥ ॐऋतंचसत्यंचाभी-
द्धात्तपसोऽध्यजायत । ततोरात्र्यजायततः समुद्रोऽअर्णवः। समुद्रादर्ण-
वादधिसंवत्सरोऽअजायत । अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ।
सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत् । दिवंचपृथिवींचान्तरिक्षमथोस्वः
॥८४॥ इतिमंत्रेणतदाच्छादितंजलमवघ्राणपूर्वकंवामभागेनिक्षिपेत्॥
अर्घ्यदानम्—प्रणवस्यपरब्रह्मऋषिःपरमात्मादेवतादेवीगायत्रीछन्दः

१ ईषन्नम्रःप्रभातेतुमध्याह्नेऋजुसंस्थितः । द्विजोऽर्घ्यप्रक्षिपेद्व्यासायंतूप-
विशन्भुवि ॥ कराभ्यांतोयमादायगायत्र्याचाभिमंत्रितम् । आदित्याभिमुखस्तिष्ठं-
स्त्रिरूर्ध्वंसन्ध्ययोःक्षिपेत् ॥ सकृदेवतुमध्याह्नेक्षेपणीयंद्विजातिभिः ॥

भूर्भुवःस्वरितिमहाव्याहृतीनांपरमेष्ठीप्रजापतिर्ऋषिः अग्निवायुसूर्यादेवताःगायत्र्युष्णिगनुष्टुप्छन्दांसितत्सवितुरित्यस्यविश्वामित्रऋषिःसवितादेवतागायत्रीछन्दःअर्घ्यदानेविनियोगः—ॐभूर्भुवःस्वःॐतत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ३५/३ ॥ ब्रह्मस्वरूपिणेसूर्यनारायणायनमःइदमर्घ्यंदत्तंनमम ॥ अनेनप्रकारेणसूर्याभिमुखस्तिष्ठन्गन्धाक्षतपुष्पयुक्तानित्रीण्यर्घ्याणिदद्यात् ॥ दत्तार्घ्योदकेनदक्षिणनासाचक्षुःश्रोत्रस्पर्शनंकुर्यात् ॥ ततःदक्षिणहस्तेजलंगृहीत्वा-ॐअसावादित्योब्रह्म—अनेनमंत्रेणआत्मनःसमंतात्प्रदक्षिणवदुदकंक्षिपेत् ॥ सूर्योपस्थानम्—उत्थायस्वस्तिकाकारपाणिःसूर्योदयाभिमुखोवक्ष्यमाणैश्चतुर्भिर्मंत्रैः सूर्यमुपतिष्ठेत्—ॐउद्वयमुदुत्यमितिद्वयोःप्रस्कण्वऋषिः सूर्योदेवताअनुष्टुप्छन्दःचित्रंदेवानामित्यस्यकुत्साङ्गिरसऋषिःसूर्योदेवतात्रिष्टुप्छन्दःतच्चक्षुरित्यस्यदध्यङ्ङाथर्वणऋषिःसूर्योदेवताऽष्णिक्छन्दःसूर्योपस्थानेविनियोगः—ॐउद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम् ॥ २१/२० ॥ ॐउदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः ॥ दृशेविश्वायसूर्य्यम् ॥ ३१/३३ ॥ ॐचित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्य-

---

१ कालातिक्रमेसति—ॐआकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ४/३३ ॥ ब्रह्मस्वरूपिणेसूर्यनारायणायनमःप्रायश्चित्तार्थंइदमर्घ्यंदत्तंनमम ॥ अनेनप्रकारेणचतुर्थार्घ्यंदद्यात् ॥

२ हस्ताभ्यांस्वस्तिकंकृत्वाप्रातस्तिष्ठेद्दिवाकरम् । मध्याह्नेतुऋजूबाहूसायंमुकुलितौकरौ ॥

वरुणस्याग्ने? ॥ आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगत-स्तस्थुषश्च ॥ ४६/१२ ॥ ॐतच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः÷शतञ्जीवेमशरदः÷शतꣳशृणुयामशरदः÷शतम्प्रब्रवामशरदः÷शतमदीनाःस्यामशरदः÷शतम्भूयश्चशरदः÷शतात् ॥ २४/३६ ॥ गायत्र्यावाहनम्—तेजोसीत्यस्यपरमेष्ठीप्रजापतिर्ऋषिःआज्यंदेवताजगतीछन्दःयजुर्गायत्र्यावाहने विनियोगः—ॐतेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि ॥ ३१/१ ॥ गायत्र्युपस्थानम्—तुरीयपदस्यविमलऋषिःपरमात्मादेवतागायत्रीछन्दःगायत्र्युपस्थानेविनियोगः—ॐगायत्र्यस्येकपदीद्विपदीत्रिपदीचतुष्पद्यपद्यसिनहिपद्यसेनमस्तेतुरीयायदर्शतायपदायपरोरजसेसावदोम् ॥ इतिनमस्कृत्य ॥ हस्तेजलमादाय—तत्सवितुरित्यस्यविश्वामित्रऋषिःसवितादेवतागायत्रीछन्दःवायव्यंबीजंचतुर्थंशक्तिःपञ्चविंशतिर्व्यञ्जनानिकीलकंचतुर्थपदंप्रणवोमुखंअग्निर्मुखंब्रह्माशिरःविष्णुर्हृदयंरुद्रःकवचंपरमात्माशरीरंपृथिवीयोनिःप्राणापानव्यानोदानसमानासप्राणाश्चेतवर्णासाङ्ख्यायनसगोत्रा चतुर्विंशत्यक्षराषट्स्वराःसरस्वतीजिह्वापिङ्गाक्षीत्रिपदागायत्रीअशेषपापक्षयार्थेजपेविनियोगः॥ गायत्रीध्यानम्—मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुनिबद्धरत्नमुकुटांतत्त्वार्थवर्णात्मिकाम्।गायत्रींवरदाभयाङ्कुशकशाशुभ्रंकपालंगुणंशङ्खंचक्रमथारविन्दयुगलंहस्तैर्वहन्तींभजे॥ब्रह्मशापविमोचनम्—अस्यश्रीब्रह्मशापविमोचनमंत्रस्यब्रह्माऋषिः भुक्तिमुक्तिप्रदाब्रह्मशापविमोचनीगायत्रीशक्तिर्देवतागायत्रीछन्दः ब्रह्मशापविमोचनार्थेजपेविनियोगः—गायत्रींब्रह्मेत्युपासीतयद्रूपंब्रह्मविदोविदुः । तांपश्य-

न्तिधीराःसुमनसावाचामग्रतः ॥ ॐवेदान्तनाथायविद्महेहिरण्य-गर्भायधीमहितन्नोब्रह्मप्रचोदयात् ॥ ॐदेविगायत्रित्वंब्रह्मशापाद्वि-मुक्ताभव ॥ अस्यश्रीवसिष्ठशापविमोचनमंत्रस्यनिग्रहानुग्रहकर्त्ता-वसिष्ठऋषिः वसिष्ठानुगृहीतागायत्रीशक्तिर्देवताविश्वोद्भवागायत्रीछ-न्दःवसिष्ठशापविमोचनार्थेजपेविनियोगः-ॐसोऽहमर्कमयंज्योतिरा-त्मज्योतिरहंशिवः । आत्मज्योतिरहंशुक्रःसर्वज्योतिरसोस्म्यहम् ॥ इत्युक्त्वायोनिमुद्रांप्रदर्श्यगायत्रीत्रयंपठित्वाॐदेविगायत्रित्वंवसिष्ठ-शापाद्विमुक्ताभव ॥ अस्यश्रीविश्वामित्रशापविमोचनमंत्रस्यनूतनसृ-ष्टिकर्त्ताविश्वामित्रऋषिःविश्वामित्रानुगृहीतागायत्रीशक्तिर्देवतावाग्दे-हागायत्रीछन्दः विश्वामित्रशापविमोचनार्थेजपे विनियोगः-गायत्रीं-भजाम्यग्निमुखींविश्वगर्भांयदुद्भवाः । देवाश्चक्रिरेविश्वसृष्टिंतांकल्या-णीमिष्टकरींप्रपद्ये ॥ यन्मुखान्निःसृतोऽखिलवेदगर्भः ॥ देवि-गायत्रित्वंविश्वामित्रशापाद्विमुक्ताभवं ॥ अथगायत्र्यस्त्रोपाहरणम्-अस्यगायत्र्यस्त्रोपाहरणमंत्रस्यब्रह्मविष्णुमहेश्वराऋषयःऋग्यजुःसामा-निछन्दांसिक्रियामयंवपुःपरात्पराशक्तिर्देवताहंबीजंसंशक्तिः सोऽहं-कीलकंअस्त्रोपसंहरणार्थेजपेविनियोगः-ॐब्रह्मतेजोज्वालामालिनीं देवींह्रांअङ्गुष्ठाभ्यांनमः । ॐविष्णुतेजोज्वालामालिनींदेवींह्रींतर्जनी-भ्यांनमः । ॐरुद्रतेजोज्वालामालिनींह्रूंमध्यमाभ्यांनमः । ॐअग्नि-

---

१ इतिशापविमोचनानिकृताकृतानिक्षेपकानिसन्ति ॥ उक्तंच—शापयुक्ता-तुगायत्रीसफलानकदाचन । शापादुत्तरितासातुमुक्तिमुक्तिफलप्रदा ॥ २ इदं-गायत्र्यस्त्रोपाहरणंक्षेपकंकृताकृतम् ॥

तेजोज्वालामालिनीदेवीह्रैंअनामिकाभ्यांनमः । ॐज्ञानतेजोज्वाला-मालिनीदेवीह्रौंकनिष्ठिकाभ्यांनमः । ॐसत्यंतेजोज्वालामालिनीं-देवीह्रः करतलकरपृष्ठाभ्यांनमः । बहुरूपिणिगायत्रिदिव्येसन्ध्ये-सरस्वति । अजरेअमरेदेविब्रह्मयोनिनमोऽस्तुते ॥ अथजपादौमुद्रा-प्रदर्शनम्—सुमुखंसम्पुटंचैवाविततंविस्तृतंतथा । द्विमुखंत्रिमुखंचैव-चतुःपंचमुखंतथा ॥ षण्मुखाऽधोमुखंचैवव्यापकाञ्जलिकंतथा । शकटंयमपाशंचग्रथितंचोन्मुखोन्मुखम् । प्रलम्बंमुष्टिकंचैवमत्स्यः-कूर्मोवराहकम् । सिंहाक्रान्तंमहाक्रान्तंमुद्गरंपल्लवंतथा । इतिमुद्रां-दर्शयित्वावस्त्रेणाच्छादितांजपमालांगोमुखीवानाभिदेशेधृत्वागायत्रीज-पःकार्यः—प्रणवस्यपरब्रह्मऋषिःपरमात्मादेवतागायत्रीछन्दःव्याहृती-नांप्रजापतिर्ऋषिःअग्निवायुसूर्यादेवताः गायत्रीछन्दः सर्वपापक्षयार्थे-गायत्रीमंत्रजपेविनियोगः—ॐभूर्भुवःस्वः ॐतत्सवितुर्वरेण्यम्भर्गोदे-वस्यधीमहि ॥ धियोयोनः÷प्रचोदयात् ॥ ३५/३ ॥ एवंप्रवालरुद्राक्ष-

---

१ चतुर्विंशतिमुद्राश्चजपादौसंप्रदर्शयेत् । एतामुद्रानजानातिगायत्रीनि-ष्फलाभवेत् ॥ २ वस्त्रेणाच्छाद्यतुकरंदक्षिणंयःसदाजपेत् । तस्यस्यात्स-फलंजाप्यंतद्धीनमफलंस्मृतम् ॥ अतएवजपार्थंसागोमुखीध्रियतेजनैः ॥ यक्ष-रक्षःपिशाचाश्चसिद्धविद्याधरागणाः । यस्मात्प्रभावंगृह्णन्तितस्माद्गुह्यन्तुकारयेत् ॥ ३ प्रातर्नाभौकरंकृत्वामध्याह्नेहृदिसंस्थितम् । सायंजपेच्चनासाग्रेएषजप्यविधिः-स्मृतः ॥ ४ ॐकारंपूर्वमुच्चार्यभूर्भुवःस्वस्तथैवच । गायत्रीप्रणवस्यान्तेजप-एवमुदाहृतः ॥

स्फटिकमौक्तिकादिनिर्मितयामालयांकरमालयावामंत्रार्थध्यायन्मौ-
नीसहस्रंशतंअष्टोत्तरशतंअष्टाविंशतिवारंदशवारंवागायत्रींजपेत् ॥
ततःषडङ्गन्यासान्कुर्यात्–ॐभूःहृदयायनमःॐभुवःशिरसेस्वाहाॐ-
स्वःशिखायैवषट्ॐतत्सवितुर्वरेण्यंकवचायहुम् ॐभर्गोदेवस्यधीम-
हिनेत्रत्रयायवौषट् ॐधियोयोनःप्रचोदयात्अस्त्रायफट् ॥ततःमुद्राप्रद-
र्शनम्–मुरभिर्ज्ञानवैराग्ययोनिःशंखोऽथपङ्कजम् । लिङ्गंनिर्वाणकंचै-
वजपान्तेष्टौप्रदर्शयेत् ॥ ततःसूर्यप्रदक्षिणा–विश्वतश्चक्षुरितिमंत्रस्यावि-
श्वकर्माभौवनऋषिः विश्वकर्मादेवतात्रिष्टुप्छन्दःसूर्यप्रदक्षिणायांविनि-
योगः–ॐविश्वतश्चक्षुरुताविश्वतोमुखोविश्वतोबाहुरुताविश्वतस्पात् ।
सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १५/१७ ॥
सूर्यादिदेवतानांनमस्काराः–एकचक्रइत्यस्यनारायणऋषिःसूर्योदेव-

---

१ अनामामध्यमारभ्यकनिष्ठाद्ययएवच । तर्जनीमूलपर्यंतंदशपर्वसुसंजपेत् ॥ मध्यमादिद्वयंपूर्वजपकालेतुवर्जयेत् । तंवैमेरुंविजानीयात्कथितंब्रह्मणापुरा ॥ मेरु-हीनाचयामालामेरुलंघाचयाभवेत् । अशुद्धप्रतिकाशाचसामालानिष्फलाभवेत् ॥ अरिष्टपत्रंबीजंचशङ्खपद्मौमणिस्तथा । कुशग्रन्थिश्चरुद्राक्षउत्तमंचोत्तरोत्तरम् ॥ प्रवालमुक्तास्फटिकैर्जपःकोटिफलप्रदः । तुलसीमणिभिर्येनगणितंचाक्षयंफलम् ॥ चित्रिणीबिसतन्त्वाभाब्रह्मनाडीगतान्तरा । तयासंग्रथितामालासर्वकामफलप्रदा ॥ २ ध्यायेत्तुमनसामंत्रंजिह्वौष्ठौनविचालयेत् । नकंपयेच्छिरोग्रीवांदंतान्नैवप्रकाशयेत् । ३ उपांशुस्याच्छतगुणःसाहस्रोमानसोजपः ॥ ४ सायंप्रातश्चमध्याह्नेसावि-त्रींवाग्यतोजपेत् । सहस्रपरमांदेवींशतमध्यांदशावराम् ॥ अन्यच्च–अष्टोत्तरशतं नित्यमष्टाविंशतिरेववा । विधिनादशकंवापित्रिकालेषुजपेद्बुधः ॥

ताउष्णिक्छन्दःसूर्यनमस्कारेविनियोगः--एकचक्रोरथोयस्यदिव्यः-
कनकभूषितः । समेभवतुसुप्रीतःपद्महस्तोदिवाकरः ॥ ॐश्रीसूर्या-
यनमः ॐगायत्र्यैनमः ॐसावित्र्यैनमः ॐसन्ध्यायैनमः ॐसर-
स्वत्यैनमःपूर्वेॐइन्द्रायनमः आग्नेय्याम्--ॐअग्नयेनमः दक्षिणस्याम्--
ॐयमायनमः नैर्ऋत्याम्--ॐनिर्ऋतयेनमः पश्चिमे--ॐवरुणायनमः
वायव्याम्--ॐवायवेनमः उत्तरस्याम्--ॐकुबेरायनमः ईशान्याम्--
ॐईश्वरायनमःऊर्ध्वायांॐब्रह्मणेनमःअधोदिशि--ॐअनंतायनमः ॥
जपानिवेदनम्--देवागातुविदइत्यस्यमनसस्पतिर्ऋषिःवातोदेवताविरा-
ट्छन्दःजपानिवेदनेविनियोगः--ॐदेवागातुविदोगातुंवित्त्वागातुमित ।
मनसस्पतऽइमन्देवयज्ञꣳस्वाहावातेधाꣳ ॥ ११ ॥ ॥ जपार्पणम्--अने-
नप्रातःसन्ध्याङ्गभूतेनअमुकसंख्याकेन गायत्रीमंत्रजपाख्येन कर्मणा
श्रीभगवान्ब्रह्मस्वरूपी सूर्यनारायणःप्रीयतांनमम ॥ प्रार्थना--यदक्षर-
पदभ्रष्टंमात्राहीनंतुयद्भवेत् । तत्सर्वं क्षम्यतांदेवि काश्यपप्रियवादिनि ॥
सन्ध्याविसर्जनम्--उत्तरेशिखरेइत्यस्यकश्यपऋषिःसन्ध्यादेवताअनु-
ष्टुप्छन्दः सन्ध्याविसर्जनेविनियोगः--उत्तरेशिखरेदेवि भूम्यांपर्वतम-
स्तके । ब्राह्मणेभ्योविनिर्मुक्तागच्छ देवियथासुखम् ॥ गोत्रप्रवरो-
च्चारणपूर्वकमभिवादनम्--अमुकगोत्रोत्पन्नोऽहं अमुकप्रवरान्वितोऽहं
शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनवाजसनेयशाखाध्यायीअमुकशर्माऽहं
भोआचार्य त्वांअभिवादयामिभोवैश्वानरत्वांअभिवादयामिभोसूर्य-

---

१ स्वस्तिकाकारहस्ताभ्यांकर्णौस्पृष्ट्वास्वस्यनामगोत्रप्रवरोच्चारणपूर्वकंअभिवा-
दयेत् ॥

चन्द्रमसौयुवामभिवादयामिभोयाज्ञवल्क्यत्वामभिवादयामि भोईश्वर त्वामभिवादयामि ॥ ईश्वरस्तुतिः—आकाशात्पतितंतोयंयथागच्छतिसागरम् ॥ सर्वदेवनमस्कारःकेशवंप्रतिगच्छति ॥ यस्यस्मृत्याच नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतांयातिसद्योवन्दे तमच्युतम् ॥ अर्पणम्—अनेनप्रातःसन्ध्योपासनाख्येनकर्मणाभगवान्ब्रह्मस्वरूपीपरमेश्वरःप्रीयतांनमम ॥ ततोद्विराचमनंम्—ॐकेशवायनमःस्वाहाॐनारायणायनमःस्वाहा ॐमाधवायनमःस्वाहा ॥ हस्तप्रक्षालनम्—ॐगोविंदायनमः ॥ ॐविष्णवेनमः ॐविष्णवेनमः ॐविष्णवेनमः ॥ इतिप्रातःसन्ध्याप्रयोगः ॥

पञ्चायतनदेवतास्थापनप्रकारः ।

शिवपंचायतनं.	विष्णुपंचायतनं.	सूर्यपंचायतनं	देवीपंचायतनं.	गणेशपंचायतनं.
विष्णु सूर्य शिव देवी गणेश	शिव गणेश विष्णु देवी सूर्य	शिव गणेश सूर्य देवी विष्णु	विष्णु शिव देवी सूर्य गणेश	विष्णु शिव गणेश देवी सूर्य

१ होमेभोजनकालेचसन्ध्ययोरुभयोरपि । आचान्तःपुनराचामेदन्यत्रापिसकृत्सकृत् ॥ द्विराचम्यततःशुद्धःस्मृत्वाविष्णुंसनातनम् ॥ व्यासः—शिरःप्रावृत्यकण्ठंवामुक्तकच्छशिखोऽपिवा । अकृत्वापादयोःशौचमाचान्तोऽप्यशुचिर्भवेत् ॥ अपःपाणिनखेस्पृष्ट्वाआचामेद्यस्तुवैद्विजः । सुरापानेनतत्तुल्यमित्येवमृषिरब्रवीत् ॥ २ सन्ध्यादेवपूजातर्पणादौधृतंकुशपवित्रंतत्तत्कर्मसंबन्धिजलंतुलसीमूलेपवित्रस्थलेवाविसर्जयेत् ॥ ३ शंभौमध्यगतेहरीनहरभूदेव्योहरौशंकरेभास्येनागसुतारवौहरगणेशाजाम्बिकाःस्थापिताः । देव्यांविष्णुहरैकदन्तरवयोलंबोदरेऽजेश्वरेनार्यांशंकरभागतोऽतिसुखदाव्यस्तास्तुतेहानिदाः ॥

अथशिवपंचायतनपूजाप्रयोगः—प्राङ्मुखोदङ्मुखोवास्वासनेउपविश्यपवित्रपाणिःशिवपंचायतनंपुरतःस्थाप्यवामेकलशंपूजोपचारान्दक्षिणे निधायआचम्यप्राणानायम्य ॐस्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातु ॥ १९/२६ ॥ सुशान्तिर्भवतु । श्रीमन्महागणाधिपतयेनमः । इष्टदेवताभ्योनमः । कुलदेवताभ्योनमः । ग्रामदेवताभ्योनमः । स्थानदेवताभ्योनमः। वाणीहिरण्यगर्भाभ्यांनमः। श्रीलक्ष्मीनारायणाभ्यांनमः । श्रीउमामहेश्वराभ्यांनमः । शचीपुरंदराभ्यांनमः । मातृपितृचरणकमलेभ्योनमः । सर्वेभ्योदेवेभ्योनमः । सर्वेभ्योब्राह्मणेभ्योनमोनमः । निर्विघ्नमस्तु । सुमुखश्चैकदंतश्चकपिलोगजकर्णकः । लम्बोदरश्चविकटोविघ्ननाशोगणाधिपः ॥ धूम्रकेतुर्गणाध्यक्षोभालचन्द्रोगजाननः । द्वादशैतानिनामानियःपठेच्छृणुयादपि॥ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा । संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ शुक्लाम्बरधरंदेवंशशिवर्णंचतुर्भुजम् । प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशान्तये ॥ अभीप्सितार्थसिद्ध्यर्थंपूजितोयःसुरासुरैः । सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः ॥ सर्वमंगलमाङ्गल्येशिवेसर्वार्थसाधिके । शरण्येत्र्यंबके गौरिनारायणिनमोऽस्तुते ॥ सर्वदासर्वकार्येषुनास्तितेषाममंगलम् । येषांहृदिस्थोभगवान्मंगलायतनंहरिः ॥ तदेवलग्नंसुदिनंतदेवतारा-बलंचंद्रबलंतदेव । विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेऽङ्घ्रियुगंस्मरामि ॥ लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः । येषामिन्दीवरश्यामोहृदयस्थोजनार्दनः ॥ यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः ॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम ॥ सर्वेष्वारम्भकार्येषुत्रयस्त्रिभुवनेश्वराः ॥

देवादिशन्तुनःसिद्धिंब्रह्मेशानजनार्दनाः ॥ विनायकंगुरुंभानुंब्रह्म-विष्णुमहेश्वरान् ॥ सरस्वतींप्रणम्यादौसर्वकार्यार्थसिद्धये ॥ सङ्कल्पः—विष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतोमहापुरुषस्यविष्णोराज्ञयाप्रवर्त्तमानस्यअद्यब्रह्मणः द्वितीयेपरार्द्धेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वन्तरेअष्टाविंशतितमेकलियुगेकलिप्रथमचरणेभारतवर्षे (भारतखण्डे) जम्बुद्वीपेरामक्षेत्रेपरशुरामाश्रमेदण्डकारण्यदेशेश्रीगोदावर्याःपश्चिमदिग्भागेश्रीमल्लवणाब्धेरुत्तरेतीरे श्रीशालिवाहनशाकेबौद्धावतारेअस्मिन्वर्तमानेअमुकनामसंवत्सरेअमुकायनेअमुकर्तौअमुकमासेअमुकपक्षेअमुकतिथौअमुकवासरेअमुकनक्षत्रेअमुकराशिस्थिते चंद्रे अमुकराशिस्थितेश्रीसूर्येअमुकराशिस्थिते देवगुरौशेषेषुग्रहेषुयथायथाराशिस्थानस्थितेषुसत्सुएवंगुणविशिष्टायांशुभपुण्यतिथौममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थममऐश्वर्याभिवृद्ध्यर्थम् । अप्राप्तलक्ष्मीप्राप्त्यर्थम् । प्राप्तलक्ष्म्याश्चिरकालसंरक्षणार्थम् । सकलमनईप्सितकामनासंसिद्ध्यर्थम् । लोकेवासभायांराजद्वारेवासर्वत्रयशोविजयलाभादिप्राप्त्यर्थम् । इहजन्मनिजन्मान्तरेवासकलदुरितोपशमनार्थम् ॥ तथाममसभार्यस्यसपुत्रस्य सबान्धवस्य अखिलकुटुम्बसहितस्यसपशोःसमस्तभयव्याधिजरापीडामृत्युपरिहारद्वारा आयुरारोग्यैश्वर्याभिवृद्ध्यर्थम् ॥ तथाममजन्मराशेरखिलकुटुम्बस्यवाजन्मराशेःसकाशाद्येकेचिद्विरुद्धचतुर्थाष्टमद्वादशस्थानस्थितक्रूरग्रहास्तैः सूचितंसूचयिष्यमाणंचयत्सर्वारिष्टंतद्विनाशद्वाराएकादशस्थानस्थितवच्छुभफलप्राप्त्यर्थम् । पुत्रपौत्रादिसन्ततेरविच्छिन्नवृद्ध्यर्थम् । आदित्यादिनवग्रहानुकूलतासिद्ध्यर्थम् । तथाइन्द्रादिदशदिक्पालप्रसन्न-

तासिद्धयर्थम् । आधिदैविकाऽधिभौतिकाऽध्यात्मकत्रिविधतापोपशमनार्थम् । धर्मार्थकाममोक्षफलावाप्त्यर्थंचश्रीशिवपञ्चायतनदेवताप्रीत्यर्थंयथाज्ञानेनयथामिलितोपचारद्रव्यैः ध्यानादिषोडशोपचारैःअन्योपचारैश्चपूजनंमहंकरिष्ये ॥ तत्रादौदिग्रक्षणंकलशाराधनं शङ्खघण्टार्चनंकरिष्ये ॥ वामहस्तेगौरसर्षपान्गृहीत्वा ॥ ॐरक्षोहणोवलगहनंवैष्णवीमिदमहन्तंवलगमुत्किरामियमेनिष्टयोयममात्योनिचखानेदमहन्तंवलगमुत्किरामियम्मेसमानोयमसमानोनिचखानेदमहन्तंवलगमुत्किरामियम्मेसबंधुर्यमसबन्धुर्निचखानेदमहन्तंवलगमुत्किरामियम्मेसजातोयमसजातोनिचखानोत्कृत्याङ्किरामि ॥ २३/८ ॥ रक्षोहणोवोवलगहनऽप्योक्षामिवैष्णवान्त्रक्षोहणोवोवलगहनोवनयामिवैष्णवान्त्रक्षोहणोवोवलगहनोवस्तृणामिवैष्णवान्त्रक्षोहणोवांवलगहनाऽउपदधामिवैष्णवीरक्षोहणोवांवलगहनौपश्यूहामिवैष्णवीवैष्णवमसिवैष्णवास्थ ॥ २५/८ ॥ रक्षसांभागोसिनिरस्तꣳरक्षऽइदमहꣳरक्षोभितिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳरक्षोधमन्तमोनयामि ॥ घृतेनद्यावापृथिवीप्रोर्णुवाथांवायोवेस्तोकानामग्निराज्यस्यवेतुस्वाहास्वाहाकृतेऽऊर्द्धंनभसम्मारुतङ्गच्छतम् ॥ १६/६ ॥ रक्षोहाविश्वचर्षणिरभियोनिमयोहते ॥ द्रोणेसधस्थमासदत् ॥ २६/२६ ॥ अपसर्पन्तुतेभूतायेभूताभूमिसंस्थिताः ॥ येभूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया ॥ अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशम् ॥ सर्वेषामवि-

---

१ योमोहादथवालस्यादकृत्वादेवतार्चनम् । भुंक्तेसयातिनरकंसूकरेष्वभिजायते ॥ अतोऽहरहर्देवपूजाप्रतिपुरुषमावश्यकी । अकरणेप्रत्यवायदर्शनात् ॥

रोधेनपूजाकर्मसमारभे ॥ यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः ॥ स्थानंत्यक्त्वातुतत्सर्वंयत्रस्थंतत्रगच्छतु ॥ भूतप्रेतपिशाचाद्याअपक्रामन्तुराक्षसाः ॥ स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमिभुवंत्विमाम् ॥ भूतानिराक्षसावापिअत्रातिष्ठन्तिकेचन ॥ तेसर्वेप्यपगच्छन्तुपूजाकर्मकरोम्यहम् ॥ एतैर्मंत्रैःसर्वदिक्षुविकिरेत् ॥ वामपादेनभूमिंत्रिवारं ताडयेत् ॥ उदकस्पर्शः ॥ ततःस्ववामभागेपूजार्थजलपूरितकलशार्चनम् ॥ तत्रवरुणावाहनम् ॥ तत्त्वायामीत्यस्यशुनःशेपऋषिः त्रिष्टुप्छन्दःवरुणोदेवतावरुणावाहनेविनियोगः ॥ ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ ४९/१८ ॥ मकरस्थंपाशहस्तमम्भसांपतिमीश्वरम् ॥ आवाहयेप्रतीचीशंवरुणंयादसांपतिम् ॥ ॐभूर्भुवःस्वःअस्मिन्कलशेवरुणंसांगं सपरिवारं सायुधंसशक्तिकंआवाहयामिस्थापयामि ॥ प्रतिष्ठापनम्–ॐमनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोऽइँम्प्रतिष्ठ ॥ १३/२ ॥ ॐवरुणायनमःसुप्रतिष्ठितोवरदो भव ॥ इतिप्रतिष्ठाप्य ॥ ततःॐभूर्भुवःस्वःवरुणायनमःचन्दनंसमर्पयामि ॥ इत्यादिपञ्चोपचारैःसंपूज्यतत्त्वायामीतिपुष्पाञ्जलिंसमर्प्यअनेनपूजनेनवरुणःप्रीयताम् ॥ ततःअनामिकयाकलशंस्पृष्ट्वाअ-

---

१ स्पृशन्त्वनामिकाग्रेणक्वचिदालोकयन्नपि ॥ अनुमंत्रणंसर्वत्रसदैवमभिमंत्रयेत् ॥

भिमंत्रयेत्—कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतत्रस्थितो ब्रह्मा मध्ये मातृगणाःस्मृताः॥ कुक्षौतुसागराःसर्वे सप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ अंगैश्चसहिताःसर्वेकलशांबु-समाश्रिताः । अत्रगायत्रीसावित्रीशान्तिःपुष्टिकरीतथा । आया-न्तुममशान्त्यर्थंदुरितक्षयकारकाः । ततःगायत्र्यादिभ्योनमःइत्यनेन पञ्चोपचारैरभ्यर्च्यकलशंप्रार्थयेत्—देवदानवसंवादेमथ्यमानेमहोदधौ। उत्पन्नोऽसितदाकुम्भविधृतोविष्णुनास्वयम् ॥ त्वत्तोयेसर्वतीर्था-निदेवाःसर्वे त्वयि स्थिताः । त्वयितिष्ठन्तिभूतानित्वयि प्राणाःप्रति-ष्ठिताः॥ शिवःस्वयंत्वमेवासिविष्णुस्त्वंच प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाःसपैतृकाः ॥ त्वयितिष्ठन्तिभूतानियतःकामफलप्रदाः । त्वत्प्रसादादिमांपूजांकर्तुमीहेजलोद्भव ॥ सान्निध्यंकुरुमेदेवप्रसन्नो भवसर्वदा ॥ प्रसन्नोभव ॥ वरदोभव ॥ अङ्कुशमुद्रयासर्वाणितीर्थान्यावाह्य । वंइतिधेनुमुद्रयाअमृतीकृत्यहूंइतिकवचेनावगुण्ठ्यम-स्त्रमुद्रयाऽऽच्छाद्यमूलेनाष्टवारमभिमंत्र्यतस्मादुदकादुदकंगृहीत्वापू-

---

१ दक्षानामासमायुक्तावामहस्तकनिष्ठिका । वामानामासमायुक्तादक्षपाणि-कनिष्ठिका ॥ दक्षस्यमध्यमाक्रान्तावामहस्तस्यतर्जनी । वाममध्यमयाक्रान्ता दक्षहस्तस्यतर्जनी ॥ संयुक्तौकारयेद्विद्वानंगुष्ठावुभयोरपि । धेनुमुद्रानिगदिता गोपितासाधकोत्तमैः ॥ परिवृत्तकरौपश्चात्तर्जनीमध्यमेयुते । कनिष्ठानामिका-ङ्गुष्ठंपरस्परयुतंकुरु ॥ धेनुमुद्रेयमाख्याताअमृतीकरणंभवेत् ॥ २ दक्षपाणेः पृष्ठदेशेवामपाणितलंन्यसेत् । अङ्गुष्ठौचालयेत्सम्यङ्मुद्रेयंमत्स्यरूपिणी ॥ ३ वंवरुणायनमःइत्यनेन ॥

जाद्रव्याणिसंप्रोक्षेत् । तांचभूमिंसंप्रोक्षेत्। पुनःस्वल्पोदकमादायस्वात्मानंस्वशिरश्चसंप्रोक्षेत् ॥ तत्रमंत्रः—अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा । यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्यन्तरःशुचिः ॥ ॐआपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्षसे ॥ ५/१९ ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ ५/१९ ॥ तस्माऽअरङ्गमामवोवस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ ५/१९ ॥ पश्चात्कलशमुद्रांप्रदर्शयेत् ॥ अथदीपपूजनम्—घृतदीपंप्रज्वाल्यनिर्वातस्थलेनिधाय ॥ भो दीपदेवरूपस्त्वंकर्मसाक्षीह्यविघ्नकृत् । यावत्पूजासमाप्तिःस्यात्तावदत्रस्थिरोभव ॥ ॐअग्निर्ज्योतिर्ज्योतिरग्निः स्वाहासूर्य्योज्योतिर्ज्योतिःसूर्य्यःस्वाहा ॥ अग्निर्वर्चोज्योतिर्वर्चःस्वाहासूर्य्योवर्चोज्योतिर्वर्चःस्वाहा ॥ ज्योतिःसूर्य्यःसूर्य्योज्योतिःस्वाहा ॥ ९/३ ॥ ॐभूर्भुवः स्वः दीपस्थदेवतायैनमः आवाहयामिसर्वोपचारार्थेगन्धाक्षतपुष्पाणिसमर्पयामिनमस्करोमि ॥ शङ्खपूजनम्—शङ्खेजलपूरणम् । शङ्खंचन्द्रार्कदैवत्यंवरुणंचाधिदैवतम् । पृष्ठेप्रजापतिंविद्यादग्रेगङ्गासरस्वती ॥ त्रैलोक्येयानितीर्थानिवासुदेवस्यचाज्ञया । शङ्खेतिष्ठन्तिविप्रेन्द्रतस्माच्छङ्खंप्रपूजयेत् ॥ त्वंपुरासागरोत्पन्नोविष्णुनाविधृतःकरे । नमितःसर्वदेवैश्चपाञ्चजन्यनमोस्तुते ॥ पाञ्चजन्यायविद्महेपावमानायधीमहि । तन्नःशङ्खःप्रचोदयात् ॥ ॐअग्निर्ऋषिःपवमानःपाञ्चजन्यःपुरोहितः ॥ तमीमहेमहागयम् ॥ उपया-

---

१ दक्षाङ्गुष्ठंपराङ्गुष्ठे (वामाङ्गुष्ठे) क्षिप्त्वाहस्तद्वयेनच । सावकाशां (मध्यशून्यां) मुष्टिकांचकुर्यात्साकुम्भमुद्रिका ॥

गृह्णीतोरुष्ट्वा येत्वावर्चसऽएषतेयोनिरग्नयेत्वावर्चसे॥ ३ ६॥ ॐभूर्भुवः स्वःशङ्खस्थदेवतायैनमः आवाहयामिसर्वोपचारार्थेगन्धपुष्पाणिसमर्पयामिनमस्करोमि । शङ्खमुद्रांप्रदर्शयेत् । घण्टापूजनम्—आगमार्थंतुदेवानांगमनार्थंतुरक्षसाम् । घण्टानादंप्रकुर्वीतपश्चाद्घण्टांप्रपूजयेत् ॥ ॐसुपर्णोसिगरुत्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ ॥ स्तोमऽआत्माच्छन्दाऽस्यङ्गानियजूँष्यसृषिनाम॥ सामतेतनूर्वामदेव्यंयज्ञायज्ञियम्पुच्छन्धिष्ण्याऽशफा?॥ सुपर्णोसिगरुत्मान्दिवंगच्छस्व ÷पत॥ ४ २॥ ॐभूर्भुवः स्वः घण्टास्थायगरुडायनमः आवाहयामिसर्वोपचारार्थेगन्धाक्षतपुष्पाणिसमर्पयामिनमस्करोमि । गरुडमुद्रांप्रदर्शयेत् । शिवध्यानम्—ध्यायेन्नित्यंमहेशं रजतगिरिनिभंचारुचन्द्रावतंसंरत्नाकल्पोज्ज्वलाङ्गंपरशुमृगवराभीतिहस्तंप्रसन्नम् । पद्मासीनंसमन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववन्द्यंनिखिलभयहरंपञ्चवक्त्रंत्रिनेत्रम् ॥ ॐनमस्तेरुद्रमन्यवऽउतोतऽइषवेनम÷ ॥ बाहुभ्यांमुततेनम÷ ॥ ३ ६॥ विष्णुध्यानम्—शान्ताकारंभुजगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशुभाङ्गम् । लक्ष्मीकान्तंकमलनयनंयोगिभिर्ध्यानगम्यंवन्देविष्णुंभवभयहरंसर्वलोकैकनाथम् ॥ ॐविष्णोरराटमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरंसिविष्णोर्ध्रुवोसि ॥ वैष्णवमसि-

---

१ वामाङ्गुष्ठंतुसङ्गृह्यदक्षिणेनतुमुष्टिना । कृत्वोत्तानंततोमुष्टिंअङ्गुष्ठंतुप्रसारयेत् ॥ वामाङ्गुल्यस्तथाश्लिष्टाःसंयुक्ताःसुप्रसारिताः । दक्षिणाङ्गुष्ठसंस्पृष्टाङ्गेयैषाशङ्खमुद्रिका ॥ २ मिथस्तर्जनिकेश्लिष्टेश्लिष्टावङ्गुष्ठकौतथा । मध्यमानामिकेतुद्वौपक्षाविवविचालयेत् । एषागरुडमुद्रास्याद्विष्णोःसन्तोषवर्धिनी ॥

विष्णवेत्त्वा ॥ २१/८ ॥ सूर्यध्यानम्—ध्येयःसदासवितृमण्डलमध्यवर्ती नारायणःसरसिजासनसन्निविष्टः। केयूरवान्मकरकुण्डलवान्किरीटी हारीहिरण्मयवपुर्धृतशङ्खचक्रः ॥ ॐसूर्य्यैरश्मिर्हरिकेशः पुरस्तात्सविताज्योतिर्ह्रदयाँ२अजस्रम् ॥ तस्यपूषाप्रसवेयातिविद्वान्त्सम्पश्यन्विश्वाभुवनानिगोपाः ॥ ५८/१७ ॥ गणपतिध्यानम्—श्वेताङ्गंश्वेतवस्त्रं सितकुसुमगणैःपूजितंश्वेतगन्धैःक्षीराब्धौरत्नदीपैःसुरनरतिलकंरत्नसिंहासनस्थम् । दोर्भिःपाशाङ्कुशाब्जाभयवरमनसंचन्द्रमौलिंत्रिनेत्रं ध्यायेच्छान्त्यर्थमीशंगणपतिममलंश्रीसमेतंप्रसन्नम्।ॐनमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमोनमःसेनाभ्यः ॥ २५/१६ ॥ देवीध्यानम्—विद्युद्दामसमप्रभांमृगपतिस्कन्धस्थितांभीषणांकन्याभिःकरवालखेटविलसद्धस्ताभिरासेविताम् । हस्तैश्चक्रदरालिखेटविशिखांश्चापंगुणंतर्जनींबिभ्राणामनलात्मिकांशशिधरांदुर्गांत्रिनेत्रांभजे॥ ॐमनसःकामआकूतिंवाचःसत्यमशीय॥ पशूनाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम्मयिस्वाहा ॥ ४/१२ ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःध्यायामि ॥ आवाहनां-

---

१ कुर्यादावाहनंमूर्तौमृन्मय्यांसर्वदैवहि । प्रतिमायांजलेवह्नौनावाहनविसर्जने । शालग्रामार्चनेनैवआवाहनविसर्जने । आवाहनऋचादद्यात्पूर्वंपुष्पाञ्जलिंहरेः । अन्तेपुष्पाञ्जलिंदद्यात्पूजासंपूर्तिहेतवे ॥ आवाहनादिषोडशोपचाराःयथा—आद्ययावाहयेद्देवमृचातुपुरुषोत्तमम् । द्वितीययासनंदद्यात्पाद्यंचैवतृतीयया । अर्घ्यश्चतुर्थ्यादातव्यःपञ्चम्याचमनंतथा । षष्ठ्यास्नानंप्रकुर्वीतसप्तम्यावस्त्रधौतकम् ।

मावेपुष्पाञ्जल्यर्पणम्—ॐसहस्रशीर्षापुरुषꣳसहस्राक्ष?सहस्रपात् ॥ सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १/३१ ॥ आगच्छदेवदेवेश तेजोराशेजगत्पते । क्रियमाणांमयापूजांगृहाणसुरसत्तम ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमः आवाहनाभावेपुष्पाञ्जलिंसमर्पयामि ॥ आसनम्—ॐपुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २/३१ ॥ रम्यं सुशोभनंदिव्यंसर्वसौख्यकरंशुभम् । आसनंचमयादत्तंगृहाणपरमेश्वर ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमः आसनं समर्पयामि ॥ पाद्यम्—ॐएतावानस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३/३१ ॥ उष्णोदकं निर्मलंचसर्वसौगन्ध्यसंयुतम् । पादप्रक्षालनार्थायदत्तंतेप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमः पाद्यंसमर्पयामि ॥ अर्घ्यम्—ॐत्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४/३१ ॥ अर्घ्यंगृहाण देवेशगन्धपुष्पाक्षतैःसह । करुणाकरमेदेवगृहाणार्घ्यंनमोऽस्तुते ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमः अर्घ्यंसमर्पयामि ॥

यज्ञोपवीतंचाष्टम्यानवम्यागन्धमेवच । पुष्पंदेयंदशम्यातुएकादश्याचधूपकम् । द्वादश्यादीपकंदद्यात्रयोदश्यानिवेदनम् । चतुर्दश्यानमस्कारंपञ्चदश्याप्रदक्षिणाः । षोडश्योद्वासनंकुर्याच्छेषकर्माणिपूर्ववत् । तच्चसर्वंजपेद्भूयःपौरुषंसूक्तमेवच ॥ अत्रयजुर्वेदिनश्चतुर्दश्यातुताम्बूलंतथाषोडश्या मन्त्रपुष्पयुक्तनमस्कारःएवंकेचनवदन्तितत्रमूलंमृग्यम् ॥

आचमनम्—ॐततोविराडजायतविराजोऽअधिपूरुषꣳ ॥ सजातोऽ-अत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५/३१ ॥ सर्वतीर्थसमायुक्तंसुगन्धि-निर्मलंजलम् । आचम्यतांमयादत्तंगृहीत्वापरमेश्वर ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमःआचमनीयंसमर्पयामि ॥ स्नानम्—ॐतस्माद्यज्ञात्सर्वहुतꣳसम्भृतम्पृषदाज्यम् ॥ पशूꣳस्ताꣳश्चक्रेवायव्या-नारण्याग्ग्राम्याश्चये ॥ ६/३१ ॥ गङ्गासरस्वतीरेवापयोष्णीनर्मदा-जलैः ॥ स्नापितोऽसिमयादेवतथाशान्तिंकुरुष्वमे ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमःस्नानंसमर्पयामि ॥ एकमन्त्रेणप-ञ्चामृतंस्नानम्—ॐपञ्चनद्य÷सरस्वतीमपियन्तिसस्रोतसꣳ ॥ सरस्व-तीतुपञ्चधासोदेशेभवत्सरित् ॥ ११/३४ ॥ पयोदधिघृतंचैवमधुचशर्क-रायुतम् । पञ्चामृतंमयानीतंस्नानार्थंप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमःएकमन्त्रेणपञ्चामृतस्नानंसमर्पयामि ॥ अथवापृथक्पृथक्मन्त्रेणपञ्चामृतस्नानम् । यथा—पयःस्नानम्—ॐ-पयः÷पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाꣳ ॥ पयस्वतीꣳ प्रदिशः÷सन्तुमह्यम् ॥ ३६/१८ ॥ कामधेनुसमुत्पन्नंसर्वेषांजीवनंपरम् । पावनंयज्ञहेतुश्चपयःस्नानार्थमर्पितम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चा-यतनदेवताभ्योनमःपयःस्नानंसमर्पयामि ॥ पयःस्नानान्तेशुद्धोद-कस्नानंसमर्पयामि ॥ शुद्धोदकस्नानान्तेआचमनीयंसमर्पयामि ॥ दधिस्नानम्—ॐदधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः÷ ॥ सुरभिनोमुखाकरत्प्रणऽआयूꣳषितारिषत् ॥ ३२/३३ ॥ पयसस्तुस-मुद्भूतंमधुराम्लंशशिप्रभम् । दध्यानीतंमयादेवस्नानार्थंप्रतिगृह्य-

१ इदंपञ्चामृतस्नानंतुक्षेपकंकृताकृतमस्ति ।

ताम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःदधिस्नानं-
समर्पयामि ॥ दधिस्नानान्तेशुद्धोदकस्नानंसमर्पयामि ॥ शुद्धो-
दकस्नानान्तेआचमनीयंसमर्पयामि ॥ घृतस्नानम्—ॐघृतंघृ-
तपावानःपिबतवसोवसापावानःपिबतान्तरिक्षस्यहविरसिस्वाहा ॥
दिशःप्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यःस्वाहा ॥ १९/६ ॥ न-
वनीतसमुत्पन्नंसर्वसन्तोषकारकम् । घृतंतुभ्यंप्रदास्यामिस्नानार्थं-
प्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमः-
घृतस्नानंसमर्पयामि ॥ मधुस्नानम्–ॐमधुवाताऽऋतायतेमधुक्षर-
न्तिसिन्धवः ॥ माद्धींर्नःसन्त्वोषधीः ॥ २७/१३ ॥ मधुनक्तमुतो-
षसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ २८/१३ ॥ मधु-
मान्नोवनस्पतिर्मधुमाँ२अस्तुसूर्य्यः ॥ माध्वीर्गावोभवन्तुनः ॥२९/१३॥
तरुपुष्पसमुद्भूतंसुस्वादुमधुरंमधु । तेजःपुष्टिकरंदिव्यंस्नानार्थंप्रति-
गृह्यताम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःमधुस्नानं
समर्पयामि ॥ मधुस्नानान्तेशुद्धोदकस्नानंसमर्पयामि ॥ शुद्धोदक-
स्नानान्तेआचमनीयंसमर्पयामि ॥ शर्करास्नानम्—ॐअपाऽरसमुद्भू-
यसहसूर्य्यस्यन्तःसमाहितम् । अपाऽरसस्ययोरसस्तम्वोगृह्णाम्युत्तम-
मुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्
॥३/६॥ इक्षुसारसमुद्भूताशर्करापुष्टिकारिका ॥ मलापहारिकादिव्या
स्नानार्थंप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्यो
नमःशर्करास्नानंसमर्पयामि ॥ शर्करास्नानान्तेशुद्धोदकस्नानंसमर्प-
यामि ॥ शुद्धोदकस्नानान्तेआचमनीयंसमर्पयामि ॥ गन्धोदकस्नान-
म्—ॐगन्धर्वस्त्वाविश्वावसुःपरिदधातुविश्वस्यारिष्ट्यैयजमानस्य-

परिधिरस्याग्निरिडऽईडित? ॥ ३/२ ॥ मलयाचलसम्भूतंचन्दनागरुसम्भवम् । चन्दनंदेवदेवेशस्नानार्थंप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमःगन्धोदकस्नानंसमर्पयामि ॥ गन्धोदकस्नानान्तेशुद्धोदकस्नानंसमर्पयामि ॥ शुद्धोदकस्नानान्तेआचमनीयंसमर्पयामि ॥ उद्वर्तनस्नानम्—ॐअꣳशुनाꣳतेऽअꣳशु?पृच्यताम्परुषापरुः÷ ॥ गन्धस्तेसोममवतुमदायरसोऽअच्युतꣳ ॥ २७/२० ॥ नानासुगन्धिद्रव्यंचचन्दनंरजनीयुतम् । उद्वर्तनंमयादत्तंस्नानार्थंप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमः उद्वर्तनस्नानं समर्पयामि ॥ उद्वर्तनस्नानान्तेशुद्धोदकस्नानंसमर्पयामि ॥ शुद्धोदकस्नानान्तेआचमनीयंसमर्पयामि ॥ पञ्चामृतादिस्नानाङ्गपूजा— ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःवस्त्रोपवस्त्रार्थेअक्षतान्समर्पयामि ॥ यज्ञोपवीतार्थेअक्षतान्समर्पयामि ॥ गन्धंसमर्पयामि ॥ नानापरिमलसौभाग्यद्रव्याणिसमर्पयामि ॥ यथाऋतुकालोद्भवपुष्पाणिसमर्पयामि ॥ धूपंआघ्रापयामि ॥ दीपंदर्शयामि ॥ शर्करोपहारनैवेद्यम्—ॐप्राणायस्वाहा । ॐअपानायस्वाहा । ॐव्यानायस्वाहा । ॐसमानायस्वाहा । ॐउदानायस्वाहा ॥ नैवेद्यंसमर्पयामि ॥ नैवेद्यान्तेहस्तप्रक्षालनंमुखप्रक्षालनंचसमर्पयामि ॥ करोद्वर्तनार्थेचन्दनं समर्पयामि ॥ मुखवासार्थेपूगीफलताम्बूलंसमर्पयामि ॥ हिरण्यमुद्रादक्षिणांसमर्पयामि ॥ कर्पूरारार्तिक्यंदर्शयामि ॥ प्रदक्षिणाःसमर्पयामि ॥ मन्त्रपुष्पाञ्जलिंसमर्पयामि ॥ प्रार्थनापूर्वकनमस्कारान्समर्पयामि ॥ अनेनयथाशक्त्याध्यानादिपूर्वाराधनकृतेनश्रीशिवपञ्चायतनदेवताःप्रीयन्तांनमम ॥ निर्माल्यंउत्तरेविसृज्यगन्धाक्षतपुष्पाणि

समर्प्य ॥ शालग्रामोपरितुलसीदलंतथाशिवोपरिबिल्वपत्रंसमर्प्य धारापात्रंगन्धादिभिःसंपूज्यपुरुषसूक्तेन पञ्चोदकेनदेवानांमूर्द्धिअभिषेकस्नानंकार्यम्[1] ॥ यथा—ॐसहस्रशीर्षेतिषोडशर्चस्यनारायणपुरुषऋषिःआद्यानांपंचदशानांअनुष्टुप्अंत्यायास्त्रिष्टुप्जगद्बीजपुरुषोदेवता श्रीशिवपञ्चायतनदेवताप्रीत्येअभिषेकेविनियोगः । हरिः ॐसहस्रशीर्षापुरुषःसहस्राक्ष?सहस्रपात् ॥ सभूमिंसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १/३१ ॥ पुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २/३१ ॥ एतावानस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ ३/३१ ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४/३१ ॥ ततोविराडजायतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुर? ॥ ५/३१ ॥ तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ ६/३१ ॥ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे ॥ छन्दाꣳसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ७/३१ ॥ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ ८/३१ ॥ तंयज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रत? ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९/३१ ॥ यत्पुरुषंव्यदधुःकति-

---

१ अत्रसंभवेसाङ्गरुद्रेणरुद्रैकादशिन्यामहिम्नस्तोत्रेणवाभिषेकःकार्यः ।

२ स्नानेधूपेचदीपेचघंटादेर्नादमाचरेत् ॥ प्रतिमापट्टयंत्राणांनित्यंस्नानंनकारयेत् । कारयेत्पर्वदिवसेयथामलनिवारणम् ॥

धाऽअकल्पयन् ॥ मुखऽइमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते॥ १०/३१॥
ब्राह्मणोस्यमुखमासीद्बाहूराजन्यऽकृत? ॥ ऊरूतदस्यय्द्वैश्यऽपद्भ्याꣳशूद्रोऽअजायत ॥ ११/३१ ॥ चन्द्रमामनसोजातश्चक्षोꣳसूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२/३१ ॥ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौ?समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशꣳश्रोत्रात्तथालोकाँ२ऽअकल्पयन् ॥ १३/३१ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यंग्रीष्मऽइध्म?शरद्धवि? ॥ १४/३१ ॥ सप्तास्यासन्परिधयस्त्रि?सप्तसमिधऽकृता? ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५/३१ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणि प्रथमान्यासन् ॥ तेहनाकम्महिमानऽसचन्तयत्रपूर्वेसाद्धया?सन्तिदेवा? ॥ १६/३१ ॥ एवमेकतन्त्रेणाभिषिच्यशङ्खपूरितोदकेनशालग्रामंस्नापयेत् ॥ तत्रमन्त्रः—ॐइदंविष्णुर्विचक्रमेत्रेधानिदधे पदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ १७/५ ॥ पश्चात्पञ्चायतनदेवानामुपरिशान्त्यभिषेकंकुर्यात् ॥ तत्रमन्त्राः—ॐद्यौ?शान्तिरन्तरिक्षꣳशान्तिऽपृथिवीशान्तिरापऽशान्तिरोषधयऽशान्तिऽ॥ वनस्पतयऽशान्तिर्विश्वेदेवाऽशान्तिर्ब्रह्मशान्तिꣳसर्व्वꣳशान्तिऽशान्तिरेवशान्तिऽसामाशान्तिरेधि ॥ १७/३६ ॥ यतोयतꣳसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नऽकुरुप्रजाभ्योभयन्नꣳपशुभ्यऽ ॥ २२/३६ ॥ ॐसर्वेषांवाऽएषवेदानाꣳरसोयत्सामसर्वेषामेवैनमेतद्वेदानाꣳरसेनाभिषिञ्चति ॥ ब्रा० मं० ॥ ॐशान्तिःशान्तिःसुशान्तिर्भवतुसर्वारिष्टशान्तिर्भवतु । ॐअमृताभिषेकोऽस्तु । ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःअभिषेकस्नानंसमर्पयामि । अभिषेकस्नानान्तेशुद्धोदकस्ना-

नम्—ॐशुद्धवालꣳसर्वशुद्धवालोमणिवालस्तऽआश्विना? श्येत÷ श्येताक्षोरुणस्तेरुद्रायपशुपतयेकर्णयामाऽअवलिप्तीरौद्रानमोरूपा꣡-पार्ज्जन्या? ॥ ३/२४ ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्यो नमःशुद्धोदकस्नानंसमर्पयामि । शुद्धोदकस्नानान्तेआचमनीयंसमर्प-यामि । पश्चाद्देवतीर्थं (चरणोदकं) धृत्वाशिवस्यासनार्थंबिल्वपत्रं शालग्रामस्यासनार्थं तुलसीदलंचनिधायदेवान्वस्त्रेणप्रमृज्यगन्धानु-लेपनपूर्वकंस्वस्थानेस्थापयेत् ॥ वस्त्रम्—ॐतस्म्माद्यज्ञात्सर्व्वहुतऽऋ-चꣳसामानिजज्ञिरे ॥ छन्दाꣳसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७/३९ ॥ सर्वभूषाधिकेसौ [illegible] ॥ मयोपपादिते तुभ्यंवाससीप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवता-भ्योनमःवस्त्रं (वस्त्राभावेऽक्षतान्) समर्पयामि । वस्त्रान्तेआचमनीयं समर्पयामि । सोत्तरीयंयज्ञोपवीतम्—ॐतस्म्मादश्वाऽअजायन्तयेके-चोभयादतः ॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः÷ ॥ ६/१९ ॥ नवभिस्तन्तुभिर्युक्तंत्रिगुणंदेवतामयम् ॥ ब्रह्मसूत्रंसोत्तरीयंगृहाण परमेश्वर ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःसोत्त-रीयंयज्ञोपवीतं (तदभावेऽक्षतान्) समर्पयामि । तदन्तेआचमनीयं समर्पयामि । गन्धम्—ॐतंयज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रत? ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ३१/९ ॥ श्रीखण्डंचन्दनंदि-व्यंगन्धाढ्यंसुमनोहरम् । विलेपनंसुरश्रेष्ठचन्दनंप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमः गन्धंसमर्पयामि ॥

---

१ स्नानेवस्त्रेचनैवेद्येदद्यादाचमनंतथा । चकाराद्यज्ञोपवीतान्तेपिदद्यात ॥

अक्षंताः—ॐअक्षन्नमींमदन्तह्यवप्रियाऽअधूषत ॥ अस्तोषतस्वभा-नवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥ ५१/३ ॥ अक्षताश्चसुर-श्रेष्ठकुङ्कुमाक्ताःसुशोभिताः । मयानिवेदिताभक्त्यागृहाणपरमेश्वर ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःअक्षतान्समर्पयामि ॥ पुष्पाणि—ॐयत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् । मुखङ्किमस्यासी-त्किम्बाहूकिमूरूपादाऽउच्येते ॥ १०/३१ ॥ माल्यादीनिसुगन्धीनिमाल-त्यादीनिवैप्रभो । मयानीतानिपुष्पाणिगृहाणपरमेश्वर ॥ ॐभूर्भुवः स्वःश्रीशिवपञ्चायतनदेवताभ्योनमःपुष्पाणिसमर्पयामि ॥ शङ्कराय बिल्वदलार्पणम्—ॐशिवोभवप्रजाभ्योमानुषीभ्यस्त्वमङ्गिरः । माद्यावापृथिवीऽअभिशोचीर्मान्तरिक्षम्मावनस्पतीन् ॥ ४५/११ ॥ त्रिदलंत्रिगुणाकारंत्रिनेत्रंचत्रियायुधम् ॥ त्रिजन्मपापसंहारमेकबि-ल्वंशिवार्पणम् ॥ ॐभूर्भुवःस्वःश्रीसाम्बसदाशिवायनमःबिल्वप-त्राणिसमर्पयामि । विष्णवेतुलसीदलार्पणम्—ॐविष्णोःकर्म्माणि-पश्यतयतोव्रतानिपस्पशे । इन्द्रस्ययुज्यःसखा ॥ ३३/१३ ॥ तुलसींहेम-रूपांचरत्नरूपांचमञ्जरीम् । भवमोक्षप्रदांतुभ्यमर्पयामिहरिप्रियाम् ॥ ॐभूर्भुवःस्वःश्रीमहाविष्णवेनमःतुलसीदलानिसमर्पयामि । सूर्या-यपुष्पार्पणम्—ॐसवितास्त्वासवानाँसुवतामग्निर्गृहपतीनाँसो-मोवनस्पतीनाम् । बृहस्पतिर्वाचऽइन्द्रोज्यैष्ठ्यायरुद्रःपशुभ्यो-मित्रःसत्योवरुणोधर्म्मपतीनाम् ॥ ३९/९ ॥ भानोदिवाकरादित्यमार्त-

---

१ अक्षतैर्नार्चयेद्विष्णुंनतुलस्यागणाधिपम् । नदूर्वयायजेद्देवींबिल्वपत्रैश्चभा-स्करम् ॥ २ शक्तौसत्यांअत्रैवाष्टोत्तरशतसहस्रान्यतमसंख्यबिल्वाद्यर्पणंकार्यम् ॥

ण्डजगतांपते । अर्घानिधेजगद्रक्षभूतभावनभास्कर ॥प्रणतार्तिहरादित्य विश्वचिन्तामणेविभो । विष्णोहंसादिभूतेशपुष्पाणिप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वःश्रीसूर्यायनमःपुष्पाणिसमर्पयामि॥ गणेशायदूर्वाङ्कुरार्पणम्—ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥ २०/१३ ॥ विष्ण्वादिसर्वदेवानांदूर्वेत्वंप्रीतिदासदा ॥ क्षीरसागरसम्भूतेवंशवृद्धिकरीभव ॥ ॐभूर्भुवःस्वः श्रीगणेशायनमःदूर्वाङ्कुरान्समर्पयामि ॥ देव्यैपुष्पार्पणम्—ॐसमक्ष्येदेष्याधियासन्दक्षिणयोरुचक्षसा ॥ मामऽआयुःप्रमोषीर्मोऽअहन्तवंवीरंविदेयतवंदेविसन्दृशि ॥ २३/४ ॥ सेवन्तिकाबकुलचम्पकपाटलाब्जैःपुन्नागजातिकरवीररसालपुष्पैः । बिल्वप्रवालतुलसीदलमालतीभिस्त्वांपूजयामिजगदीश्वरिमेप्रसीद ॥ ॐभूर्भुवः स्वः श्रीदेव्यैनमःपुष्पाणिसमर्पयामि॥ सौभाग्यद्रव्याणि—ॐअहिरिवभोगःपर्येतिबाहुञ्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्वाव्ययुनानिविद्वान्पुमान्पुमाꣳसम्परिपातुविश्वतः÷ ॥ ५१/३६ ॥ अबीरंचगुलालं चचुवाचन्दनमेवच । नानाविधप्रकारेणमीयतांपरमेश्वर ॥ ॐभूर्भुवः स्वःश्रीशिवपञ्चायतनदेवताभ्योनमःसौभाग्यद्रव्याणिसमर्पयामि ॥ धूपम्—ॐब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वैश्यः÷पद्भ्याꣳशूद्रोऽअजायत ॥ ११/३१ ॥ वनस्पतिरसोद्भूतोगन्धाढ्योगन्धउत्तमः । आघ्रेयःसर्वदेवानांधूपोऽयंप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःधूपमाघ्रापयामि॥ दीपम्—ॐचन्द्रमामनसोजातश्चक्षोःसूर्योऽअजायत ॥ श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत ॥ १२/३१ ॥ आज्यंचवर्तिसंयुक्तंवह्निनायोजितं

मया । दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःदीपंदर्शयामि ॥ नैवेद्यम्–ॐनाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौ?समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशꣳश्रोत्रात्तथालोकाँ२ऽअकल्पयन् ॥ ३ १ २ ॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितम् ॥ भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यताम् ॥ गायत्रीमंत्रेणतुलसीदलेनसंप्रोक्ष्यतत्तुलसीदलं नैवेद्योपरिनिधायअस्त्रेणसंरक्ष्य धेनुमुद्रयाअमृतीकृत्यग्रासमुद्रया ॐप्राणायस्वाहा । ॐअपानायस्वाहा । ॐव्यानायस्वाहा । ॐउदानायस्वाहा । ॐसमानायस्वाहा । ॐभूर्भुवःस्वः श्रीशिवपञ्चायतनदेवताभ्योनमः नैवेद्यंसमर्पयामि ॥ पूर्वापोशनंसमर्पयामि ॥ नैवेद्यमध्येपानीयम्–एलोशीरलवङ्गादिकर्पूरपरिवासितम् । प्राशनार्थंकृतंतोयंगृहाणपरमेश्वर ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःमध्येपानीयंसमर्पयामि ॥ उत्तरापोशनंसमर्पयामि॥ हस्तप्रक्षालनंसमर्पयामि ॥ मुखप्रक्षालनंसमर्पयामि ॥ आचमनीयंसमर्पयामि ॥ करोद्वर्तनार्थंगन्धंसमर्पयामि ॥

---

१ तुलसीगन्धपुष्पैश्चसम्पूज्यान्नंहरेःप्रियम् । सम्प्रोक्ष्यार्घ्यजलेनैवसंरक्ष्यास्त्रेणसर्वदा । धेनुमुद्रांप्रदर्श्याथततोदेवंनिवेदयेत् ॥ २ परिवृत्तकरौपश्चात्तर्जनीमध्यमेयुते । कनिष्ठानामिकाङ्गुष्ठंपरस्परयुतंकुरु । धेनुमुद्रेयमाख्याताअमृतीकरणंभवेत् ॥ ३ अङ्गुल्यःकुटिलीभूताविरलाग्राःपरस्परम् । ग्रासमुद्रा समाख्यातासव्यपाणौनियोजिता ॥ ४ वैश्वदेवंपुराकृत्वानिवेद्येचाभ्युदेयेतथा । स्वाभीष्टदेवतादिभ्योनैवेद्यंचनिवेदयेत् । अकृत्वावैश्वदेवंतुनैवेद्ययोनिवेदयेत् । तदन्नंनचगृह्णन्तिदेवविष्ण्वादयोध्रुवम् ॥

मुखवासार्थेताम्बूलम्—ॐउतस्माास्यद्रवंतस्तुरण्यत?पूर्ण्णन्नवेरनुवाति प्रगर्द्धिनं÷ ॥ श्येनस्येवद्रुजतोऽअङ्कसम्परिदधिक्राण्ण÷सहोर्ज्जातरित्रतऽस्त्वाहा ॥ १५ ॥ पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतम् एलादिचूर्णसंयुक्तंताम्बूलंप्रतिगृह्यताम् ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःताम्बूलंसमर्पयामि ॥ फलम्—ॐया?फलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥ १५ ॥ इदंफलंमयादेवस्थापितंपुरतस्तव । तेनमेसुफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःफलंसमर्पयामि ॥ दक्षिणा—ॐयद्वत्तंच्यत्परादानंच्यत्पूर्त्तंच्याश्चदक्षिणाः ॥ तद्ग्निर्वैश्वकर्म्मण?स्वर्देवेषुनोदधत् ॥ १५ ॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः ॥ अनन्तपुण्यफलदमतःशान्तिप्रयच्छमे ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमः सुवर्णपुष्पदक्षिणांसमर्पयामि ॥ कर्पूरारार्तिक्यम्—ज्वालामालिन्यै नमःगन्धाक्षतपुष्पाणिसमर्पयामि ॥ ॐआरात्रिपार्थिवꣳरज÷पितुरप्रायिधामभिः ॥ दिव?सदाꣳसिबृहतीविर्तिष्ठस्ऽआत्वेषंवर्त्ततेतमः÷ ॥ ३२ ॥ कदलीगर्भसम्भूतंकर्पूरंचप्रदीपितम् । आरार्तिक्यमहंकुर्वेपश्यमेवरदोभव ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःकर्पूरारार्तिक्यंदर्शयामि ॥ प्रदक्षिणा—ॐसप्तास्यासन्परिधयस्त्रि?सप्तसमिधःकृता? ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यानिकानिचपापानिजन्मान्तरकृतानिच । तानिसर्वाणिनश्यन्तुप्रदक्षिणपदेपदे ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःप्रदक्षिणांसमर्पयामि ॥ मन्त्रपुष्पाञ्जलिः—अञ्जलौपुष्पाण्या-

दायतिष्ठन् ॥ हारिं÷ॐगणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वा-
प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेवसोमम ॥ आह-
मजानिगर्भधमात्वमजासिगर्भधम् ॥ १९/२३ ॥ श्रीश्चतेलक्ष्मीश्चप-
त्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामु-
म्मऽइषाणसर्वलोकम्मऽइषाण ॥ ३२/३५ ॥ अम्बेऽअम्बिकेम्बालिकेनमा-
नयतिकश्चन ॥ ससस्त्यश्वक?सुभद्रिकाङ्काम्पीलवासिनीम् ॥ १८/३३ ॥
तन्तऽएतमनुजोषम्भराम्येषनेत्वदपचेतयाताऽअग्ने?प्रियम्पाथोपी-
तम् ॥ १७/२ ॥ सऽस्रवभागास्त्येषाबृहन्त÷प्रस्तरेष्ठा?परिधेयाश्चदेवा?॥
॥ १/२ ॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥
कविꣳसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवा? ॥ २४/३७ ॥
प्रोह्यमाणꣳसोमऽआगतोवरुणऽआसन्द्यामासन्नोग्निरागन्नीन्द्रऽइन्द्रो-
हविर्द्धानेथर्वोपावाहियमाणोविश्वेदेवा?॥ ५६/८ ॥ विश्वेदेवाऽअद्दशुषु-
न्युग्नोविष्णुराप्तीपाऽआप्त्याश्वमानोषम?सूयमानोविष्णुं÷सम्भ्र
यमाणोद्वायु?पूयमान?शुक्र?पूत?शुक्र?क्षीरश्रीर्म्मन्थीसक्तुश्रीः
विश्वेदेवा? ॥ ५७/८ ॥ पितेवैधिसूनवऽआसुशेवास्वावेशात्त्वासांविशः
स्वाश्विनाद्युर्ष्णूसादयतामिहत्वा ॥ ३/१४ ॥ पृथिव्या?पुरीषमस्यप्सो-
नामतान्त्वाविश्वेऽअभिगृणन्तुदेवा? ॥ ४/१४ ॥ षोडशीस्तोमऽओ-
जोद्रविणश्चतुश्चत्वारिꣳशस्तोमोवर्चोद्रविणम् ॥ अग्ने?पुरीषमस्यप्सो-
नामतान्त्वाविश्वेऽअभिगृणन्तुदेवा? ॥ ३/१५ ॥ समिद्धेऽअग्नावधि-
मामहानऽउक्थपत्रऽईड्यो?गृभीत? ॥ तप्तङ्घर्म्मम्परिगृह्यायजन्तो-

र्ज्जायज्ञमयं॰न्तदेवा? ॥ ५५/२७ ॥ यस्येमा?प्रदिशोयस्यबाहूकस्मै-देवायहविषाविधेम ॥ १२/२८ ॥ यऽआत्मदाबलदायस्यविश्वऽउपा-सतेप्रशिषंयस्यदेवा? ॥ १३/२९ ॥ अनागास्त्वन्नोऽअदितिःकृणोतुक्ष-त्रन्नोऽअश्व्यांवनताꣳहविष्मान् ॥ ४५/३० ॥ इमानुकम्भुवनासीषधामे-न्द्रश्चविश्वेचदेवा? ॥ ४६/३१ ॥ बृहस्पतेसवितर्बोधयैनꣳसꣳशितञ्चि-त्सन्तराꣳसꣳशिशाधि ॥ वर्द्धयैनम्महतेसौभगायविश्वऽएनमनुम-दन्तुदेवा? ॥ ८/३७ ॥ प्रजापतेस्तपसावावृधान?सद्योजातोदधिषे यज्ञमग्ने ॥ स्वाहाकृतेनहविषापुरोगायाहिसाद्धयाहविरदन्तुदेवा?११/३९॥ सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगा? ॥ अस्यहोतुः॰ प्रदिशृतस्यवाचिस्वाहाकृतꣳहविरदन्तुदेवा? ॥ ३६/३९ ॥ अस्मेहद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ य?शꣳसंतेस्तुवतेधा-यिपज्रऽइन्द्रज्येष्ठाऽअस्माँ२अवन्तुदेवा? ॥ ५०/३३ ॥ नहिस्प-शमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्ने? ॥ एमेनमवृधन्नमृता-अमर्त्यंवैश्वानरङ्क्षत्रजित्यायदेवा? ॥ ६०/३३ ॥ यज्ञेनयज्ञमयजन्तदे-वास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकंम्महिमानः॰सचन्तय-त्रपूर्वेसाद्धया?सन्तिदेवा? ॥ १६/३९ ॥ राजाधिराजायप्रसह्यसाहिने । नमोवयंवैश्रवणायकुर्महे । समेकामान्कामकामायमह्यं । कामेश्वरो-वैश्रवणोददातु । कुबेरायवैश्रवणाय । महाराजायनमः॥ ॐस्वस्ति । साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमाधिपत्यम-यंसमन्तपर्यायीस्यात्सार्वभौमः सार्वायुषआन्तादापरार्धात् पृथिव्यै-समुद्रपर्यन्तायाएकराडितितदप्येषश्लोकोऽभिगीतोमरुतः परिवेष्टारो-मरुत्तस्यावसन्गृहे । आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासदइति ॥

ॐविश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ॥ सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १७/१८ ॥
ॐभूर्भुवः स्वः श्रीशिवपञ्चायतनदेवताभ्योनमःमन्त्रपुष्पाञ्जलिंसमर्पयामि ॥ प्रार्थनापूर्वकनमस्कारः—ॐयत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मःशरद्धविः ॥ १४/१५ ॥
गिरीशंगणेशंगलेनीलवर्णंगवेन्द्राधिरूढंगुणातीतरूपम् ॥ भवंभास्वरंभस्मनाभूषितांगंभवानीकलत्रंभजेपञ्चवक्त्रम् ॥ १ ॥ योगेनसिद्धविबुधैःपरिभाव्यमानं लक्ष्म्यालयंतुलसिकाचितभक्तभृंगम् ॥ मोत्तुंगरक्तनखरांगुलिपत्रचित्रंगंगारसंहरिपदाम्बुजमाश्रयेऽहम् ॥२॥ उदयगिरिमुपेतंभास्करंपद्महस्तंनिखिलभुवननेत्ररत्नरत्नोपमेयम् ॥

---

१ अत्रावसरेकेचनपार्षदपूजांकुर्वन्तितद्यथा—बाणरावणचण्डाश्वनन्दीभृङ्गिरिटादयः । सदाशिवप्रसादंतेसर्वेगृह्णन्तुशाम्भवाः ॥ ॐभूर्भुवःस्वःश्रीशिवपार्षदगणेभ्योनमःगन्धाक्षतपुष्पाणिसमर्पयामिनमस्करोमि ॥ विष्वक्सेनोद्धवाक्रूराःसनकाद्याःशुकादयः । महाविष्णुप्रसादंतेसर्वेगृह्णन्तुवैष्णवाः ॥ ॐभूर्भुवःस्वःश्रीविष्णुपार्षदगणेभ्योनमःगन्धाक्षतपुष्पाणिसमर्पयामिनमस्करोमि ॥ माठरःपिङ्गलोदण्डश्चंडांशोःपारिपार्श्वकाः । प्रभाकरप्रसादंतेसर्वेगृह्णन्तुपार्षदाः ॥ ॐभूर्भुवःस्वःश्रीसूर्यपार्षदगणेभ्योनमःगन्धाक्षतपुष्पाणिसमर्पयामिनमस्करोमि ॥ गणाधीगालवश्चैवमुद्गलश्चसुधाकरः । गणेशस्यप्रसादंवैसर्वेगृह्णन्तुगाणपाः ॥ ॐभूर्भुवःस्वःश्रीगणेशपार्षदगणेभ्योनमःगन्धाक्षतपुष्पाणिसमर्पयामिनमस्करोमि ॥ शक्तिरुच्छिष्टचाण्डालीगणेशःसविताशशी । महादेवीप्रसादंतेसर्वेगृह्णन्तुपार्षदाः ॥ ॐभूर्भुवःस्वःश्रीदेवीपार्षदगणेभ्योनमःगन्धाक्षतपुष्पाणिसमर्पयामिनमस्करोमि ॥

तिमिरकरिमृगेन्द्रंबोधकंपद्मिनीनांसुरवरमभिवन्दे सुन्दरंविश्ववन्द्यम् ॥ ३ ॥ निजैरौषधीस्तर्पयन्तंकराद्यैःसुरौघान्कलाभिःसुधास्राविणीभिः ॥ दिनेशांशुसंतापहारंद्विजेशंशशाङ्कस्वरूपंगणेशंनमामः ॥ ४ ॥ स्वभक्तवत्सलेऽनघेसदापवर्गभोगदेदरिद्रदुःखहारिणित्रिलोकशंकरीश्वरि ॥ भवानिभीमअम्बिकेप्रचण्डतेजउज्ज्वलेभुजाकलापमंडितेनमोस्तुतेमहेश्वरि ॥ ५ ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमःप्रार्थनापूर्वकनमस्कारंसमर्पयामि ॥ पूजितदेवतानां यथाशक्ति जपं कृत्वा ॥ राजोपचाराः—छत्रंचचामरंचैवव्यजनंदर्पणं तथा ॥ पादुकानिचसर्वाणिगृह्यतांपरमेश्वर ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चायतनदेवताभ्योनमः राजोपचारान्समर्पयामि ॥ विशेषार्घः—रक्षरक्षमहादेवरक्षत्रैलोक्यरक्षक। भक्तानामभयं कर्तात्राताभवभवार्णवात् ॥ वरदत्वंवरंदेहिवाञ्छितंवाच्छितार्थद । अनेनसफलार्घ्येणफलदोऽस्तुसदामम ॥ ॐभूर्भुवःस्वःश्रीशिवपञ्चातनदेवताभ्योनमः विशेषार्घ्यंसमर्पयामि ॥ क्षमापनम्—आवाहनंनजानामिनजानामि तवार्चनम् ॥ पूजांचैवनजानामिक्षमस्वपरमेश्वर ॥ १ ॥ अन्यथाशरणं नास्तित्वमेवशरणंमम ॥ तस्मात्कारुण्यभावेनरक्षस्वपरमेश्वर ॥ २ ॥ भूमौचलितपादानांभूमिरेवावलम्बनम् ॥ त्वयिजातापराधानांत्वमेवशरणंमम ॥ ३ ॥ मत्समोनास्तिपापिष्ठस्त्वत्समोनास्तिपापहा ॥ इतिमत्वादयासिन्धोयथेच्छसितथाकुरु ॥ ४ ॥ गतंपापंगतंदुःखंगतंदारिद्र्यमेवच ॥ आगतासुखसंपत्तिःपुण्योहंतवदर्शनात् ॥ ५ ॥

---

१ अनेनमंत्रेणपूगीफलहिरण्यगन्धाक्षतपुष्पसंयुक्तजलेनअर्घ्यमेकंदद्यात् ॥

मंत्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर ॥ यत्पूजितंमयादेवपरिपूर्णं तदस्तुमे ॥ ६ ॥ यदक्षरपदभ्रष्टंमात्राहीनंचयद्भवेत् ॥ तत्सर्वं क्षम्यतांदेवप्रसीदपरमेश्वर ॥ ७ ॥ अपराधसहस्राणिक्रियन्तेहर्निशं मया ॥ दासोयमितिमांज्ञात्वाक्षमस्वपरमेश्वर ॥ ८ ॥ अर्पणम्—अनेनावाहनासनपाद्यार्घ्याचमनीयस्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणानमस्कारप्रदक्षिणामंत्रपुष्परूपैःषोडशोपचारैः अन्योपचारैश्चयथाज्ञानेनयथामिलितोपचारद्रव्यैः कृतपूजनेनश्रीशिवपञ्चायतनदेवताःप्रीयन्तांनमम ॥ ॐतत्सद्ब्रह्मार्पणमस्तु ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु ॥ न्यूनंसंपूर्णतांयातिसद्योवन्देतमच्युतम् ॥ ॐविष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ जलपूरितशङ्खभ्रामणम्—शङ्खमध्येस्थितंतोयंभ्रामितंकेशवोपरि ॥ अङ्गलग्नंमनुष्याणांब्रह्महत्यांव्यपोहति ॥ इत्युक्त्वाशङ्खंदेवोपरिभ्रामयित्वातस्योदकेनस्वशरीरंमार्जयेत् ॥ तीर्थग्रहणम्—अकालमृत्युहरणंब्रह्महत्यादिनाशनम् ॥ सुरपादोदकंपुण्यंपिबाम्यायुर्विवर्धनम् ॥ इतिमंत्रेणदेवतीर्थंपीत्वादेवनिर्माल्यंगृहीत्वादक्षिणनासावघ्राणंकृत्वाशिरसिधारयेत् ॥ इतिशिवपञ्चायतनपूजा ॥

॥ १४ ॥ अथमध्याह्नसन्ध्याप्रयोगः ॥

मध्याह्नस्नानंयथावत्कृत्वाधौतेवाससीपरिधायदर्भासनेप्राङ्मुख—

---

१ अध्यर्धयामादासायंसंध्यामाध्याह्निकीष्यते ॥ इतिधर्मसिंधुवचनाद्व दशघटीदिनोत्तरंमध्याह्नसन्ध्याविहिता । २ चतुर्थेचदिवाभागेस्नानार्थंमृदमाहरेत् । तिलपुष्पकुशाश्चैश्चस्नायाच्चाक्लृप्तिमेजले ॥

उदङ्मुखोवाउपविश्यततः क्रमेणपवित्रधारणं आचमनं प्राणायाम-मन्धमिश्रितभस्मधारणं शिखाबन्धनं रुद्राक्षमालाधारणं पवित्रकरण-च प्रातःसन्ध्यावत्कुर्यात् ॥ अथसङ्कल्पः—विष्णुर्विष्णुर्विष्णुःश्रीम-द्भगवतोमहापुरुषस्य० शुभपुण्यतिथौ ममोपात्तदुरितक्षयपूर्वकब्रह्म-वर्चसकामार्थं श्रीपरमेश्वरप्रीतये मध्याह्नसन्ध्योपासनमहं करिष्ये ॥ इतिसङ्कल्प्य भूमिप्रार्थनाभूतशुद्धिः अभिषेचनंव्याहृतिपूर्वकगायत्री-करन्यासाः व्याहृतिपूर्वकगायत्रीषडङ्गन्यासाः प्रणवन्यासाः गायत्र्य-क्षरन्यासाःशिरोन्यासाश्चक्रमेणप्रातःसन्ध्यावद्विधायततः सावित्र्या-वाहनम्—सावित्रींयुवतींशुक्लांशुक्लवस्त्रांत्रिलोचनाम् । यजुर्वेदकृतोत्स-ङ्गांवृषारूढांत्रिशूलिनीम् । रुद्राणींरुद्रदैवत्यांरुद्रलोकनिवासिनीम् । आवाहयाम्यहंदेवीमायान्तींसूर्यमण्डलात् । आगच्छवरदेदेविव्यक्षरे-रुद्रवादिनि । सावित्रिछन्दसांमातारुद्रयोनेनमोस्तुते ॥ ततःप्रातः-सन्ध्यावत्प्राणायामंकृत्वाअम्बुप्राशनम्—आपः पुनन्त्वितिमन्त्रस्यना-रायणऋषिःआपोदेवतागायत्र्याछन्दःअम्बुप्राशनेविनियोगः ॥ ॐ-आपःपुनन्तुपृथिवींपृथिवीपूतापुनातुमाम् । पुनन्तुब्रह्मणस्पतिर्ब्रह्मपू-तापुनातुमाम् । यदुच्छिष्टमभोज्यंयद्वादुश्चरितंमम । सर्वंपुनन्तुमामा-पोसतांचमतिग्रहꣳ स्वाहा ॥ एतन्मंत्रेणजलंप्राश्यतूष्णींद्विराचामेत् ॥ ततोमार्जनंअपोऽशलावादानं जलप्रक्षेपणं अपोवामहस्तेगृहीत्वान्युब्जे-नदक्षिणहस्तेनाच्छादनंअघमर्षणं च प्रातःसन्ध्यावत्कृत्वागायत्री-

१ गायत्रीनामपूर्वाह्णेसावित्रीमध्यमेदिने । सरस्वतीचसायाह्नेएवंसन्ध्यात्रि-धास्मृता । सावित्र्याःकात्यायनगोत्रम् ॥

मन्त्रेणआकृष्णेनेतिमन्त्रेणवाप्रातःसन्ध्योक्तविधिनासूर्याभिमुखस्तिष्ठन्रुद्रस्वरूपिणेसूर्यनारायणायनमः इदमर्घ्यंदत्तंनममइतिवदन्गन्धाक्षतपुष्पयुक्तंएकमर्घ्यंदद्यात् ॥ दत्तार्घ्योदकेनदक्षिणनासाचक्षुःश्रोत्रस्पर्शनंकुर्यात् । ततःदक्षिणहस्तेजलंगृहीत्वा—ॐअसावादित्योब्रह्म—अनेनमन्त्रेणआत्मनःसमन्तात्प्रदक्षिणवदुदकंक्षिपेत् ॥ ततः सूर्योपस्थानंगायत्र्यावाहनंगायत्र्युपस्थानंगायत्रीजपविनियोगःगायत्रीध्यानंब्रह्मशापविमोचनं वसिष्ठशापविमोचनं विश्वामित्रशापविमोचनंगायत्र्यस्त्रोपाहरणंजपादौमुद्राप्रदर्शनंचप्रातःसन्ध्यावत्कुर्यात् ॥ ततोवस्त्राच्छादितांजपमालांहृदयदेशे धृत्वागायत्रीमन्त्रजपार्थे विनियोगंकृत्वाप्रातःसन्ध्योक्तविधिनागायत्रीजपःकार्यः ॥ ततःषडङ्गन्यासंमुद्राप्रदर्शनंसूर्यप्रदक्षिणासूर्यादिदेवानांनमस्काराः जपनिवेदनं च प्रातःसंध्यावत्कृत्वा । जपार्पणम्—अनेनमध्याह्नसन्ध्याङ्गभूतेनअमुकसंख्याकेनगायत्रीमन्त्रजपाख्येनकर्मणा श्रीभगवान्रुद्रस्वरूपीसूर्यनारायणः प्रीयतांनमम ॥ ततः प्रार्थनां सन्ध्याविसर्जनं

---

१ मुक्तहस्तेनदातव्यंमुद्रांतत्रनकारयेत् । तर्जन्यङ्गुष्ठयोगेतुराक्षसीमुद्रिका स्मृता । राक्षसीमुद्रिकार्घ्येचेत्तत्तोयंरुधिरंभवेत् । जलेष्वर्घ्यप्रदातव्यंजलाभावेशुचिस्थले । संप्रोक्ष्यवारिणासम्यक्ततोऽर्घ्यंतुप्रदापयेत् ॥ २ वृथामंत्रजपश्चैवस्नानं भोजनमेवच । तथावैतीर्थयात्राचमुद्राहीनावृथाभवेत् ॥यज्ञश्चनिष्फलस्तेषांहोमोदेवार्चनंतथा । तस्मान्मुद्रासदाज्ञेयाविद्वद्भिर्यत्नमास्थितैः ॥ ३ कुलार्णवे—नाक्षतैर्हस्तपत्रैर्वानधान्यैर्नचपुष्पकैः । चन्दनैर्मृत्तिकाभिश्चजपसंख्यांनकारयेत् ॥ लाक्षाकुशंचसिंदूरंगोमयंचकरीषकम् । विलोड्यगुटिकाःकृत्वाजपसंख्यांतुकारयेत् ॥

गोत्रप्रवरोच्चारणपूर्वकमभिवादनंईश्वरस्तुतिं प्रातःसन्ध्यावत्कृत्वा । अर्पणम्–अनेनमध्याह्नसन्ध्योपासनाख्येनकर्मणाभगवान्रुद्रस्वरूपी-परमेश्वरःप्रीयतांनमम ॥ ततोद्विराचमनम्–ॐकेशवायनमःस्वाहा ॐनारायणायनमःस्वाहा ॐमाधवायनमःस्वाहा ॥ हस्तप्रक्षालनम्–ॐगोविन्दायनमः ॥ ॐविष्णवेनमःॐविष्णवेनमःॐविष्णवेनमः ॥ इतिमध्याह्नसन्ध्याप्रयोगः ॥

॥ १९ ॥ अथसूर्योपस्थानप्रयोगः ॥

आचम्यप्राणानायम्य ॥ सङ्कल्पः–अद्यपूर्वोच्चारितवर्त्तमानएवं गुणविशेषेणविशिष्टायांशुभपुण्यतिथौममात्मनः श्रुतिस्मृतिपुराणोक्त-फलप्राप्त्यर्थंश्रीसवितासूर्यनारायणप्रीत्यर्थंसूर्योपस्थानमहंकरिष्ये । कुशपवित्रधारणम्–ॐपवित्रेस्थो० ॥ इतिमन्त्रेणदक्षिणवामहस्तयो-रनामिकयोःकुशपवित्रेधार्य । सूर्यपूजनम्–ॐउदुत्यञ्जातवेदसं० ॥ इतिमन्त्रेणसूर्यगन्धाक्षतपुष्पैःसम्पूज्यदक्षिणवामपाण्योर्द्वौद्वौसाग्रदर्भौ गन्धाक्षतश्वेतपुष्पतुलसीदलसहितौ धृत्वासूर्यमुदीक्षन्—ॐउद्वयन्त-मंस० ॥ ॐउदुत्यञ्जा० ॥ ॐचित्रन्देवाना० ॥ ॐतच्चक्षुर्दे० ॥ ॐतत्सवितु० ॥ ॐविश्वाद्बृहद्रिपबतुसोम्यम्मद्धायुर्दधद्यज्ञपता-वविंहुतम् ॥ वातंजूतोयोऽअभिरक्षतित्मनाप्प्रजा?पुंपोषपुरुधाविरांजति ॥ ३०/३३ ॥ उदुत्यञ्जातवेदसन्देवंवंहन्तिकेतवः÷ ॥ दृशेविश्वायम्यूर्य्यम् ॥ ३१/३३ ॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२ऽअनु ॥ त्वंवरुणपश्यसि ॥ ३२/३३ ॥ दैव्यावध्वर्य्यूऽआगतंरथेनसूर्य्यत्वचा ॥ मध्वायज्ञंसमञ्जाथे ॥ तम्प्रत्क्रथायंहेनम्श्रित्रन्देवानाम् ॥ ३३/३३ ॥

तम्प्रत्क्रथापूर्व्वथाविश्वश्चेमथाज्ज्येष्ठतातिम्बर्हिषदंत्स्वर्विदम् ॥ प्रतीचीनंवृजनंदोहसेधुनिंमाशुञ्जयंन्तमनुयासुवर्द्धसे ॥ १२/७ ॥ अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्ज्जरायूरजसोविमानें ॥ इममपाꣳसंङ्गमेसूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति ॥ १६/७ ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगतस्तस्थुषश्च ॥ ४६/१३ ॥ आनऽइडाभिर्विदथेसुशस्तिविश्वानरꣳसवितादेवऽएतु ॥ अपियथायुवानोमत्सथानोविश्वंजगदभिपित्वेमनीषा ॥ ३४/३३ ॥ यदद्यकच्चवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वन्तदिन्द्रतेवशे ॥ ३५/३३ ॥ तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य्य ॥ विश्वमाभासिरोचनम् ॥ ३६/३३ ॥ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मध्याकर्त्तोर्वितंतꣳसꣳभार ॥ यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ॥ ३७/३३ ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरूपꣳकृणुतेद्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितꣳसम्भरन्ति ॥ ३८/३३ ॥ बण्महाँ२ऽअसिसूर्य्यबडादित्यमहाँ२ऽअसि ॥ महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ऽअसि ॥ ३९/३३ ॥ बट्सूर्य्यश्रवसामहाँ२ऽअसिसत्रादेवमहाँ२ऽअसि ॥ मन्हादेवानामसुर्य्यःपुरोहितोविभुज्योतिरदाभ्यम् ॥ ४०/३३ ॥ श्रायन्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत ॥ वसूनिजातेजनमानऽओजसाप्रतिभागन्नदीधिम ॥ ४१/३३ ॥ अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहसꣳपिपृतानिरवद्यात् ॥ तन्नोमित्रोवरुणोमामहन्तामदितिꣳसिन्धुःपृथिवीऽउतद्यौः ॥ ४२/३३ ॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ४३/३३ ॥ ॐसहस्रशीर्षा० साद्धयाꣳ

सन्तिदेवा? ॥ १६ ॥ यज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गमज्योतिषाज्योतिरेकन्तन्मेमनः÷शिवसङ्कल्पमस्तु ॥ १/३४ ॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः ॥ यदपूर्व्वं-यक्षमन्त?ष्प्रजानान्तन्मेमनः÷शिवसङ्कल्पमस्तु ॥ २/३४ ॥ यत्प्रज्ञानं-मुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्मान्नऽऋतेकिञ्चनक-र्म्मक्रियतेतन्मेमनः÷शिवसङ्कल्पमस्तु ॥ ३/३४ ॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मे-मनः÷शिवसङ्कल्पमस्तु ॥ ४/३४ ॥ यस्मिन्नृचःसामयजूꣳषियस्मिन्-प्रतिष्ठितारथनाभाविवाराः? ॥ यस्मिँश्चित्तꣳसर्व्वमोतम्प्रजानान्त-न्मेमनः÷शिवसङ्कल्पमस्तु ॥ ५/३४ ॥ सुषारथिरश्वानिवयन्मनुष्या-न्नेनीयतेभीशुभिर्व्वाजिनऽइव॥ हृत्प्रतिष्ठञ्यदजिरञ्जविष्ठन्तन्मेमनः÷ शिवसङ्कल्पमस्तु ॥ ६/३४ ॥ मण्डलब्राह्मणम्—ॐयदेतन्मण्डलंतपति-तन्महदुक्थन्ताऽऋचऽसऽऋचांलोकोथयदेतदर्चिर्दीप्यतेतन्महाव्रतंता-निसामानिससान्नाँल्लोकोथयऽएषऽएतस्मिन्मण्डलेपुरुषऽसोग्निस्ता-नियजूꣳषिसयजुषांल्लोकऽ ॥ १ ॥ सैषात्रय्येवविद्यातपतितद्धैत-दप्यविद्वाꣳसऽआहुस्त्रयीवाऽएषाविद्यातपतीतिवाग्वैवतत्पश्यन्तीव-दति ॥ २ ॥ सऽएषऽएवमृत्युर्षऽएषऽएतस्मिन्मण्डलेपुरुषोथैतदमृतं-यदेतदर्चिर्दीप्यतेतस्मान्मृत्युर्नम्रियतेमृतेर्ह्यन्तस्तस्मादुनदृश्यतेमृतेर्ह्यन्तऽ ॥ ३ ॥ 'तदेषश्लोकोभवति'—अन्तरंमृत्योरमृतमित्यवरꣳह्येत-न्मृत्योरमृतम्मृत्यावमृतमाहितमित्येतस्मिन्हि पुरुषऽएतन्मण्डलम्प्रति-ष्ठितंतपतिमृत्युर्विवस्वन्तंवस्तऽइत्यसौवाऽआदित्योविवस्वानेषह्यहो-रात्रेविवस्तेतमेषवस्तेसर्व्वतोह्येनेनपरिवृतोमृत्योरात्माविवस्वतीत्येत-

स्मिन्हिमण्डलऽएतस्यपुरुषस्यात्मैतदेषश्लोकोभवति ॥ ४ ॥ तयोर्वाऽएतयोरुभयोरेतस्यचार्चिषऽएतस्यचपुरुषस्यैतन्मण्डलंप्रतिष्ठात-स्मान्महदुक्थम्परस्मैनशꣳसेन्नेदेतांप्रतिष्ठांछिनदाऽइत्येताꣳहसप्रतिष्ठां-छिन्तेऽयोमहदुक्थंपरस्मैशꣳसतितस्मादुक्थशस्मभूयिष्ठंपरिचक्षतेप्रति-ष्ठाछिन्नोहिभवतीत्यधिदेवतम् ॥ ५ ॥ 'अथाधियज्ञम्'—यदेतन्म-ण्डलंतपत्ययꣳसरुक्मोथयदेतदर्चिर्दीप्यतऽइदंतच्पुष्करपर्णमापोह्येताऽ-आपऽपुष्करपर्णमथयऽएषऽएतस्मिन्मण्डलेपुरुषोयमेवसयोयꣳहिरण्म-यऽपुरुषस्तदेतदेवैतत्रयꣳसंस्कृत्येद्वोपधत्तेतद्यज्ञस्यैवानुसꣳस्थामूर्द्ध्वमु-त्क्रामतितदेतमप्येतियऽएषतपतितस्मादग्निन्नाद्रियेतपरिहन्तुममुत्रह्येष-तदाभवतीत्युऽएवाधियज्ञम् ॥ ६ ॥ 'अथाध्यात्मम्'—यदेत-न्मण्डलंतपतियश्चैषरुक्मऽइदंतच्छुक्लमक्षन्नथयदेतदर्चिर्दीप्यतेयच्चैतत्पुष्क-रपर्णमिदंतत्कृष्णमक्षन्नथयऽएषऽएतस्मिन्मण्डलेपुरुषोयश्चैषहिरण्मयऽ-पुरुषोयमेवसयोयंदक्षिणेक्षन्पुरुषऽ ॥ ७ ॥ सऽएषऽएवलोकंपृणतामे-षसर्वोग्निरभिसम्पद्यतेतस्यैतन्मिथुनं योयꣳसव्येक्षन्पुरुषोद्वेमहैतदात्म-नोयन्मिथुनं यदावैसहमिथुनेनाथसर्वोथकृत्स्नऽकृत्स्नतायैतद्यत्तद्वैभव-तोद्वन्द्वꣳहिमिथुनम्प्रजननंतस्माद्वेद्वेलोकंपृणेऽउपधीयेतेतस्मादुद्वाभ्यां-द्वाभ्यांचितिम्प्रणयन्ति ॥ ८ ॥ सऽएषऽएवेन्द्रऽ । योयंदक्षिणेक्ष-न्पुरुषोथेषमिन्द्राणीताभ्यां देवाऽएतांविधृतिमकुर्वन्नासिकान्तस्माज्जा-याया अन्तेनाश्नीयाद्वीर्य्यवान्हास्माज्जायतेवीर्य्यवन्तमुहसाजनयतियस्या ऽअन्तेनाश्नाति ॥ ९ ॥ तदेतदेवत्रतꣳराजन्यबन्धवोमनुष्याणा-मनुतमांगोपायन्तितस्माद्गोतेषुवीर्य्यवाज्जायतेमृतवाकावयसाꣳसाक्षिप्र-श्येनंजनयति ॥ १० ॥ तौहृदयस्यकाशंप्रत्यवेत्यमिथुनीभवतस्तौ-

यदामिथुनस्यान्तङ्गच्छतोथहैतत्पुरुषऽस्वपितिद्यथाहैवेदम्मानुषस्य-
मिथुनस्यान्तङ्गत्वासंविदऽइवभवत्येवहहैवैतदसंविदुऽइवभवतिदैवꣳ-
ह्येतन्मिथुनम्परमोह्येषऽआनन्दꣳ ॥ ११ ॥ तस्मादेवंवित्स्वप्यात् ॥
ह्येक्यहहैतेऽएवतद्देवतेमिथुनेनप्रियेणधान्नासमर्द्धयतितस्मादुहस्वपन्तं-
धुरेवनबोधयेन्नेदेतेदेवतेमिथुनीभवन्त्यौहिनसानीतितस्मादुहैतत्सुखपु-
षꣳश्लेष्मणमिवमुखम्भवत्येतेऽएवतद्देवतेरेतꣳसिञ्चतस्तस्माद्रेतसऽइद-
ꣳसम्भवतिषदिदंकिञ्च ॥ १२ ॥ सऽएषएवमृत्युꣳ ॥ षऽएषएत-
स्मिन्मण्डलेपुरुषोयश्चायन्दक्षिणेक्षन्पुरुषस्तस्यैतस्यहृदयेपादावतिहतौ
तौहैतदाच्छिद्योत्क्रामतिसयदोत्क्रामत्यथहैतत्पुरुषोम्रियतेतस्मादुहैतत्प्रे-
तमाहुराच्छेद्यस्येति ॥ १३ ॥ एषऽउऽएवप्राणꣳ । एषहीमाꣳसर्व्वाꣳ
यजाꣳप्रणयतितस्यैतेप्राणाꣳस्वाꣳसयदास्वपित्यथैनमेतेप्राणाꣳस्वाऽअ-
पियन्तितस्मात्स्वाप्ययꣳस्वाप्ययोहवैतꣳस्वमऽइत्याचक्षतेपरोक्षन्परो-
क्षकामाहिदेवाꣳ ॥ १४ ॥ सऽएतैꣳसुप्तोनकस्यचनवेदनमनसासङ्क-
ल्पयतिनवाचान्नस्यरसंविजानातिनप्राणेनगन्धंविजानातिनचक्षुषाप-
श्यतिनश्रोत्रेणशृणोत्येतꣳह्येतेतदापीताभवन्तिसऽएषऽएकऽसन्प्रजा-
सुबहुधाव्याविष्टस्तस्मादेकासतीलोकम्पृणासर्वमायुमनुविभवत्यथय-
देकऽएवतस्मादेकः ॥ १५ ॥ तदाहुꣳ ऽएकोमृत्युर्बहवऽइत्येकश्चबह-
वश्चेतिहब्रूयाद्यदहासायमुत्रतेनैकोथयदिहप्रजासुबहुधाव्याविष्टस्तेनो-
बहवꣳ ॥ १६ ॥ तदाहुꣳ ऽअन्तिकेमृत्युर्दूराऽइत्यन्तिकेचदूरेचे-
तिहब्रूयाद्यदहायमिहाध्यात्मन्तेनान्तिकेथयदसावमुत्रतेनोदूरे ॥१७॥
तदेषश्लोकोभवति । अन्येभात्यपश्रितोरसानाꣳसंक्षरेमतऽइतिय-
देतन्मण्डलंतपतितदन्नमथयऽएषऽएतस्मिन्मण्डलेपुरुषꣳसोत्तासऽएत-

स्मिन्नन्नेपश्रितोभातीत्यधिदेवतम् ॥ १८ ॥ 'अथाध्यात्मम्'—इदमेवशरीरमन्नमथयोयन्दक्षिणेक्षन्पुरुषऽसोत्तासऽएतस्मिन्नन्नेपाश्रितो भाति ॥ १९ ॥ तमेतमग्निरित्यध्वर्यवऽउपासते । यजुरित्येषहीदꣳसर्वंयुनक्तिसामेतिछन्दोगाऽएतस्मिन्हीदꣳसर्वꣳसमानमुक्थमितिबह्वृचाऽएषहीदꣳसर्वमुत्थापयतियातुरितियातुविदऽएतेनहीदꣳसर्वंयतंविषमितिसर्प्पोऽसर्प्पऽइतिसर्प्पविदऽऊर्गितिदेवारयिरितिमनुष्यामायेत्यसुराऽस्वधेतिपितरोदेवजनऽइतिदेवजनविदोरूपमितिगन्धर्वागन्धऽइत्यप्सरसस्तंयथायथोपासतेतदेवभवतितद्धैनान्भूत्वावतितस्मादेनमेवंवित्सर्वैरेवैतैरुपासीतसर्वꣳहैतद्भवतिसर्वꣳहैनमेतद्भूत्वाऽवति॥२०॥ सऽएषत्रीष्टकोग्निर्ऋगेकाषजुरेकासामैकातद्याङ्काश्चात्रर्चोपदधातिरुक्मऽएवतस्याऽआयतनमथयांषजुषापुरुषऽएवतस्याऽआयतनमथयाॐसाम्नापुष्करपर्णमेवतस्याऽआयतनमेवंत्रीष्टकꣳ ॥ २१ ॥ तेवाऽएतेऽउभेऽएषचरुक्मऽएतच्चपुष्करपर्णमेतम्पुरुषमपीतऽउभेह्यृक्सामेषजुरपीतऽएवम्वेकेष्टकꣳ ॥ २२ ॥ सऽएषऽएवमृत्युऽषऽएषऽएतस्मिन्मण्डलेपुरुषोयश्चायं दक्षिणेक्षन्पुरुषꣳसऽएषऽएवंविदऽआत्माभवतिसयदेवंविदस्माँल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवतिसोमृतोभवतिमृत्युर्ह्यस्यात्माभवति ॥ २३ ॥ तेनवाऽइदमग्रेसदासीन्नैवसदासीत् ॥ एतैर्मन्त्रैरुपस्थायपाण्योर्गृहीतकुशादीन्कुशपवित्रेचपूर्वस्यांदिशित्यक्त्वासूर्यप्रदक्षिणीकृत्यनमस्कृत्यउपविश्यअर्पणम्—अनेनयथाशक्त्याकृतेनसूर्योपस्थानकर्मणाश्रीभगवान्सवितासूर्यनारायणःप्रीयतांनमम ॐतत्सद्ब्रह्मार्पणमस्तु ॥ इतिसूर्योपस्थानप्रयोगः ॥

॥ १६ ॥ अथब्रह्मयज्ञंप्रयोगः ॥

दर्भासनोपरिप्राङ्मुखउपविश्यआचम्यप्राणानायम्यकुशपवित्र-धारणम्—ॐपवित्रेस्थो० ॥ अनेनमन्त्रेणदक्षिणवामहस्तयोरना-मिकयोःकुशपवित्रेधृत्वासङ्कल्पः—अद्यपूर्वोच्चारितएवंगुणविशेषण-विशिष्टायांशुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ॐतत्सत्श्रीपरमेश्वरप्रीत्यर्थंयथाशक्तिब्रह्मयज्ञेनाहंयक्ष्ये ॥ अथातो ब्रह्मयज्ञंव्याख्यास्यामः ॥ पुनःसङ्कल्पः—इषेत्वादिषुमन्त्रेषुखंब्र-ह्मान्तेषुदशप्रणवसहितेषुयाःक्रियास्तत्रविवस्वान्ऋषिः प्रजापतिर्देवता-सर्वाणिछन्दा०सिसर्वाणिसामानिप्रतिलिङ्गोक्तादेवताब्रह्मयज्ञेविनि[२]-योगः ॥ न्यासाः[१]—ॐगौतमभरद्वाजाभ्यांनमःनेत्रयोः ॥ ॐविश्वा-

---

१ कात्यायनपरिशिष्टसूत्रे-विप्रआडित्यनुवाकपुरुषसूक्तशिवसङ्कल्पमण्डलब्रा-ह्मणैरित्युपस्थायप्रदक्षिणीकृत्यनमस्कृत्योपविशेद्दर्भेषुदर्भपाणिः स्वाध्यायंचयथाश-क्त्यादावारभ्यवेदम् ॥ याज्ञवल्क्यः—प्रदक्षिणं समावृत्यआसनेउपविश्यच । दर्भेषु दर्भपाणिःसन्प्राङ्मुखस्तुकृताञ्जलिः । स्वाध्यायंतुयथाशक्तिब्रह्मयज्ञार्थमाचरेत् ॥ वेदशब्दोत्राथर्वादेरप्युपलक्षणार्थः—वेदाथर्वपुराणानिसेतिहासानिशक्तितः । जप-यज्ञप्रसिद्ध्यर्थंविद्यांचाध्यात्मिकांजपेत् । यश्चश्रुतिजपःप्रोक्तोब्रह्मयज्ञस्तुसस्मृतः । सचार्वाक्तर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः ॥ २ ऋषयश्छन्दोभिरुपलक्षितादे-वतामंत्रवर्णादृग्यजुषयोर्विनियोगतश्चविज्ञेयाः । सर्वमेतच्छन्दोदैवतमार्षंचविज्ञाय-यत्किंचिज्जपहोमादिकरोतितस्यफलमश्नुते ॥ ३ सर्वानुक्रमसूत्रेचतुर्थाध्याये—ब्रह्मयज्ञारंभेयथाविधिस्नात्वाछन्दःपुरुषमेनोनिर्णोदनꣳशरीरंन्यसेत्तिर्यग्विलश्चमस-ऊर्ध्वबुध्नः ॥

मित्रजमदग्निभ्यांनमःश्रोत्रयोः ॥ ॐवसिष्ठकश्यपाभ्यांनमःनासिकयोः ॥ ॐअत्रयेनमःवाचि ॥ ॐगायत्र्यग्निभ्यांनमःशिरसि ॥ ॐउष्णिक्सवितृभ्यांनमःग्रीवायाम् ॥ ॐबृहतीबृहस्पतिभ्यांनमःहनौ ॥ ॐबृहद्रथन्तरद्यावापृथिवीभ्यांनमःबाह्वोः ॥ ॐत्रिष्टुबिन्द्राभ्यांनमःनाभौ ॥ ॐजगत्यादित्याभ्यांनमःश्रोण्योः ॥ ॐअतिच्छन्दाप्रजापतिभ्यांनमःलिङ्गे ॥ ॐयज्ञायज्ञियवैश्वानराभ्यांनमःगुदे ॥ ॐअनुष्टुब्विश्वेभ्योदेवेभ्योनमःऊर्वोः ॥ ॐपङ्क्तिमरुद्भ्योनमःजान्वोः ॥ ॐद्विपदाविष्णुभ्यांनमःपादयोः ॥ ॐविच्छन्दावायुभ्यांनमःनासापुटस्थप्राणेषु ॥ ॐन्यूनाक्षराछन्दोभ्योनमःसर्वाङ्गेषु ॥ ततोवामहस्ततलेदर्भजलयवाक्षतचन्दनादीन्क्षिप्त्वातदुपरिदक्षिणहस्तमधोमुखं कृत्वादक्षिणजानूपरिनिधायवक्ष्यमाणमन्त्रान्पठेत्—ॐभूर्भुवः स्वः ॐतत्सवितु० ॥ ॐइषेत्वोर्ज्जेत्वाव्वायवस्थदेवोवः÷सविताप्पार्प्पयतुश्रेष्ठतमायकर्म्मणऽआप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्य्यजमानस्यपशून्पाहि ॥ १ ॥ ॐवसोःपवित्रम् ॥ २ ॥ ॐहिरण्मयेनपात्रेणसत्यस्यापिहितम्मुखम् ॥ योसावादित्येपुरुषःसोसावहम् ॥ ओ३म्क्रतोस्मर ॥ क्लिबे स्मर ॥ कृतꣳस्मर ॥ ओ३म्क्रतोस्मर ॥ क्लिबे स्मर ॥ कृतꣳस्मर ॥

---

१ एवमेवसर्वाङ्गानियोजयित्वावेदमयःसंपद्यतेशापानुग्रहसमर्थोभवतिब्राह्मंतेजश्चवर्द्धतेनकुतश्चिद्भयंविन्दतऋङ्मयोयजुर्मयःसाममयस्तेजोमयोब्रह्ममयोमृतमयःसंभूयब्रह्मैवाभ्येतितस्मादेतन्नाब्रह्मचारिणे नातपस्विनेनासंवत्सरोषितायनाप्रवक्त्रेनानूब्रूयादेनेनाधीतेनचांद्रायणाब्दफलमवाप्नोत्यनेनचसम्यग्ज्ञातेनब्रह्मणः सायुज्यंसलोकतामाप्नोत्याप्नोति स० अ० ४।१३.

सोसावहम् ॥ १७/४० ॥ ॐ[१] खम्ब्रह्म ॥ १८/४० ॥ ॐव्रतमुपैष्यन्नन्तरे-
णाहवनीयं चगार्हपत्यञ्चप्राङ्तिष्ठन्नपऽउपस्पृशतिताद्यदपऽउपस्पृशत्यमे-
ध्योवैपुरुषोयदनृतंवदतितेनपूतिरन्तरतोमेध्यावाऽआपोमेध्योभूत्वात्र-
तमुपायानीतिपवित्रंवाऽआपःपवित्रपूतोव्रतमुपायानीतितस्माद्वाऽअप-
ऽउपस्पृशति ॥ [२]सोऽग्निमेवाभीक्षमाणोव्रतमुपैति ॥ ॐप्रौश्रीपुत्रादा-
सुरिवासिनःप्राश्रीपुत्रआसुरायणादासुरायणआसुरेरासुरिर्याज्ञव-
ल्क्याद्याज्ञवल्क्यऽउद्दालकादुद्दालकोऽरुणादरुणऽउपवेशेरुपवेशिःकुश्रेः-
कुश्रिर्वाजश्रवसोवाजश्रवाजिह्वावतोबाध्योगाज्जिह्वावान्बाध्योगोऽ-
सिताद्वार्षगणादसितोवार्षगणोहरितात्कश्यपाद्धरितःकश्यपःशिल्पा-
त्कश्यपाच्छिल्पःकश्यपः कश्यपान्नैध्रुवेः कश्यपोनैध्रुविर्वाचोवाग्म्भि-
ण्याअम्भिण्यादित्यादादित्यानीमानिशुक्लानियजूंष्यवाजसनेयेनया-
ज्ञवल्क्येनाख्यायन्ते ॥ ॐ[३][२]अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजम् ।
होतारंरत्नधातमम् ॥ ॐ[३][२]अग्न[३]ऽआया[२]हिवीतयेगृणा[३]नो[२]हव्यदा[३]तये ।
निहोता[२]सत्सि[३]बर्हि[१]षि ॥ ॐ[३]शन्नो[२]देवीर[३]भिष्ट[१]यऽआपो[२]भवन्तुपी[३]तये ।
शंयोर[३]भिस्र[२]वन्तुनः ॥ ॐअथानुवाकान्व्यख्यामि ॥ ॐमण्डलंदक्षि-

---

१ शतपथब्राह्मणेप्रथमकांडस्यप्रथमाध्यायस्यप्रथमब्राह्मणस्यप्रथमकण्डिका ॥
२ श० कां० १ अ० १ ब्रा० १ कं० २ आदिभागः ॥ ३ श०
कां० १४ अ० ७ ब्रा० ५ कं० ३३ ॥ ४ ऋग्वेदस्यादिमोमंत्रः ॥
५ सामवेदस्यादिमोमंत्रः ॥ ६ अथर्ववेदस्यादिमोमंत्रः ॥ ७ अनुवाकसूत्र-
स्यप्रथमश्लोकस्यादिभागः ॥ ८ सर्वानुक्रमसूत्रस्यप्रथमकण्डिकायाआदिभागः ॥

णमक्षिहृदयम् ॥ अथशिक्षांप्रवक्ष्यामि ॥ अथातोऽधिकारःफलयुक्तानिकर्माणि ॥ अथातोगृह्यस्थालीपाकानांकर्म ॥ वृद्धिरादैच् । समाम्नायःसमाम्नातः । मयरसतजभनलगसंमितम् । पञ्चसंवत्सरमयंयुगाध्यक्षम् । गौःग्मा । अथातोधर्मजिज्ञासा । अथातोब्रह्मजिज्ञासा । योगीश्वरंयाज्ञवल्क्यम् । नारायणंनमस्कृत्य । इतिविद्यातपोयोनिरयोनिर्विष्णुरीडितः ॥ वाग्यज्ञेनार्चितोदेवःप्रीयतांमेजनार्दनः ॥ एवंब्रह्मयज्ञंविधायपाण्योर्गृहीतकुशादीन्उत्तरस्यांदिशित्यक्त्वा । अर्पणम्--अनेनब्रह्मयज्ञाख्येनकर्मणा श्रीभगवान्परमेश्वरःप्रीयतांनमम ॥ ॐतत्सद्ब्रह्मार्पणमस्तु ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु । न्यूनंसंपूर्णतांयातिसद्योवन्देतमच्युतम् ॥ ॐविष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ इतिब्रह्मयज्ञप्रयोगः ॥

---

१ शिक्षायाःप्रथमश्लोकस्यादिभागः ॥ २ कात्यायनश्रौतसूत्रस्यप्रथमाध्यायस्यप्रथमकण्डिकायाआदिमेद्वेसूत्रे ॥ ३ पारस्करगृह्यसूत्रस्यप्रथमकांडस्य प्रथमकंडिकायाःप्रथमसूत्रम् ॥ ४ अष्टाध्याय्याःप्रथमंसूत्रम् ॥ ५ निरुक्तस्यादिशब्दाः ॥ ६ छन्दसःप्रथमश्लोकस्यादिभागः ॥ ७ ज्योतिषस्यप्रथमश्लोकपूर्वार्धम् ॥ ८ निघंटोरारंभशब्दाः ॥ ९ पूर्वमीमांसायाःप्रथमाध्यायस्यप्रथमसूत्रम् ॥ १० उत्तरमीमांसायाःप्रथमाध्यायस्यप्रथमपादस्यप्रथमसूत्रम् ॥ ११ याज्ञवल्क्यस्मृतेःप्रथमाध्यायस्यप्रथमश्लोकस्यादिभागः ॥ १२ महाभारतप्रथमश्लोकस्यादिभागः ॥

॥ १७ ॥ अथतर्पणप्रयोगः ॥

आचम्यप्राणानायम्यकुशपवित्रधारणम्—ॐपवित्रेस्थो० ॥ इतिमंत्रेण दक्षिणहस्तस्यानामिकायांकुशपवित्रंधृत्वासङ्कल्पः—तिथिर्विष्णुस्तथावारोनक्षत्रंविष्णुरेवच । योगश्चकरणंचैवसर्वंविष्णुमयंजगत् ॥ ॐविष्णवेनमः । अद्यपूर्वोच्चारितएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममाऽत्मनःश्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ॐत-

---

१० कात्यायनपरिशिष्टसूत्रे—ततस्तर्पयेद्ब्रह्माणंपूर्वंविष्णुंरुद्रंप्रजापतिंदेवांश्छन्दाꣳसिवेदानृषीन्पुराणाचार्यान्गन्धर्वानितराचार्यान्संवत्सरंसावयवंदेवीरप्सरसोदेवानुगान्नागान्सागरान्पर्वतान्सरितोमनुष्यान्यक्षान्रक्षाꣳसिपिशाचान्सुपर्णान्भूतानिपशून्वनस्पतीनोषधीर्भूतग्रामश्चतुर्विधस्तृप्यतामित्योङ्कारपूर्वंततोनिवीतीमनुष्यान्सनकꣳसनन्दनꣳसनातनंकपिलमासुरिंवोढुंपञ्चशिखम् । ततोऽपसव्यंतिलमिश्रंकव्यवाडनलꣳसोमंयममर्यमणमग्निष्वात्तान्सोमपबर्हिषदोयमाँश्चैके । यमायधर्मराजायमृत्यवेचान्तकायच । वैवस्वतायकालायसर्वभूतक्षयायच । औदुम्बरायदध्नायनीलायपरमेष्ठिने । वृकोदरायचित्रायचित्रगुप्तायवैनमः । इत्येकैकस्यतिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलाञ्जलीन् । यावज्जीवकृतंपापंतत्क्षणादेवनश्यति । जीवत्पितृकोप्येतानन्यांश्चेतरऽउदीरतामङ्गिरसऽआयन्तुनऽऊर्ज्जंवहन्तीपितृभ्योयेचेहमधुवाताऽइतित्र्यृचंजपन्प्रसिञ्चेत्तृप्य ४मितित्रिर्नमोवऽइत्युक्त्वामातामहानांचैवंगुरुशिष्यर्त्विग्ज्ञातिबान्धवानतर्पितादेहाद्रुधिरंपिबन्तिवासोनिष्पीड्याचम्य । अदृश्रमस्यहꣳसऽइत्युपस्थायप्रदक्षिणीकृत्यदिशश्चदेवताश्चनमस्कृत्योपविश्यब्रह्माग्निपृथिव्योषधीर्वाग्वाचस्पतिर्विष्णुर्महद्भ्योऽपाम्पतयेवरुणायनमऽइतिसंवर्चसेतिमुखंविमृष्टेदेवागातुविदऽइतिविसर्जयेत् ॥**

त्सत्परमेश्वरप्रीत्यर्थंदेवऋषिमनुष्यपितृतर्पणमहंकरिष्ये ॥ ताम्रपात्रे श्वेतगन्धयवाक्षताःश्वेतसुगन्धपुष्पाणि तुलसीदलसहितानितथाहस्तप्रमाणान्प्रादेशमात्रप्रमाणान्वाप्राग्ग्रान्त्रीन्कुशान्स्थापयित्वातर्पणार्थेउदकपूरणम् ।ततोदेवानामावाहनम्-विश्वेदेवासआगतेत्यस्यप्रजापतिऋषिःगायत्रीछन्दः विश्वेदेवादेवताःतथाविश्वेदेवाःशृणुतेममित्यस्यस्वयंभूर्ब्रह्माऋषिःत्रिष्टुप्छन्दःविश्वेदेवादेवताःआवाहनेविनियोगः। ॐविश्वेदेवासऽआगतशृणुतामऽइमꣳहवम् ॥ एदम्बर्हिर्निषीदत॥३४॥ ॐविश्वेदेवाꣳशृणुतेमꣳहवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हिषिमादयध्वम् ॥ ५३/३३ ॥ आगच्छन्तुमहाभागाविश्वेदेवामहाबलाः । येतर्पणेऽत्रविहिताःसावधानाभवन्तुते ॥ तत्रादौदेवतर्पणम्—पूर्वपात्रोपरिस्थापितत्रीन्कुशान्तुलसीदलसंयुक्तान्दक्षिणकरसंपुटेधृत्वातैर्दर्भैःपूर्वपात्रस्थितजलस्यपूर्वाभिमुखंसर्वाङ्गुल्यग्रैर्देवतीर्थेनपात्रान्तरे एकैकाञ्जलिंदद्यात् ॥ ॐब्रह्मात्तृप्यताम् । ॐविष्णुस्तृप्यताम् ॥ ॐरुद्रस्तृप्यताम् ।

---

१ अंगुल्यग्रेतीर्थंदेवंस्वल्पांगुल्योर्मूलेकायम् । मध्येऽङ्गुष्ठाङ्गुल्योःपैत्र्यंमूलेत्वंगुष्ठस्यब्राह्मम् ॥ २ पात्राद्वैजलमादायशुभेपात्रान्तरेक्षिपेत् । जलपूर्णेऽथवागर्तेनस्थलेतुविबर्हिषि । हेमरौप्यताम्रकांस्यमयेपात्रेनमृन्मये । यत्रपूतस्थलंतत्रतर्पणंस्यान्नदीजले ॥ ३ ॐतीर्थानितृप्यन्ताम् । ॐतीर्थदेवास्तृप्यन्ताम् । ॐविश्वेदेवास्तृप्यन्ताम् । ॐमोदास्तृप्यन्ताम् । ॐप्रमोदास्तृप्यन्ताम् । ॐसुमुखास्तृप्यन्ताम् । ॐदुर्मुखास्तृप्यन्ताम् । ॐअविघ्नास्तृप्यन्ताम् । ॐविघ्नकर्तारस्तृप्यन्ताम् । एवंपाठंदेवतर्पणेकेचित्पठन्तिनतुसूत्रे ॥

ॐप्रजापतिस्तृप्यताम् । ॐदेवास्तृप्यन्ताम् । ॐछन्दाꣳसितृप्यन्ताम् । ॐवेदास्तृप्यन्ताम् । ॐऋषयस्तृप्यन्ताम् । ॐपुराणाचार्यास्तृप्यन्ताम् । ॐगन्धर्वास्तृप्यन्ताम् । ॐइतराचार्यास्तृप्यन्ताम् । ॐसंवत्सरःसावयवस्तृप्यताम् । ॐदेव्यस्तृप्यन्ताम् । ॐअप्सरसस्तृप्यन्ताम् । ॐदेवानुगास्तृप्यन्ताम् । ॐनागास्तृप्यन्ताम् । ॐसागरास्तृप्यन्ताम् । ॐपर्वतास्तृप्यन्ताम् । ॐसरितस्तृप्यन्ताम् । ॐमनुष्यास्तृप्यन्ताम् । ॐयक्षास्तृप्यन्ताम् । ॐरक्षाꣳसितृप्यन्ताम् । ॐपिशाचास्तृप्यन्ताम् । ॐसुपर्णास्तृप्यन्ताम् । ॐभूतानितृप्यन्ताम् । ॐपशवस्तृप्यन्ताम् । ॐवनस्पतयस्तृप्यन्ताम् । ॐओषधयस्तृप्यन्ताम् । ॐभूतग्रामश्चतुर्विधस्तृप्यताम् । अथमनुष्यदेवतर्पणम्—निवीत्युदङ्मुखउदगग्रान्कुशान्दक्षिणहस्तस्यकनिष्ठिकामूलप्रदेशेधृत्वाप्रजापतितीर्थेनद्वौद्वावञ्जलीमंत्रमावृत्त्याकुशमध्यतोदद्यात् । मनुष्यदेवानामावाहनम्—सप्तऋषयइतिमंत्रस्यकूर्मऋषिःजगतीछन्दःसप्तऋषयोदेवताऋष्यावाहनेविनियोगः।

---

१ कण्ठावलम्बितंचैवब्रह्मसूत्रंयदाभवेत् । तन्निवीतमितिख्यातंशस्तंकर्मणिमानुषे ॥ २ प्रादेशमात्रमुद्धृत्यसलिलंप्राङ्मुखःसुरान् । उदङ्मनुष्यांस्तृप्येत्तुपितॄन्दक्षिणतस्तथा ॥ ३ स्वल्पाङ्गुल्योर्मूलेकायंप्रजापति तीर्थम् ॥ ब्रह्माद्यानुपवीतीतुदेवतीर्थेनतर्पयेत् । निवीतीकायतीर्थेनमनुष्यान्सनकादिकान् ॥ ४ एकैकमञ्जलिंदेवाद्वौद्वौतुसनकादयः । अर्हन्तिपितरस्त्रींस्त्रीन्त्रियएकैकमञ्जलिम् ॥ ५ अग्रैस्तुतर्पयेद्देवान्मनुष्यान्कुशमध्यतः । पितॄंस्तुकुशमूलाग्रैर्विधिःकौशोयथाक्रमम् ॥

ॐसप्तऋषयः प्रतिहिताः शरीरेसप्तरक्षन्तिसदमप्रमादम् ॥ सप्ता-
पः स्वपतोलोकमीयुस्तत्रजागृतोऽस्वप्नजौसत्रसदौचदेवौ ॥ ५५/३४ ॥
ॐसनकस्तृप्यतु २ । ॐसनन्दनस्तृप्यतु २ । ॐसनातनस्तृ-
प्यतु २ । ॐकपिलस्तृप्यतु २ । ॐआसुरिस्तृप्यतु २ ।
ॐवोढुस्तृप्यतु २ । ॐपञ्चशिखस्तृप्यतु २ । अथपितृतर्पणम्—
तानेवदर्भान्दक्षिणाग्रमूलान्द्विगुणीकृत्यतेषांमध्यं वामहस्तस्याङ्गुष्ठत-
र्जन्यन्तरेधृत्वामूलाग्राणिदक्षिणहस्तस्याङ्गुष्ठतर्जनीमध्यप्रदेशेकृत्वाऽ-
पसव्येनदक्षिणाभिमुखंकृष्णतिलमिश्रितजलेन पितृतीर्थेनत्रींस्त्रीनञ्ज-
लीन्दद्यात् । ॐकव्यवाडनलस्तृप्यताम् ३ । ॐसोमस्तृप्यताम् ३ ।
ॐयमस्तृप्यताम् ३ । ॐअर्यमातृप्यताम् ३ । ॐअग्निष्वात्ताः-
पितरस्तृप्यन्ताम् ३ । ॐसोमपाःपितरस्तृप्यन्ताम् ३ । ॐबर्हिषदः
पितरस्तृप्यन्ताम् ३ । यमतर्पणम्—ॐयमायनमः ३ । ॐधर्म-
राजायनमः ३ । ॐमृत्यवेनमः ३ । ॐ अन्तकायनमः ३ ।
ॐवैवस्वतायनमः ३ । ॐकालायनमः ३ । ॐ सर्वभूतक्षयाय-
नमः ३ । ॐऔदुम्बरायनमः ३ । ॐदध्नायनमः ३ । ॐनीलाय-
नमः ३ । ॐपरमेष्ठिनेनमः ३ । ॐवृकोदरायनमः ३ । ॐचि-
त्रायनमः ३ । ॐचित्रगुप्तायनमः ३ । अथमनुष्यपितृतर्पणम् ॥
आवाहनम्—उशन्तस्त्वेत्यस्यप्रजापत्यश्विसरस्वत्यृषयः गायत्रीछ-
न्दःपितरोदेवताआवाहनेविनियोगः ॥ ॐउशन्तस्त्वानिधीमह्युशन्तः
समिधीमहि ॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे ॥ ७०/१९ ॥ तिला-

---

१ जीवत्पितृकोप्येतावत्पर्यन्तंतर्पणंकुर्यात् ॥

न्गृहीत्वाअमुकगोत्रान्ममपितृपितामहप्रपितामहान्मातृपितामहीप्रपितामहीः अमुकगोत्रान्मातामहप्रमातामहवृद्धप्रमातामहान्मातामहीप्रमातामहीवृद्धप्रमातामहीः तथापत्न्याद्यान्तान्समस्तपितृन्तर्पणेआवाहयिष्ये ॥ अमुकगोत्रःअस्मत्पिता अमुकशर्मा[1] वसुरूपस्तृप्यताम् । इदंजलंतस्मैस्वधानमः । इदंजलंतस्मैस्वधानमः । इदंजलंतस्मैस्वधानमः । अमुकगोत्रः अस्मत्पितामहः अमुकशर्मारुद्ररूपस्तृप्यताम् । इदं० ३ । अमुकगोत्रः अस्मत्प्रपितामहः अमुकशर्माआदित्यरूपस्तृप्यताम् । इदंजलं० ३ । अमुकगोत्राअस्मन्माता अमुकदावसुरूपातृप्यताम् । इदंजलंतस्यै० ३ । अमुकगोत्राअस्मत्पितामहीअमुकदारुद्ररूपातृप्यताम् । इदं० ३ । अमुकगोत्राअस्मत्प्रपितामही अमुकदाआदित्यरूपातृप्यताम् । इदं० ३ । अमुकगोत्रा अस्मत्सापत्नमाता[2] अमुकदावसुरूपातृप्यताम् । इदंजलंतस्यैस्वधानमः ॥ प्रसेचनम् ॥ उदीरतामितिक्रमेणनवर्चःउपांशुआम्नायस्वरेणपठन् अञ्जलिकृतंजलं पितृतीर्थेनप्रसिंचेत्—उदीरतांअङ्गिरसआयंतुनइतित्रयाणांशंखऋषिः त्रिष्टुप्छन्दःपितरोदेवताऊर्जंवहंतीत्यस्यप्रजापतिऋषिःगायत्रीछन्दः पितृभ्योयेचेहइतिद्वयोः प्रजापत्यश्विसरस्वत्यऋ-

---

१ तातास्त्रित्रयंसपत्नजननीमातामहादित्रयंसस्त्रिस्त्रीतनयादितातजननीस्वभ्रातरसस्त्रियः ॥ तातास्त्रात्मभगिन्यपत्यधवयुक्जायापितासद्गुरुःशिष्यास्ताः-पितरोमहालयविधौतीर्थेतथातर्पणे ॥ २ अत्रक्षत्रियाणांवर्मावैश्यानांगुप्तेत्यूहःकार्यः ॥ ३ मातृमुख्यास्तुयास्तिस्रस्तासांत्रींस्त्रीञ्जलाञ्जलीन् । दद्यान्मातृत्रयीभिन्नस्त्रीभ्यएकाञ्जलिंतथा ॥

षयः त्रिष्टुप्छन्दःत्रयाणांपितरोदेवतामधुवाताइतित्र्यृचस्यगौतमऋषिः गायत्रीछन्दःविश्वेदेवादेवताः सर्वेषांप्रसेकेविनियोगः—ॐउदीरता-मवर॑ऽउत्परा॑सऽउन्मध्य॑मा?पितर॑ःसोम्या॑सः॑ ॥ असु॑ꣳ्यऽईयुर॑-बृकाक॑तज्ञास्तेनो॑वन्तुपि॒तरो॒हवे॑षु ॥ ४९/१२ ॥ अङ्गि॑रसोन॒ऽपि॒तरो॒न-व॑ग्वाऽअथ॑र्वाणोभृग॑वः॒सोम्या॑सः॑ ॥ तेषां॑व॒यꣳसु॑म॒तौय॒ज्ञिया॑ना-मपि॑भ॒द्रेसौम॒नसे॑स्याम ॥ ५०/१२ ॥ आय॑न्तुन॒ःपि॒तर॑ःसोम्या॑सोऽग्नि-ष्वा॒त्ता?पथि॑भि॒र्दे॑व॒यानै॑ः ॥ अ॒स्मिन्य॒ज्ञेस्व॒धया॒मद॑न्तोधि॑ब्रुव-न्तु॒तेव॑न्त्वस्मान् ॥ ५८/१२ ॥ ऊर्ज्जं॑व॒हन्ती॑रमृत॑ङ्घृ॒तम्प॑य॑ः॑कीला॑ल॑-परि॒स्रुत॑म् ॥ स्व॒धास्थ॑त॒र्प्पय॑तमे॒पि॒तॄन् ॥ ३४/२ ॥ पि॒तृभ्य॑ः॑स्वधा॒यि-भ्य॑ः॑स्व॒धान॑मः॑पिता॒म॒हेभ्य॑ः॑स्वधा॒यि॑भ्य॑ः॑स्व॒धान॑मः॑प्रपि॑ता-म॒हेभ्य॑ऽस्वधा॒यि॑भ्य॑ः॑स्व॒धान॑मः॑॥ अक्ष॑न्निपि॒तरो॒मी॒मद॑न्तपि॒तरो॑त॒ी-तृपन्तपि॒तर॑ऽपि॑तर॑ःशुन्धध्वम् ॥ ३६/१२ ॥ ये॒चे॒हपि॒तरो॒ये॒चन॒ेह॒याँश्च॑वि॒द्म-याँ ऽउ॑चन॒प्रवि॑द्म॥ त्वंवे॑त्थय॒तितेजा॑तवेद॑ꣳस्वधाभि॒र्य्य॒ज्ञꣳसु॑कृ॒तꣳजु-षस्व ॥ ६७/१२ ॥ मधु॒वाता॑ऽऋताय॒तेमधु॑क्षरन्ति॒सिन्ध॑व॑ः॑ ॥ माध्वी॑र्न॒-ऽसन्त्वोष॑धी॑ः॑ ॥ ३७/१३ ॥ मधु॑नक्त॒मु॒तोष॒सोमधु॑मत्पार्थि॑व॒ꣳरज॑ः॑ ॥ मधु॒द्यौर॑स्तु॒न॑ः॑पि॒ता ॥ २८/१३ ॥ मधु॑मान्नो॒व॒न॒स्प॒ति॒र्म्म॒धु॒माँ२ अस्तुसू॒र्य्य॑ः॑ ॥ माध्वी॑र्गावो॑भवन्तु॒न॑ः॑ ॥ ३९/१३ ॥ ॐतृप्य॑ध्वंतृप्य॑ध्वं-तृप्य॑ध्वम् ॥ इतिप्रसेचनम् ॥ जपः—नमो॑व॒इतियजुः-परमेष्ठीप्रजापतिऋषिः यजु॒श्छन्दः॑ पितरोदेवताःजपेविनियोगः ॥

नमो॑व॒॑पि॒त॒रो॒र॒सा॒य॒न॒मो॑व॒॑पि॒त॒र॒॑शो॒षा॒य॒न॒मो॑व॒॑पि॒त॒रो॒जी॒वा॒य॒न-मो॑व॒॑पि॒त॒र॒॑स्व॒धा॒यै॒न॒मो॑व॒॑पि॒त॒रो॒घो॒रा॒य॒न॒मो॑व॒॑पि॒त॒रो॒म॒न्यवे॒न॒मो-

वः पितरः पितरोनमोवोगृहान्नः ÷ पितरोदत्तसतोवः ÷ पितरोदेष्मैतद्वः ÷ पितरोवासऽआधत्त ॥ ३।२।५ ॥ अमुकगोत्रःअस्मन्मातामहःअमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः ३ । अमुकगोत्रः अस्मत्प्रमातामहः अमुकशर्मारुद्ररूपस्तृप्यतामिदंजलंतस्मै० ३ । अमुकगोत्रःअस्मत्वृद्धप्रमातामहः अमुकशर्माआदित्यरूपस्तृप्यतामिदंजलंतस्मै० ३ । अमुकगोत्राअस्मन्मातामहीअमुकदावसुरूपातृप्यतामिदंजलंतस्यैस्वधानमः । अमुकगोत्राअस्मत्प्रमातामहीअमुकदारुद्ररूपातृप्यतामिदंजलंतस्यैस्वधानमः । अमुकगोत्राअस्मत्वृद्धप्रमातामहीअमुकदाआदित्यरूपातृप्यतामिदंजलंतस्यैस्वधानमः । अमुकगोत्रा अस्मत्पत्नी अमुकदावसुरूपातृप्यतामिदंजलंतस्यैस्वधानमः । अमुकगोत्रःअस्मत्सुतः अमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः । अमुकगोत्राअस्मत्कन्याअमुकदावसुरूपातृप्यतामिदंजलंतस्यैस्वधानमः । अमुकगोत्रःअस्मत्पितृव्यःअमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः । अमुकगोत्रःअस्मन्मातुलः अमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः । अमुकगोत्रः अस्मद्भ्रातृअमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः । अमुकगोत्राअस्मत्पितृभगिनी अमुकदावसुरूपातृप्यतामिदंजलंतस्यैस्वधानमः । अमुकगोत्राअस्मन्मातृभगिनीअमुकदावसुरूपातृप्यतामिदंजलंतस्यैस्वधानमः । अमुकगोत्राअस्मद्भगिनी अमुकदावसुरू-

---

१ यदितस्यभार्यासुतोवामृतस्तर्हिसपत्नीकःससुतइत्यूहःकार्यः । २ यदितस्याभर्तासुतोवामृतस्तर्हिसभर्तृकाससुताइत्यूहःकार्यः ।

पातृप्यतामिदंजलंतस्यैस्वधानमः । अमुकगोत्रःअस्मच्छ्वशुरःअमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः । अमुकगोत्रःअस्मद्गुरुः अमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः । अमुकगोत्रःअस्मच्छिष्यः अमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः । अमुकगोत्रःअस्मन्मित्रंअमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मैस्वधानमः । अमुकगोत्रःअस्मदाप्तःअमुकशर्मावसुरूपस्तृप्यतामिदंजलंतस्मै स्वधानमः । अञ्जलिदानम्—येबान्धवाबान्धवायेयेऽन्यजन्मनिबान्धवाः । तेसर्वेतृप्तिमायान्तुमयादत्तेनवारिणा । आब्रह्मस्तम्बपर्यन्तंदेवर्षिपितृमानवाः । तृप्यन्तुपितरःसर्वेमातृमातामहादयः ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनाम् । आब्रह्मभुवनाल्लोकादिदमस्तुतिलोदकम् ॥ इत्यञ्जलित्रयंदद्यात् । वस्त्रंनिष्पीडनम्—येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः ॥ तेगृण्हंतुमयादत्तंवस्त्रनिष्पीडनोदकम् ॥ इतिमंत्रेणस्नानवस्त्रंचतुर्गुणंकृत्वाभूमौवामभागेनिष्पीडयेत् ॥ सव्येनद्विराचम्यपुनरपसव्यं ॥ दर्भत्यागः—येषांपितानचभ्रातानपुत्रोनान्यगोत्रिणः । तेसर्वेतृप्तिमायांतुमयोत्सृष्टैः-


---

१ यदितस्यभार्यासुतोवामृतस्तर्हिसपत्नीकःससुतइत्यूहःकार्यः ॥ २ यदितस्याभर्तासुतोवामृतस्तर्हिसभर्तृकाससुताइत्यूहःकार्यः ॥ ३ वस्त्रनिष्पीडितंतोयंस्नातस्योच्छिष्टभागिनः । भागधेयंश्रुतिःप्राहतस्मान्निष्पीडयेत्स्थले ॥ यावदेतानृषींश्चैवापितृंश्चापिनतर्पयेत् । तावन्नपीडयेद्वस्त्रंयेनस्नातोभवेन्नरः ॥ वस्त्रंचतुर्गुणीकृत्यपीडयेच्चजलाद्बहिः । वामप्रकोष्ठेनिक्षिप्यद्विराचम्यशुचिर्भवेत् ॥ एकादश्यां पंचदश्यांसंक्रमेश्राद्धवासरे । वस्त्रनिष्पीडनंतूष्णिनमंत्रेणकदाचन ॥

कुशैःसदा ॥ इतिमंत्रेणदर्भानुत्तरतःपरित्यजेत् ॥ सव्येनाचम्य । जलेब्रह्मादीनांपूजनम्—पात्रेशुद्धोदकंप्रपूर्यअनामिकयादर्भेणवाषड्-दलंकृत्वागन्धपुष्पैरर्चयेत् । ब्रह्मजज्ञानमित्यस्यप्रजापतिऋषिःत्रिष्टु-प्छन्दःब्रह्मादेवताब्रह्मपूजनेविनियोगः ॥ ॐब्रह्मयज्ञानम्प्रथमम्पु-रस्ताद्विसीमत?सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यविष्ठा?सतश्चयोनिमसतश्चविवः ÷ ॥ ३/१३ ॥ ब्रह्मणेनमःब्रह्माणंपूज-यामि ॥ इदंविष्णुरितिमेधातिथिऋषिःगायत्रीछन्दः विष्णुर्देवता विष्णुपूजनेविनियोगः ॥ ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ १/५ ॥ विष्णवेनमःविष्णुंपूजयामि ॥ नमस्तेतिपरमेष्ठीऋषिःगायत्रीछंदःरुद्रोदेवतारुद्रपूजनेविनियोगः ॥ ॐनमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः÷ ॥ बाहुभ्यामुततेनमः÷ ॥ १/६ ॥ रुद्रायनमःरुद्रंपूजयामि ॥ तत्सवितुरितिविश्वामित्रऋषिःगायत्रीछंदः सूर्योदेवतासूर्यपूजनेविनियोगः ॥ ॐतत्सवितुर्वरेण्यम्भर्गोदेवस्य-

---

१ षड्दलाकृतिर्यथा—



२ केचिदत्रअर्घ्यदानंकुर्वंतिपरंचप्राचीनग्रंथेषुपूजनमेवास्ति ॥ विकल्पेब्रह्म-णेनमःइत्युक्त्वागंधपुष्पयुक्तमर्घ्यंदद्यात्एवंसर्वत्रज्ञेयम् ।

धीमहि ॥ धियोयोनः÷प्रचोदयात् ॥ ३५/३ ॥ सवित्रेनमःसवितारं-पूजयामि ॥ मित्रस्येतिविश्वामित्रऋषिःगायत्रीछंदःमित्रोदेवता-मित्रार्चनेविनियोगः ॥ ॐमित्रस्यचर्षणीधृतोवोदेवस्यसानसि ॥ द्युम्नंचित्रश्रवस्तमम् ॥ ६२/२१ ॥ मित्रायनमःमित्रंपूजयामि ॥ इमंम-इत्यस्यशुनःशेपऋषिःगायत्रीछंदः वरुणोदेवतावरुणपूजनेविनियोगः ॥ ॐइमम्मेवरुणश्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ १/२१ ॥ वरुणायनमःवरुणंपूजयामि ॥ सूर्योपस्थानम्—अदृश्रमस्यकेतव-इतिप्रस्कण्वऋषिःगायत्रीछंदःसूर्योदेवताहꣳसःशुचिषदितिवामदेवऋ-षिःअतिजगतीछंदःसूर्योदेवतासूर्योपस्थानेविनियोगः ॥ उत्थाय-ऊर्द्ध्वबाहूसन्सूर्यमुपतिष्ठेत्—ॐअदृश्रमस्यकेतवोविरश्मयोजनाँ२-ऽअनु ॥ भ्राजन्तोऽअग्नयोयथा ॥ उपयामगृहीतोसिसूर्य्यायत्वा-ब्भ्राजायैषतेयोनिꣳसूर्य्यायत्वाब्भ्राजाय॥ सूर्य्यब्भ्राजिष्ठब्भ्राजिष्ठ-स्त्वन्देवेष्वसिब्भ्राजिष्ठोहम्मनुष्येषुभूयासम् ॥ ४०/८ ॥ हꣳस?-शुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृत-सद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥ ३४/१० ॥ सूर्य-प्रदक्षिणा—स्वयम्भूरसीत्यस्यप्रजापतिऋषिःयजुश्छन्दःसूर्योदेवता-सूर्यप्रदक्षिणीकरणेविनियोगः । ॐस्वयम्भूरसिश्रेष्ठोरश्मिर्वर्चोदाऽअसिवर्चोमेदेहि ॥ सूर्य्यस्यावृतमन्वावर्त्ते ॥ २६/३ ॥ इत्यनेन-प्रदक्षिणमावृत्य ॥ दिशांदेवतानांचनमस्काराः—ॐप्राच्यैदिशेनमः । ॐइन्द्रायनमः । ॐआग्नेय्यैदिशेनमः । ॐअग्नयेनमः । ॐदक्षि-णायैदिशेनमः । ॐयमायनमः । ॐनैर्ऋत्यैदिशेनमः । ॐनिर्ऋत-

येनमः । ॐप्रतीच्यैदिशेनमः । ॐवरुणायनमः । ॐवायव्यै-
दिशेनमः । ॐवायवेनमः । ॐउदीच्यैदिशेनमः । ॐसोमायनमः ।
ॐईशान्यैदिशेनमः । ॐईशानायनमः । ॐऊर्ध्वायैदिशेनमः ।
ॐब्रह्मणेनमः । ॐअवाच्यैदिशेनमः । ॐअनन्तायनमः ।
ततउपविश्य । नमस्कारपूर्वकमञ्जलिदानम्—ॐब्रह्मणेनमः ।
ॐअग्नयेनमः । ॐपृथिव्यैनमः । ॐओषधीभ्योनमः । ॐवाचे-
नमः । ॐवाचस्पतयेनमः । ॐविष्णवेनमः । ॐमहद्भ्योनमः ।
ॐअद्भ्योनमः । ॐअपांपतयेनमः ॥ ॐवरुणायनमः ॥ इतिदेवती-
र्थेनाञ्जलिदानपूर्वकंनमस्कृत्य । मुखविमार्जनम्—संवर्चसेतिपरमेष्ठी-
ऋषिःत्रिष्टुप्छंदःत्वष्टादेवतामुखमार्जनेविनियोगः ॥ ॐसंवर्चसा-
पयसासन्तनूभिरगन्महिमनसासꣳशिवेन ॥ त्वष्टासुदत्रोव्विदधा-
तुरायोनुमार्ष्टुतन्वोयद्विलिष्टम् ॥ १५ ॥ इतिमंत्रेणशुद्धोदकेनमुखं
विमृजेत् ॥विसर्जनम्—देवागातुविदइतिमनसस्पतिऋषिःविराट्छन्दः
वातोदेवताकर्मागदेवताविसर्जनेविनियोगः ॥ ॐदेवागातुविदोगातुं
वित्त्वागातुमित ॥ मनसस्पतऽइमन्देवयज्ञꣳस्वाहाव्वातेधाः ॥ २१ ॥
इतिविसृज्य। अर्पणम्—अनेनयथाशक्तिदेवऋषिमनुष्यपितृतर्पणाख्ये-
नकर्मणाभगवान्ममसमस्तपितृस्वरूपीजनार्दनवासुदेवःप्रीयतांनमम ।
ॐतत्सद्ब्रह्मार्पणमस्तु । श्रीगयागदाधरस्तृप्यतु । ॐविष्णवेनमः ।
ॐविष्णवेनमः । ॐविष्णवेनमः । इतितर्पणप्रयोगः ॥

---

१ केचिदत्रकेवलंनमस्कारार्पणंकुर्वन्तिपरंच " योगियाज्ञवल्क्यवचनादुद-
कदानसहितम् "इतिहरिहरभाष्यप्रामाण्यादुदकदानसहितंनमस्कारार्पणंकर्तव्यम् ।

॥ १८ ॥ अथवैश्वदेवप्रयोगः ॥

आचम्यप्राणानायम्य । कुशपवित्रधारणम्—ॐपवित्रेस्थो० सङ्कल्पः—अद्यपूर्वोच्चारितएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौमम गृहेपञ्चसूनाजनितसकलदोषपरिहारपूर्वकं नित्यकर्मानुष्ठानसिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंचतुर्भिर्यज्ञैःवैश्वदेवंकरिष्ये । अन्वाधानम्—तत्रब्रह्माणंप्रजापतिंगृह्याः कश्यपंअनुमतिंविश्वान्देवान् अग्निंस्विष्टकृतंपर्जन्यंअपःपृथिवीम्धातारं विधातारंवायुं चतुर्वारंप्राचींदिशंदक्षिणांदिशंप्रतीचींदिशंउदीचींदिशंब्रह्माणंअन्तरिक्षंसूर्यं विश्वान्देवान्विश्वानिभूतानिउषसंभूतानांचपतिंपितॄन्यक्ष्माणं सनकादिमनुष्यान्वैश्वदेवाख्येकर्मण्यहंयक्ष्ये। यथाविहिते ताम्रमयेकुण्डेस्थंडिले वा पञ्चभूसं-

---

१ वैश्वदेवसूत्रम्—वैश्वदेवादन्नात्पर्युक्ष्यस्वाहाकारैर्जुहुयाद्ब्रह्मणेप्रजापतयेगृह्याभ्यःकश्यपायानुमतयइति । भूतगृह्येभ्योमणिकेत्रीन्पर्जन्यायाद्भ्यःपृथिव्यै । धात्रेविधात्रेचद्वार्ययोः । प्रतिदिशंवायवेदिशांच । मध्येत्रीन्ब्रह्मणेऽन्तरिक्षायसूर्याय । विश्वेभ्योदेवेभ्योविश्वेभ्यश्चभूतेभ्यस्तेषामुत्तरतः । उषसेभूतानांचपतयेपरं । पितृभ्यःस्वधानमइतिदक्षिणतः । पात्रंनिर्णिज्योत्तरापरस्यांदिशिनिनयेद्यक्ष्मैतत्तइति । उद्धृत्याग्रंब्राह्मणायावनेज्यदद्याद्धंततइति । यथार्हमिक्षुकानतिथींश्चसंभजेरन् । बालज्येष्ठागृह्यायथार्हमश्नीयुः । पश्चाद्गृहपतिःपत्नीच । पूर्वोवागृहपतिः । तस्मादुस्वादिष्टंगृहपतिःपूर्वोऽतिथिभ्योऽश्नीयादितिश्रुतेः । अहरहःस्वाहाकुर्यादन्नाभावेकेनचिदाकाष्टादेवेभ्यःपितृभ्योमनुष्येभ्यश्चोदपात्रात् ॥

स्काराः—दर्भैःपरिसमुह्य ३ गोमयोदकेनउपलिप्य ३ वज्रेणोल्लिख्य ३ अनामिकाङ्गुष्ठाभ्यामुद्धृत्य ३ उदकेनाभ्युक्ष्य ३ अग्न्यानयनम्—अन्वग्निरित्यस्यपुरोधाऋषिः त्रिष्टुप्छन्दःअग्निर्देवताअग्न्यानयनेविनियोगः। ॐअन्वग्निरुषसामग्रमक्रख्यदन्वहानिप्रथमोजातवेदाः॥ अनुसूर्यस्यपुरुत्राचरंरुम्मीननुद्यावापृथिवीऽआततंथ॥ १७/१९॥ इत्यनेन पाकशालायाःलौकिकाग्निमादाय ॥ स्थापनम्—पृष्ठोदिवीतिमंत्रस्यकुत्सऋषिः त्रिष्टुप्छन्दः अग्निर्देवतास्थापनेविनियोगः। ॐपृष्ठोदिविपृष्ठोऽअग्निःपृथिव्यांपृष्ठोविश्वाऽओषधीराविवेश ॥ वैश्वानरःसहसापृष्ठोऽअग्निःसनोदिवासरिषस्पातुनक्तम् ॥ ७३/१८॥ प्रज्वलनम्—तत्सवितुरित्यस्यविश्वामित्रऋषिःगायत्रीछन्दःसवितादेवताताऽसवितुरित्यस्यकण्वऋषिःत्रिष्टुप्छन्दःसवितादेवताविश्वानिदेवेत्यस्यनारायणऋषिःगायत्रीछन्दःसवितादेवतासर्वेषांअग्निप्रज्वलनेविनियोगः। ॐतत्सवितुर्व० ॥ ३५/३॥ ॐताऽसवितुर्वरेण्यस्यचित्रामाहंवृणेसुमतिं-

---

१ निरग्निकस्यविशेषःकात्यायनपरिशिष्टसूत्रे—अथातोधर्मजिज्ञासाकेशान्तादूर्ध्वमपत्नीकउत्सन्नाग्निरनग्निकोवाप्रवासीवाब्रह्मचारीवाऽन्वग्निरितिग्रामादग्निमाहृत्यपृष्ठोदिवीत्यधिष्ठाप्यत्रिभिश्चसावित्रैः प्रज्वाल्यताꣳसवितुस्तत्सवितुर्विश्वानिदेवसवितारितिपूर्ववदक्षतैर्हुत्वापाकंपचेत्। तत्रवैश्वदेवोब्रह्मणेप्रजापतयेगृह्याभ्यःकश्यपायानुमतयेविश्वेभ्योदेवेभ्योऽग्नयेस्विष्टकृतइत्युपस्पृश्यपूर्ववद्बलिकर्मणैवंकृतेनवृथापाकोभवतिनवृथापाकंपचेन्नवृथापाकमश्नीयात्।

विश्वजन्याम् ॥ यामस्यकण्वोऽअदुहत्प्रपीनाꣳसहस्रधाराम्पर्यसामहीङ्गाम् ॥ ७४/१७ ॥ ॐविश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ३/२० ॥ एतैर्मन्त्रैःवेणुनलिकयाग्निंप्रज्वाल्य[1] । ध्यानम्—चत्वारिशृंगेत्यस्यगौतमऋषिःत्रिष्टुप्छन्दः यज्ञपुरुषोदेवता-ध्यानेविनियोगः—ॐचत्वारिशृङ्गात्रयोऽअस्यपादाद्वेशीर्षेसप्तहस्तासोऽअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याँ२आविवेश ॥ ९१/१७ ॥ अनेनमंत्रेणध्यात्वा । आवाहनम्—एषोहदेवेत्यस्य-ब्रह्मस्वयंभूऋषिःत्रिष्टुप्छन्दःआत्मादेवताआवाहनेविनियोगः—ॐएषोहदेव?प्रदिशोनुसर्व्वाꣳपूर्व्वोहजात?सऽउगर्भेऽअन्त? ॥ सऽएवजात?सजनिष्यमाणꣳप्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखꣳ ॥ ४/३२ ॥ पावकनामानमग्निंआवाहयामि । पूजनम्—अग्निर्मूर्धेत्यस्यविरूपाक्षऋषिःगायत्रीछन्दःअग्निर्देवतापूजनेविनियोगः । ॐअग्निर्म्मूर्द्धादिव?ककुत्पतिःपृथिव्याऽअयम् ॥ अपाꣳरेताꣳसिजिन्वति ॥ १२/३ ॥ पावकनामाग्नयेनमःगन्धाक्षतपुष्पाणिसमर्पयामि । नमस्कारः—मुखंयःसर्वदेवानांहव्यभुक्कव्यभुक्तथा । पितॄणांचनमस्तस्मैविष्णवेपावकात्मने ॥ इतिनमस्कृत्य । प्रार्थना—अग्नेशांडिल्यगोत्रअरणिमातःवरुणपितःउत्तानकुक्षेललाटजिह्वमेषध्वजप्राङ्मुखममसम्मुखोभव ॥

---

१ शक्तश्चेदग्निंप्रज्वाल्यपूर्ववदक्षंतर्हुत्वापाकंपचेत् । तेनपाकेनवैश्वदेवःकार्यः । अशक्तश्चेत्सिद्धपाकादन्नमुद्धृत्यवैश्वदेवंकुर्यात् । यस्मिन्नग्नौभवेत्पाकोवैश्वदेवंतुतत्रवै ।

इतिसंप्रार्थ्यप्रदक्षिणमग्नेःपर्युक्षणंइतरथावृत्तिः ॥ ततःसिद्धपाकादन्नमुद्धृत्यघृतेनाभिघार्य । दक्षिणजानुनिपातनंकृत्वावामहस्तेनहृदयंस्पृशन्अङ्गुल्यग्रस्थदेवंतीर्थेनप्रज्वलितेऽग्नौबदरीफलप्रमाणाआहुतीर्जुहुयात्यथा—ॐब्रह्मणेस्वाहाइदंब्रह्मणेनमम ॐप्रजापतयेस्वाहाइदंप्रजापतयेनमम ॐगृह्याभ्यःस्वाहाइदंगृह्याभ्योनमम ॐकश्यपायस्वाहाइदंकश्यपायनमम ॐअनुमतयेस्वाहा इदंअनुमतयेनमम ॐविश्वेभ्योदेवेभ्यःस्वाहा इदंविश्वेभ्योदेवेभ्योनमम । ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृतेनमम । इतिदेवयज्ञःप्रथमः । ततोमणिकसमीपेप्राक्संस्थंबलित्रयंदद्यात्—१ॐपर्जन्यायनमःइदंपर्जन्यायनमम २ ॐअद्भ्योनमः इदंअद्भ्योनमम ३ ॐपृथिव्यैनमः


---

१ उत्तानेनतुहस्तेनह्यङ्गुष्ठाग्रेणपीडितम् । संहताङ्गुलिपाणिस्तुवाग्यतोजुहुयाद्धविः॥ २ ॐभूःस्वाहाइदमग्नयेनमम ॐभुवःस्वाहाइदंवायवेनमम ॐस्वःस्वाहाइदंसूर्यायनमम ॐभूर्भुवःस्वःस्वाहाइदंप्रजापतयेनमम ॐदेवकृतस्यैनसोवयजनमसिस्वाहाइदमग्नयेनमम ॐमनुष्यकृतस्यैनसोवयजनमसिस्वाहाइदमग्नयेनमम ॐपितृकृतस्यैनसोवयजनमसिस्वाहाइदमग्नयेनमम ॐआत्मकृतस्यैनसोवयजनमसिस्वाहाइदमग्नयेनमम ॐएनसऽएनसोवयजनमसिस्वाहाइदमग्नयेनमम ॐयच्चाहमेनोविद्वाँश्चकारयच्चाविद्वाँस्तस्यसर्वस्यैनसोवयजनमसिस्वाहाइदमग्नयेनमम ॐप्रजापतयेस्वाहाइदंप्रजापतयेनमम ॐअग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृतेनमम । एताआहुतयःकेषुचित्पुस्तकेषुदृश्यन्तेपरंचसूत्रेनोक्ताःतत्रमूलंमृग्यम् ।

इदंपृथिव्यैनमम। ततोग्नेःपश्चाज्जलेनवितस्तिमानंमंडलंकृत्वातत्रगृहद्वारशाखेप्रकल्प्यबलिहरणंकुर्यात्। द्वारशाखयोर्दक्षिणोत्तरयोर्बलिद्वयं १ ॐधात्रेनमः इदंधात्रेनमम २ ॐविधात्रेनमः इदंविधात्रेनमम। प्राचीमारभ्यप्रतिदिशंप्रदक्षिणंबलिचतुष्टयं—३ ॐवायवेनमः इदंवायवेनमम ४ ॐवायवेनमः इदंवायवेनमम ५ ॐवायवेनमः इदंवायवेनमम ६ ॐवायवेनमः इदंवायवेनमम। ततःपूर्वतःक्रमात् ७ ॐप्राच्यैदिशेनमः इदंप्राच्यैदिशेनमम। ८ ॐदक्षिणायैदिशेनमः इदंदक्षिणायैदिशेनमम ९ ॐप्रतीच्यैदिशेनमः इदंप्रतीच्यैदिशेनमम १० ॐउदीच्यैदिशेनमः इदंउदीच्यैदिशेनमम। तेषांमध्ये-

---

१ बलिहरणमण्डलम्



प्राक्संस्थं ११ ॐब्रह्मणेनमः इदंब्रह्मणेनमम १२ ॐअन्तरिक्षाय-नमः इदमन्तरिक्षायनमम १३ ॐसूर्यायनमः इदंसूर्यायनमम । तेषामुत्तरे-१४ ॐविश्वेभ्योदेवेभ्योनमः इदंविश्वेभ्योदेवेभ्योनमम । १५ ॐविश्वेभ्योभूतेभ्योनमः इदंविश्वेभ्योभूतेभ्योनमम ॥ अनयो-रुत्तरे—१६ ॐउषसेनमः इदमुषसेनमम १७ ॐभूतानांपतयेनमः इदंभूतानांपतयेनमम । इतिभूतयज्ञोद्वितीयः । ततोदेवानांनैवेद्यार्पणम्—देवसन्मुखपवित्रस्थलेचतुरस्रमंडलोपरिनैवेद्यपात्रं सोपस्करं निधाय ॐनमोभगवतेवासुदेवायेतिमंत्रेणपात्रसमन्ताज्जलधारयापङ्क्तिवारणं-कुर्यात् । तदनंगायत्रीमंत्रेणतुलसीदलेनसम्प्रोक्ष्यनैवेद्योपरितत्तुल-सीदलंनिधायधेनुमुद्रांप्रदर्श्यसव्यहस्तस्याङ्गुलयःसमानाः कृत्वानैवे-द्यमर्पयेत्-ॐप्राणायस्वाहा ॐअपानायस्वाहा ॐव्यानायस्वाहा ॐसमानायस्वाहा ॐउदानायस्वाहा इतिसमर्प्य नैवेद्यमध्येपानीयं समर्पयामि उत्तरापोशनंसमर्पयामि हस्तप्रक्षालनंसमर्पयामि मुखप्र-क्षालनंसमर्पयामि करोद्वर्तनार्थेचन्दनंसमर्पयामि मुखवासार्थेताम्बूलं समर्पयामि एवंदेवतानैवेद्यंकृत्वा ॥ अथपितृयज्ञस्तृतीयः । तत्रप्राची-नावीतीभूत्वादक्षिणाभिमुखः सव्यंजान्वाच्यब्रह्मादिबलित्रयस्यद-क्षिणप्रदेशेपितृतीर्थेन—१८ ॐपितृभ्यःस्वधानमः इदंपितृभ्यो नमम । इतिपितृयज्ञः । सव्यम्—ततस्तत्पात्रंप्रक्षाल्यतज्जलंब्रह्मादि-

---

१ इदंक्षेपकंसूत्रकारैःप्रयोगेनोक्तम् । केचनपितृयज्ञोत्तरंदेवतानैवेद्यंकुर्व-न्तितत्रमूलंमृग्यम् ।

बलितोवायव्यांदिशिउत्सृजेत्—१९ ॐयक्ष्मैतत्तेनिर्णेजनंनमः इदं-यक्ष्मणेनमम । पूर्वमकृतश्चेदत्रब्रह्मयज्ञःकार्यः । अथमनुष्ययज्ञश्चतुर्थः—अतिथिप्राप्तौभोजनपर्याप्तमन्नंषोडशग्रासमितंवा अतिथेरभावेग्रासचतुष्टयंग्रासमितंवानिवीत्युदङ्मुखः प्राजापत्येनतीर्थेन—२० ॐहन्ततेसनकादिमनुष्येभ्योनमः इदंसनकादिमनुष्येभ्योनमम । इतिमनुष्ययज्ञः । गोग्रासादिसमर्पणम्—सौरभेय्यःसर्वहिताःपवित्राः-पुण्यराशयः । प्रतिगृह्णन्त्विमंग्रासंगावस्त्रैलोक्यमातरः ॥ इदंगोभ्योनमम । ततोगृहाद्बहिर्भूमावपआसिच्य—ऐंद्रवारुणवायव्याः सौम्यावैनैर्ऋतास्तथा । वायसाःप्रतिगृह्णन्तुभूमौपिण्डंमयाऽर्पितम् । इदंवायसेभ्योनमम । द्वौश्वानौश्यामशबलौवैवस्वतकुलोद्भवौ । ताभ्यामन्नंप्रदास्यामिस्यातामेतावहिंसकौ ॥ इतिश्वभ्यांनमम । पिपीलिकाःकीटपतंगकाद्याबुभुक्षिताःकर्मनियोगबद्धाः । तृप्त्यर्थमन्नंहिमयाप्रदत्तंतेषामिदंतेमुदिताभवन्तु ॥ इदमन्नंपिपीलिकादिभ्यो-

---

१ पंचमःब्रह्मयज्ञःनित्यतर्पणात्पूर्वंनकृतश्चेद्वैश्वदेवसङ्कल्पेपंचमहायज्ञैरहंयक्ष्येइत्यूहंकृत्वाऽत्रकार्यः । हन्तकारात्पूर्वंब्रह्मयज्ञस्यावसरःतत्रविकल्पः—प्रातर्होमानंतरंवातर्पणात्पूर्ववावैश्वदेवावसानेवाब्रह्मयज्ञइतिहरिहरः । कात्यायनः—यश्चश्रुतिजपःप्रोक्तोब्रह्मयज्ञस्तुसस्मृतः। सचार्वाक्तर्पणात्कार्यःपश्चाद्वाप्रातराहुतेः॥ केचित्प्रयोगेऽत्रब्रह्मयज्ञसिद्ध्यर्थंतिस्रोगायत्रीर्जपेदित्युक्तंतन्नसम्यग्भातितत्रप्रमाणम्—ब्रह्मयज्ञःएकस्मिन्नहनिसकृदेवकार्यःतदाह—नहन्ततिंनहोमंचस्वाध्यायंपितृतर्पणम्। नैकःश्राद्धद्वयंकुर्यात्समानेहनिकुत्रचित् ॥

नमम। पादौप्रक्षाल्याचम्यगृहमागत्यवैश्वदेविकंभस्मत्र्यायुषमित्यनेनमंत्रेणयथास्थानंधारयेत् । श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलम् । आयुष्यंतेजआरोग्यंदेहिमेहव्यवाहन ॥ इतिनमस्कृत्यगन्धधारणम्—ॐसुचक्षाअहमक्षिभ्याम्भूयासंसुवर्चामुखेन । सुश्रुत्कर्णाभ्यांभूयासम् । अग्निविसर्जनम्–ॐयज्ञंयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिंगच्छस्वाहा ॥ एषतेयज्ञोयज्ञपतेसहसूक्तवाकःसर्ववीरस्तुष्वस्वाहा ॥ २२/८ ॥ इतिविसृज्यकुशपवित्रत्यागंकृत्वाअर्पणम्–अनेनवैश्वदेवाख्येनकर्मणायज्ञस्वरूपीपरमेश्वरःप्रीयतांनमम । प्रमादात्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत् । स्मरणादेवतद्विष्णोःसंपूर्णस्यादितिश्रुतिः ॥ यस्यस्मृत्याचनामोक्त्यातपोयज्ञक्रियादिषु । न्यूनंसंपूर्णतांयातिसद्योवन्देतमच्युतम् ॥ विष्णवेनमोविष्णवेनमोविष्णवेनमः ॥ इतिवैश्वदेवप्रयोगः ॥ प्राग्दत्तंबलिंगवादिभ्योर्पयेत् ॥

॥ १९ ॥ अथ भोजनविधिः ।

पाणिपादौप्रक्षाल्यभोजनशालायामागत्यगोमयोपलिप्तेशुचौदेशेविहितपीठासनेप्राङ्मुखःप्रत्यङ्मुखोवाउपविश्यदक्षिणेधृतजलपात्रो-

---

१ स्नात्वाप्रक्षाल्यपादौचस्निग्दान्नालङ्कृतःशुचिः । वैश्वदेवावशिष्टंचयोभुङ्क्तेसोमृताशनः ॥ सायंप्रातर्द्विजातीनामशनंश्रुतिनोदितम् । नान्तराभोजनंकुर्यादग्निहोत्रसमोविधिः । श्रुतिः—दिवारात्रंवोभोजनमिति । २ गोशकृन्मृण्मयंभिन्नंतथापालाशपिप्पलम् । लोहबद्धंतथैवार्कंवर्जयेदासनंबुधः ॥ ३ उपलिप्तेशुचौदेशेपादौप्रक्षाल्यवाग्यतः । प्राङ्मुखोऽन्नंतुभुञ्जीतशुचिःपीठमधिष्ठितः ॥ पुत्रवांस्तुगृहेनित्यंनाश्नीयादुत्तरामुखः । सोमवारेतथाभ्यङ्गंवर्जयेत्तुसदाबुधः ॥

हस्तपादास्येषुपञ्चस्वार्द्रोअन्तर्जानुकरःस्वपुरतोवितस्तिमात्रंचतुष्कोणंमंडलंजलेनकृत्वातदुपरिसुवर्णादिविहितपात्रंरंभामध्वाम्रजम्बुपनसपद्मोदुम्बरपालाशपत्राणांमध्येअन्यतमपत्ररचितांपत्रावलिंनिधायतत्र-

---

१ पञ्चार्द्रोभोजनंकुर्यात्प्राङ्मुखोमौनमाश्रितः । हस्तौपादौतथैवास्यमेषुपञ्चार्द्रतामता ॥ नस्पृशेद्वामहस्तेनभुञ्जानोऽन्नंकदाचन । नपादौनशिरोबर्स्तिनपदाभाजनंस्पृशेत् ॥ २ भोजनंहवनंदानमुपहारःप्रतिग्रहः । बहिर्जानुनकार्याणितद्वदाचमनंस्मृतम् ॥ ३ वितस्तिमात्रंचतुरङ्गुलंवाकोणैश्चतुर्भिर्विदधीतमण्डलम् । प्राणाग्निहोत्रार्थमिदंसमुक्तंमहानुभावेनहिहारितेन ॥ आदित्यावसवोरुद्राब्रह्माचैवपितामहः । मण्डलेतूपजीवन्तितस्मात्कुर्वीतमण्डलम् ॥ उपलिप्तेसमेस्थानेशुचौश्लक्ष्णसमन्विते । चतुरस्रंत्रिकोणंचवर्तुलंचार्द्धचन्द्रकम् ॥ कर्तव्यमानुपूर्व्येणब्राह्मणादिषुमण्डलम् ॥ यातुधानापिशाचाश्चक्रूराश्चैवतुराक्षसाः । हरन्तिरसमन्नंचमण्डलेनविवर्जितम् ॥ ४ सूत्रेतुविकल्पेनभस्मनापिमण्डलंकर्तव्यमित्युक्तं ॥ तत्रमन्त्रः—यथाचक्रायुधोविष्णुस्त्रैलोक्यंपरिरक्षति । एवंमण्डलभस्मैतत्सर्वभूतानिरक्षतु ॥ ५ सौवर्णेराजतेचैवपद्मपालाशपत्रयोः । भाजनेभोजनेचैवत्रिरात्रंफलमश्नुते ॥ भूमौपात्रंप्रतिष्ठाप्ययोभुङ्क्तेवाग्यतःशुचिः । भोजनेभोजनेचैवत्रिरात्रंफलमश्नुते ॥ ब्रह्मपत्रेषुयोभुङ्क्तेमासमेकंनिरंतरम् । चान्द्रायणसमंपुण्यंकृतस्यापिचतुर्गुणम् ॥ वर्ज्यपात्राणि—मृण्मयेपत्रपृष्ठेवाआयसेताम्रभाजने । नाश्नीयादपिचेद्भुक्तेनरकंप्रतिपद्यते ॥ वटार्काश्वत्थपत्रेषुकुम्भीतिन्दुकजेषुच । श्रीकामोनतुभुञ्जीतकोविदारकरञ्जयोः ॥ आयसेनतुपात्रेणयदन्नमुपदीयते । तदन्नमपवित्रंस्यात्याज्यंवैसर्वकर्मणि ॥

ग्राह्यविधिंवक्ष्यामः[1] मध्येभक्ष्यभोज्यंवामतःघृतपायसंदक्षिणेशाकादीन्पुरतःपरिवेष्यप्राञ्जलिःअन्नंप्रणमेत्—अस्माकंनित्यमस्त्वेतत् इतिभक्त्यावन्दयित्वा पङ्क्तिवारणम्[2]—ॐ नमोभगवतेवासुदेवाय इतिमंत्रेण दक्षिणतः पात्रसमन्ताज्जलधारांकुर्यात्। अन्नस्तुतिः—ॐपितुन्नुस्तोषम्महोधर्म्माणन्तविषीम् ॥ यस्यत्रितोव्योजसावृत्रंविपर्व्वमर्दयत् ॥ ३/१४ ॥ इत्यन्नंस्तुत्वाअभिमन्त्रणम्—ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥ १६/१६ ॥ नमोवःकिरिकेभ्योदेवानाᳬहृदयेभ्योनमोविचिन्वत्केभ्यो नमोविक्षिणकेभ्योनमऽआनिर्हतेभ्यः ॥ ४६/१६ ॥ नमःशम्भवायचमयोभवायचनमःशङ्कायचमयस्कायचनमःशिवायचशिवतरायच ॥ ५१/१६ ॥ एतैर्मन्त्रैरभिमंत्र्यप्रोक्षणम्—ॐसत्यंत्वर्तेनपरिषिंचामि। इतिदिवा। रात्रौतु—ऋतंत्वासत्येनपरिषिञ्चामि। इतिमन्त्रेणान्नंप्रोक्ष्य। अन्नाभिस्पर्शनम्—ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्ट-

---

१ शाकादीन्पुरतःस्थाप्यभक्ष्यभोज्यंचवामतः। अन्नंमध्येप्रतिष्ठाप्यदक्षिणेघृतपायसम् ॥ २ अन्नंदृष्ट्वाप्रणम्यादौप्राञ्जलिंकारयेत्ततः। अस्माकंनित्यमस्त्वेतदितिभक्त्याथवन्दयेत् ॥ ३ एकपंक्त्युपविष्टानांदुष्कृतंयद्दुरात्मनः। सर्वेषांतत्समंतेषांयावत्पंक्तिर्नभिद्यते ॥ एकपंक्त्युपविष्टानांविप्राणांसहभोजने। यद्येकोऽपित्यजेत्पात्रंशेषमन्नंनभोजयेत् ॥ करमध्येस्थितादेवाःकरपृष्ठेतुराक्षसाः। तस्मात्तुकरपृष्ठेननान्नंकुर्यात्प्रदक्षिणम् ॥

न्देवयजनमसि ॥ ३१/१ ॥ इत्यनेनान्नमभिमृश्यआत्मन्यग्निध्यानम्—ॐअग्निरस्मिन्जन्मन्नाजातवेदाःपृथुम्मेचक्षुरमृतम्मऽआसन् ॥ अर्कस्त्रिधातूरजसोविमानोजस्रोघर्म्महविरस्मिनाम ॥ ६६/१८ ॥ इत्यात्मानमग्निंध्यात्वादक्षिणतोभुविउदकधारांप्राक्संस्थांकृत्वातत्रभोजनपात्रात्घृताक्तमोदनंगृहीत्वाबलित्रयंदद्यात्—ॐ भूपतयेस्वाहानमः ॐभुवनपतयेस्वाहानमः ॐभूतानांपतयेस्वाहानमः । इतिबदरीफलप्रमाणंबलित्रयंप्राक्संस्थंदत्वाआपोऽशनम्—सव्यहस्तेजलंगृहीत्वा—अन्नंब्रह्मरसोविष्णुर्भोक्तादेवोमहेश्वरः । एवंध्यात्वाद्विजोभुंक्तेसोन्नदोषैर्नलिप्यते ॥ अन्तश्चरतिभूतेषुगुहायांविश्वतोमुखः । त्वंब्रह्मत्वंयज्ञस्त्वंवषट्कारस्त्वमोंकारस्त्वंविष्णोःपरमंपदम् । ॐअमृतोपस्तरणमसिस्वाहा । इतिमंत्रेणविष्णुमभिध्यायन्निःशब्दंतज्जलं पिबेत् । प्राणाहुतयः—वामहस्तेनभोजनपात्रमालभ्यअन्नममृतंध्यायन्मौनीहस्तचापल्यादिरहितोघृताक्तौदनस्यबदरीफलप्रमाणाः पञ्च-

---

१ आपोशनमकृत्वातुयोभुंक्तेनापदिद्विजः । भुञ्जानोवातथाब्रूयाद्गायत्र्यष्टशतंजपेत् ॥ २ अमृतोपस्तरणमसिस्वाहेत्यपःपिबेत् । करेणसलिलेविष्णुंध्यात्वाब्रह्मपिबेदपः ॥ ३ वामेनपाणिनापात्रंसंस्पृष्ट्वाभुविसंस्थितम् । ब्राह्मणोभोजनंकुर्यात्प्राणाग्निहोत्रपूर्वकम् ॥ प्राणाग्निहोत्रंजुहुयाच्छेषंभुङ्क्तेद्विजोत्तमः । स्वाहान्ताःप्राणवाद्याश्चनामान्नामंत्राःप्रकीर्तिताः । जिह्वयाचग्रसेदन्नंदन्तान्तैस्तन्नसंस्पृशेत् । अनिंद्यंभक्षयेदन्नंवाग्यतोऽन्नमकुत्सयन् । पञ्चग्रासान्महामौनंप्राणाद्यांश्चसमाचरेत् ।

प्राणाहुतीर्मुखेजुहुयात्—यथातर्जनीमध्यमाङ्गुष्ठैः-ॐप्राणायस्वाहा। मध्यमाऽनामिकाङ्गुष्ठैः—ॐअपानायस्वाहा। कनिष्ठानामिकाङ्गुष्ठैः—ॐव्यानायस्वाहा। कनिष्ठातर्जन्यङ्गुष्ठैः—ॐसमानायस्वाहा। साङ्गुष्ठाभिःसर्वाभिरङ्गुलीभिः—ॐउदानायस्वाहा।ततोवामहस्तंप्रक्षाल्यतेननेत्रयोरुदकस्पर्शनम्। शिखामुक्तिः—ब्रह्मपाशसहस्रेणरुद्रशूलशतेनच। विष्णुचक्रसहस्रेणशिखामुक्तिंकरोम्यहम्॥ इत्यनेनशिखांविमुच्यपाणिकर्म नम्मुखशब्दंचअकुर्वन्प्राक्द्रवरूपं मध्येकठिनं अन्तेपुनर्द्रवंरूपंधुरंपूर्वंलवणाम्लेमध्येकटुतिक्तादिकान्पश्चाद्यथासुखंभुञ्जीत। पादुकास्थःवेष्टितशिराअर्द्धरात्रेचभोजनंवर्जयेत्। लवणव्य-

---

१ प्राणाग्निहोत्रेऽग्निनामानि—मुखेआहवनीयः। हृदिगार्हपत्यः। नाभौदक्षिणाग्निः। दक्षिणेआवसथ्यः। उत्तरेसभ्यः। फलम्—प्राणाऽग्निहोत्रंवक्ष्यामिसर्वयज्ञेषुदुर्लभम्। यज्ज्ञात्वामुच्यतेजन्तुर्जन्ममृत्युजरादिभिः॥ विधिनाभुज्यतेयेनमुच्यतेचऋणत्रयात्। कुलानुद्धरतेविप्रोनरकानेकविंशतिः॥ हृत्पुंडरीकमरणिंमनोन्मथनसंज्ञकम्। वायुरज्ज्वामथेदग्निमात्माध्वर्युःप्रकीर्तितः॥ २ स्नानेचभोजनेचैवतथामूत्रपुरीषयोः। मैथुनेचशवस्कंधेशिखांषट्सुविसर्जयेत्॥ ३ प्राग्द्रवंपुरुषोऽश्नीयान्मध्येचकठिनाशनः। अन्तेपुनर्द्रवाशीतुबलारोग्यैर्नमुञ्चति॥ ४ अश्नीयात्तन्मनाभूत्वापूर्वंतुमधुरान्नकम्। लवणाम्लौतथामध्येकटुतिक्तादिकंततः॥ ५ पादुकास्थोनभुञ्जीतपर्यंकेसंस्थितोऽपिवा। शुनाचाण्डालदृष्टोवाभोजनंपरिवर्जयेत्॥ ६ योभुङ्क्तेवेष्टितशिरायस्तुभुङ्क्तेविदिङ्मुखः। सोपानत्कश्चयोभुङ्क्तेसर्वंविद्यात्तदासुरम्॥ ७नार्धरात्रेनमध्याह्नेनाजीर्णेनार्द्रवस्त्रधृक्। नचभिन्नासनगतोनशयानःस्थितोऽपिवा। नोपानत्पादुकीचापिनचसंविलपन्नपि॥

अन्नादीनिहस्तदत्तानिनभक्षयेत्। घृतंतैलंचनखनिसृतंनभुञ्जीत। केशरोमनखैर्दूषितंत्यजेत्। अतिभोजनंशूद्रान्नंभोजनंचनकर्तव्यम्। जलंवामहस्तेधृत्वादक्षिणमणिबंधेनिधायपिबेत्। भोजनंकुर्वन्नश्नंतंनस्पृशेत्। एवंघृतपायसवर्जितंसर्वसशेषंभुक्त्वा। चित्राहुतिः-सर्वस्माद्भुक्तशेषात्किञ्चित्किञ्चिद्गृहीत्वाअवघ्रायं-मद्भुक्तोच्छिष्टशेषंयेभुंजन्तिपितरोऽधमाः। तेषामन्नंमयादत्तमक्षय्यमुपतिष्ठतु। इतिमंत्रेणपितृतीर्थेनदक्षिणतोदद्यात्।उत्तरापोशनम्-ॐअमृतापिधानमसिस्वाहा।

---

१ लवणंव्यंजनंचैवघृतंतैलंतथैवच। लेह्यंपेयंचविविधंहस्तदत्तंनभक्षयेत्॥ हस्तदत्तानिचान्नानिप्रत्यक्षंलवणंतथा। वर्जनीयंप्रयत्नेनब्राह्मणेनविशेषतः॥ २ घृतंवायदिवातैलंब्राह्मणोनखनिःसृतम्। नभुञ्जीतनदद्याच्चभुक्त्वापादंसमाचरेत्॥ दर्व्यादेयंश्रृतान्नंचसमस्तंव्यञ्जनादिकम्। अपक्वस्नेहपक्वंचनतुदर्व्याकदाचन॥ ३ विशुद्धमपिचाहारंमक्षिकाकृमिजन्तुभिः। केशरोमनखैर्वापिदूषितंपरिवर्जयेत्॥ ४ अनारोग्यमनायुष्यमस्वर्ग्यमतिभोजनम्। अपुण्यंलोकविद्विष्टंतस्मात्तत्परिवर्जयेत्॥ जठरंपूरयेदर्धमन्नैर्भागंजलस्यच। वायोःसंचारणार्थायचतुर्थमवशेषयेत्॥ ५ अमृतंब्राह्मणस्यान्नंक्षत्रियान्नंपयःस्मृतम्। वैश्यस्यचान्नमेवान्नंशूद्राणामधमंस्मृतम्॥ ६ वामहस्तेजलंधृत्वामाणिबंधेनिधायच। भुञ्जमानःपिबन्वारिनोच्छिष्टंमनुरब्रवीत्॥ ७ यःपुनर्भोजनंकुर्वन्नश्नन्तंसंस्पृशेद्द्विजः। ततस्तेननभोक्तव्यंभुक्त्वाचान्द्रायणंचरेत्॥ ८ सर्वसशेषमश्नीयाद्घृतपायसवर्जितम्। अग्राङ्गुलिषुतच्छेषंनिधायभोजनोत्तरम्॥ ९ भुक्तोच्छिष्टसमाघ्रायसर्वेभ्योघृतवर्जितम्। उच्छिष्टभागधेयेभ्यःसोदकंनिर्वपेद्भुवि॥ १० अमृतापिधानमसीत्यपःप्राश्यमुविक्षिपेत्। अनन्तरंशिखांचैवबध्नीयाद्वामपाणिना॥

इत्यनेनहस्तेगृहीतानामपामर्द्धंपीत्वा–रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम् । अर्थिनांसर्वभूतानामक्षय्यमुपतिष्ठतु ॥ इत्यनेनमंत्रेणपीतशेषंउदकंउच्छिष्टान्नचित्राहुतौपितृतीर्थेनानिक्षिपेत् । ततस्तूष्णींवामपाणिनाशिखांबद्धाबलिंचित्राहुतिंचादायोत्थायतदन्नंकाकेभ्योविसृज्यमृज्जलाभ्यांहस्तौमुखंचसम्यक्प्रक्षालयेत् । काष्ठेनशलाकयातर्जनीवर्ज्याङ्गुलिनावादन्तान्संशोध्यषोडशगंडूषान्कृत्वास्मरेत्—अङ्गुष्ठमात्रःपुरुषोअङ्गुष्ठंचसमाश्रितः । ईशःसर्वस्यजगतःप्रभुःप्रीणातु विश्वभुक् ॥ नाभेरालभनम्–ॐश्वात्रा?पीताभवतयूयमापोऽअस्माकमन्तरुदरेसुशेवा८ ॥ ताऽअस्मभ्यमयक्ष्माऽअनमीवाऽअनागस८स्वदन्तुदेवीरमृताऽऋतावृधः ॥ १३/४ ॥ ततउदरालम्भनम्–अगस्त्यंवैनतेयंचशनिंचवडवानलम् । अन्नस्यपरिणामार्थंस्मरेद्भीमंचपञ्चमम् ॥ आतापीभारितोयेनवातापीचनिपातितः । समुद्रःशोषितोयेनसमेऽगस्त्यःप्रसीदतु ॥ इत्युदरंपरिमृज्यस्मरणम्—शर्यातिंचसुकन्यांचच्यवनंशक्रमश्विनौ । भोजनान्तेस्मरेन्नित्यंतस्यचक्षुर्नहीयते । इतिस्मृत्वानिर्माल्यतुलसीपत्रंभक्षयित्वाततस्ता-

---

१ जलपूर्णाञ्जलिंकृत्वापीत्वाचैवतदर्धकम् । शेषंनिषिञ्चेत्तत्रैवपठन्मंत्रमिमंबुधः ॥ २ उत्थायबहिरागत्यमुखहस्तादिशोधयेत् । आचम्यचततःकुर्याद्दन्तकाष्ठस्यभक्षणम् ॥ ३ दन्तलग्नमसंहार्यलेपंमन्येतदन्तवत् । नतत्रबहुशःकुर्याद्यत्नमुद्धरणंप्रति ॥ ४ इत्युक्त्वातुस्वहस्तेनपरिमार्ज्यनिजोदरम् । अनायासप्रदायीनिकुर्यात्कर्माण्यतन्द्रितः ॥ ५ भोजनानन्तरंविष्णोरर्पितंतुलसीदलम् । भक्षयेद्देहशुद्ध्यर्थंचान्द्रायणशताधिकम् ॥

म्बूलभक्षणंकृत्वाशतपदंव्रजेत् । वामपार्श्वेनिद्रारहितंशयनंकर्तव्यः । ततइतिहासपुराणानिधर्मशास्त्राणिचाभ्यसेत्पश्चाद्धितव्यवहारादिकृत्यंकुर्यात् । दिवास्वापंस्त्रियंचवर्जयेत् ॥ इतिभोजनविधिः तदुत्तरकर्मच ॥

॥ २० ॥ अथकात्यायनपरिशिष्टभोजनसूत्रम् ॥

अथातःश्रुतिस्मृतीरनुसृत्यभोजनविधिंव्याख्यास्यामः । आचान्तोधृतोत्तरीयवस्त्रोधृतश्रीखंडगन्धत्रिपुण्ड्रोभोजनशालायामागत्यगोमयलिप्तेशुचौदेशेविहितपीठाधिष्ठितोनित्यंप्राङ्मुखोनोदङ्मुखोनदक्षिणामुखोनप्रत्यङ्मुखोनविदिङ्मुखः श्रीकामश्चेत्प्रत्यङ्मुखःसत्यकामश्चेदुदङ्मुखोयशस्कामश्चेद्दक्षिणामुखो (जीवन्मातृकवर्ज्य) हस्तपादास्येषुपञ्चस्वार्द्रोनीवारचूर्णैर्गौरमृदाभस्मनोदकेनवामण्डलंकुर्याच्चतुष्कोणंब्राह्मणस्यत्रिकोणंक्षत्रियस्यमंडलाकृतिवैश्यस्याभ्युक्षणंशूद्रस्य । यथाचक्रायुधोविष्णुस्त्रैलोक्यंपरिरक्षति । एवंमण्डल-

---

१ पर्णस्याग्रंचमूलंचशिखांचैवविशेषतः । चूर्णेपर्णवर्जयित्वाताम्बूलंभक्षयेद्बुधः ॥ सुपक्वंचसुपत्रंचचूर्णेनचसमन्वितम् । अदत्वाद्विजदेवेभ्यस्ताम्बूलंवर्जयेद्बुधः ॥ ताम्बूलंविधवास्त्रीणांयतीनांब्रह्मचारिणाम् । तपस्विनांचविप्रेन्द्रसर्वपुण्यहरंस्मृतम् ॥ ताम्बूलाभ्यञ्जनेचैवकांस्यपात्रंचभोजनम् । यतिश्चब्रह्मचारीचविधवाचविवर्जयेत् ॥ २ भोजनान्तेशतपदंगत्वाताम्बूलभक्षणम् । शयनंवामकुक्षौचेद्व्रैषज्यंकिंप्रयोजनम् ॥ ३ इतिहासपुराणानिधर्मशास्त्राणिचाभ्यसेत् । वृथाविवादवाक्यानिपरीवादांश्चवर्जयेत् ॥ ४ दिवास्वापंनकुर्वीतस्त्रियंचैवविवर्जयेत् । आयुर्हतिदिवानिद्रादिवास्त्रीपुण्यनाशिनी ॥

भस्मैतत्सर्वभूतानिरक्षत्विति । तत्रभूमौनिहितपात्रेऽन्नेपरिविष्टेपितु-
न्नुस्तोषमित्यन्नꣳस्तुत्वामानस्तोकेनमोवःकिरिकेभ्योनमःशम्भवेचे-
त्येभिरभिमंत्र्यप्रोक्षयेत् । सत्यन्त्वर्त्तेनपरिषिञ्चामीतिप्रातः ऋतन्त्वा
सत्येनपरिषिञ्चामीतिसायंतेजोसिशुक्रमस्यमृतमसीतियजुषान्नम-
भिमृश्याग्निरस्मीत्यात्मानमग्निंध्यात्वा भूपतयेभुवनपतयेभूतानांपतये-
ऽइतिप्रणवादिकैःस्वाहानमोन्तैर्मंत्रैःप्रतिमन्त्रंबलीन्हरेदन्तश्चरातिभूतेषु-
गुहायांविश्वतोमुखः । त्वंब्रह्मत्वंयज्ञस्त्वंवषट्कारस्त्वमोङ्कारस्त्वं
विष्णोःपरमंपदम् । अमृतोपस्तरणमसिस्वाहेतिविष्णुमभिध्यायन्ना-
चम्यान्नममृतंध्यायन्मौनीहस्तचापल्यादिरहितोमुखेपञ्चप्राणाहुतीर्जु-
होति ॥ १ ॥ ॐप्राणायस्वाहा ॐअपानायस्वाहा ॐव्यानाय-
स्वाहा ॐसमानायस्वाहा ॐउदानायस्वाहेतिक्रमंयाज्ञवल्क्योऽम-
न्यत । उदानायस्वाहा समानायस्वाहेतिक्रमंशौनकबौधायनौयाज्ञ-
वल्क्योदितक्रमोवाजसनेयिनामित्यूचतुः । दन्तैरनुपस्पृन्जिह्वया-
ग्रसेदङ्गुष्ठप्रदेशिनीमध्यमाभिःप्रथमाङ्गुष्ठमध्यमानामिकाभिर्द्वितीया-
ङ्गुष्ठानामिकाकनिष्ठिकाभिस्तृतीयांकनिष्ठिकातर्जन्यङ्गुष्ठैश्चतुर्थीꣳस-
र्वाभिरङ्गुलीभिःसाङ्गुष्ठाभिःपञ्चमीमङ्गुष्ठानामिकामात्रग्राह्यान्नेनैताऽ-
आहुतयऽइतिहारीतव्याख्यातारः । सर्वाभिरङ्गुलीभिरेताऽइति-
बौधायनः । मौनंत्यक्त्वाप्राक्द्रवरूपमश्नीयान्मध्येकठिणमन्तेपुनर्द्र-
वाशीस्यान्मधुरंपूर्वंलवणाम्लेमध्येकटुतिक्तादिकान्पश्चाद्यथासुखंभु-
ञ्जीतभुञ्जानोवामहस्तेनाऽन्नंनस्पृशेन्नपादौनशिरोवस्तिंनपदाभाज-
नꣳस्पृशेदेवंयथारुचिभुक्त्वाभुक्तशेषमन्नमादाय । मद्भुक्तोच्छिष्टशेषं-

येभुञ्जन्तेपितरोऽधमाः । तेषामन्नंमयादत्तमक्षय्यमुपतिष्ठत्वितिपितृतीर्थेनदक्षिणतोदत्वाऽमृतापिधानमसिस्वाहेतिहस्तेगृहीतानामपामर्द्धंपीत्वार्द्धंभूमौनिक्षिपेत् । रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम् । अर्थिनाऽसर्वभूतानामक्षय्यमुपतिष्ठत्वितितस्मादेशादपसृत्यगण्डूषशलाकादिभिस्तर्जनीवर्जमास्यंसंशोधयेत् ॥ २ ॥ नभार्यादर्शनेऽश्रीयान्नभार्ययासहनसन्ध्ययोर्नमध्याह्नेनार्द्धरात्रेनायज्ञोपवीतीनार्द्रशिरानार्द्रवासानैकवासानशयानोनताम्रभाजनेनभिन्नेनताम्रराजतसौवर्णशंखस्फाटिकाश्मभाजनवर्जेनलौहेनमृन्मयेनसन्धिसंस्थितेनभुविनपाणौनसर्वभोजीस्यात्किञ्चिद्भोज्यंपरित्यजेदन्यत्रघृतपायसदधिसक्तुपललमधुभ्यःसाध्वाचान्तोदक्षिणपादाङ्गुष्ठेपार्ष्णिंनिस्नावयेदङ्गुष्ठमात्रःपुरुषोऽङ्गुष्ठंचसमाश्रितः । ईशःसर्वस्यजगतःप्रभुःप्रीणातुविश्वभुगितिश्वात्राःपीताऽइतिनाभिमालभतऽअमृताऽइत्यतःप्रागगस्त्यंवैनतेयंचशनिंचवडवानलम् । अन्नस्यपरिणामार्थंस्मरेद्दीर्घंचपंचमित्युदरमालभ्येन्द्राग्निनौच्यवनशर्यातिसुकन्याश्वभोजनान्तेस्मरेन्नित्यंतस्यचक्षुर्नहीयतऽइतिवचनात्स्मृत्वामुखशुद्धिंकुर्यान्नमोभगवतेवाजसनेयायययाज्ञवल्क्यायनमोभगवतेवाजसनेयायययाज्ञवल्क्याय ।

॥ २१ ॥ अथसायंसन्ध्याप्रयोगः ॥

स्नात्वाधौतेवाससीपरिधायदर्भासनेप्रत्यङ्मुखउपविश्यततःक्रमेणपवित्रधारणंआचमनंप्राणायामःनिर्जलंभस्मधारणंशिखाबन्धनंरु-

---

१ रवेरस्तमयात्पूर्वंघटिकैकायदाभवेत् । सायंसंध्यामुपासीतकुर्याद्धोमंचपूर्ववत् ॥ शौचंकृत्वायथान्यायमर्द्धास्तमितभास्करे । सायंसन्ध्यामुपस्थायआसीन-

द्राक्षमालाधारणंपवित्रकरणंचप्रातःसन्ध्यावत्कुर्यात् ॥ अथसङ्कल्पः—विष्णुर्विष्णुर्विष्णुःश्रीमद्भगवतोमहापुरुषस्य०शुभपुण्यतिथौममोपात्त दुरितक्षयपूर्वकब्रह्मवर्चसकामार्थंश्रीविष्णुप्रीत्यर्थंसायंसन्ध्योपासनमहंकरिष्ये ॥ इतिसंकल्प्यभूमिप्रार्थनाभूतशुद्धिःअभिषेचनंव्याहृतिपूर्वकगायत्रीन्यासाःव्याहृतिपूर्वकगायत्रीषडङ्गन्यासाःप्रणवन्यासाःगायत्र्यक्षरन्यासाःशिरोन्यासाश्चक्रमेणप्रातःसन्ध्यावद्विधायततः आवाहनम्—वृद्धांसरस्वतींकृष्णांपीतवस्त्रांचतुर्भुजाम् । शंखचक्रगदापद्महस्तांगरुडवाहिनीम् ॥सामवेदकृतोत्संङ्गांवनमालाविभूषिताम् । वैष्णवींविष्णुदैवत्यांविष्णुलोकनिवासिनीम् ॥ आवाहयाम्यहंदेवीमायान्तींविष्णुमण्डलात् । आगच्छवरदेदेविव्यक्षरेविष्णुवादिनि । सरस्वतिछन्दसांमातर्विष्णुयोनेनमोऽस्तुते ॥ ततःप्रातःसन्ध्यावत्प्राणायामंकृत्वाअम्बुप्राशनम्—अग्निश्चमेतिनारायणऋषिः अग्निर्देवताअनुष्टुप्छन्दःअम्बुप्राशनेविनियोगः—ॐअग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षन्तांयदह्नापापमकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नाअहस्तदवलुम्पतुयत्किञ्चिदुरितंमयिइदमहंाममृत-

---

स्त्वथवाग्यतः ॥ अर्द्धास्तमितआदित्येपश्चिमायायउत्तरः । भागस्तन्मुखआसीनः सावित्रींवाग्यतोजपेत् ॥ बहिःसन्ध्यादशगुणाद्धदप्रस्रवणेषुच । साचतीर्थेशतगुणासहस्राजाह्नवीतटे ॥ उत्तमासूर्यसहितामध्यमालुप्तभास्करा । अधमातारकोपेतासायंसंध्यात्रिधामता ॥ संध्याकालेव्यतीतेतुजपंकृत्वापुनर्मनः । ऋचंवाचंत्यृचंजप्त्वाततःसन्ध्यामुपासते ॥ यदुपस्थकृतंपापंयच्चयोनिकृतंभवेत् । सायंसन्ध्यामुपस्थायतेनतस्मात्प्रमुच्यते ॥ १ अग्निश्चेत्यनुवाकेनसायंकालेपिबेदपः ।

योनौसत्येज्योतिषिजुहोमिस्वाहा ॥ एतन्मंत्रेणजलंप्राश्यतूष्णींद्विराचामेत् ॥ ततोमार्जनंअपोज्ञलावादानंजलप्रक्षेपणंअपोवामहस्तेगृहीत्वान्युब्जेनदक्षिणहस्तेनाच्छादनंअघमर्षणंचप्रातःसन्ध्यावत्कृत्वागायत्रीमन्त्रेणप्रातःसन्ध्योक्तविधिनासूर्याभिमुखस्तिष्ठन् विष्णुस्वरूपिणेसूर्यनारायणायनमःइदमर्घ्यंदत्तंनममइतिवदन्गन्धाक्षतपुष्पयुक्तानित्रीण्यर्घ्याणिदद्यात् । दत्ताघ्र्योदकेनदक्षिणनासाचक्षुःश्रोत्रस्पर्शनंकुर्यात् । ततःदक्षिणहस्तेजलंगृहीत्वा—ॐअसावादित्योब्रह्म—अनेनमन्त्रेणआत्मनःसमन्तात्प्रदक्षिणवदुदकंक्षिपेत् । ततःसूर्योपस्थानंगायत्र्यावाहनंगायत्र्युपस्थानंगायत्रीजपाविनियोगः गायत्रीध्यानंब्रह्मशापविमोचनंवसिष्ठशापविमोचनंविश्वामित्रशापविमोचनंगायत्र्यस्त्रोपाहरणंजपादौमुद्राप्रदर्शनंचप्रातःसन्ध्यावत्कुर्यात् । ततःगायत्रीमंत्रजपार्थेविनियोगंकृत्वावस्त्राच्छादितांजपमालांनासाग्रेधृत्वाप्रातस्सन्ध्योक्तविधिनागायत्रीजपःकार्यः । ततःषडङ्गन्यासंमुद्राप्रदर्शनंसूर्यप्रदक्षिणासूर्यादिदेवानांनमस्काराःजपनिवेदनंचप्रातःसन्ध्यावत्कृत्वाजपार्पणम्—अनेनसायंसन्ध्याङ्गभूतेनवाहूल्यगोत्रधारिण्यागायत्र्यायथाशक्त्याकृतेनजपकर्मणाश्रीभगवान्विष्णुस्वरूपीसूर्यनारायणःप्रीयतांनमम । ततःप्रार्थनांसन्ध्य[illegible]प्रवरोच्चारणपूर्वकमभिवादनं ईश्वरस्तुतिंचप्रातःसन्ध्यावत्कृत्वाअर्पणम्—अने-

---

१ गृह्यपरिशिष्टे—अथाचम्यदर्भपाणिःपूर्णमुदकाञ्जलिमुद्धृत्यादित्याभिमुखःस्थित्वाप्रणवव्याहृतिपूर्वयासावित्र्यात्रिरर्घ्यंनिवेद्यक्षिपेत् । कालातिक्रमे—कालातिक्रमणेचैवत्रिसंध्यमपिसर्वदा । अर्घ्यमेकाधिकंदद्यात्भानोर्व्याहृतिपूर्वकम् ।

नसायंसन्ध्योपासनाख्येनकर्मणाभगवान्विष्णुस्वरूपीपरमेश्वरःप्रीयतांनमम । ततोद्विराचमनम्—ॐकेशवायनमःस्वाहा ॐनारायणायनमःस्वाहा ॐमाधवायनमःस्वाहा । हस्तप्रक्षालनम्—ॐगोविंदायनमः । ॐविष्णवेनमः ॐविष्णवेनमःॐविष्णवेनमः ॥ इतिसायंसंन्ध्याप्रयोगः ॥

॥ २२ ॥ अथशयनविधिः ॥

सायंसंध्यादिनिर्वर्त्यप्रागुदङ्मुखंदीपंप्रज्वाल्यस्तुवीतयथा—दीपोज्योतिःपरब्रह्मदीपोज्योतिर्जनार्दनः । दीपोहरतुमेपापंसन्ध्यादीपनमोस्तुते ॥ शुभंकरोतुकल्याणमारोग्यंसुखसम्पदम् । शत्रुबुद्धि-

---

१ सन्ध्यातिक्रमणे—सन्ध्याकालेत्वतिक्रान्तेस्नात्वाचैवयथाविधि । जपेदष्टशतंदेवींततःसन्ध्यांसमाचरेत् ॥ एकाहंचाप्यतिक्रम्यसन्ध्यावन्दनकर्मच । अहोरात्रोषितोभुक्त्वागायत्र्याअयुतंजपेत् । द्विरात्रेद्विगुणंप्रोक्तंत्रिरात्रेत्रिगुणंभवेत् । त्रिरात्रानंतरंचेत्स्याच्छूद्रएवनसंशयः ॥ २ चतुर्थप्रथमौयामौविद्याभ्यासैर्नयेन्निशि । प्रहरद्वयशायीतुब्रह्मभूयायकल्पते ॥ उपास्यपश्चिमांसन्ध्यांहुत्वाग्नींस्तानुपास्यच । भृत्यैःपरिवृतोभुक्त्वानातितृप्तोऽथसंविशेत् । ३ आयुर्दःप्राङ्मुखोदीपोधनदःस्यादुदङ्मुखः । प्रत्यङ्मुखोदुःखदोसौहानिदोदक्षिणामुखः ॥ ४ खेरस्तंसमारभ्ययावत्सूर्योदयोभवेत् । यस्यतिष्ठेद्गृहेदीपस्तस्यनास्तिदरिद्रता ॥ नेत्राह्लादकरःसार्चिर्दूरतापविवर्जितः । सुशिखःशब्दरहितोनिर्धूमोनातिहस्वकः ॥ कोशजंरोमजंवस्त्रंवर्तिकार्योनयोजयेत् । नमिश्रीकृत्यदद्यात्तुदीपंस्नेहेघृतादिकम् ॥ कार्पासवर्तिकाप्रोक्तादीपकृत्येषुसर्वदा । नचैवस्थापयेद्दीपंसाक्षाद्भूमौकदाचन ॥ दीपनिर्वापणात्पुंसःकूष्माण्डच्छेदनात्स्त्रियः । अचिरेणैवकालेनवंशनाशोभवेद्ध्रुवम् ॥

विनाशंचदीपज्योतिर्नमोऽस्तुते ॥ इतिस्तुत्वानत्वातत्सन्निधावाप्ता-
दिकानांकुशलाभिवादनंकुर्यात् । पश्चाद्गृहदेवादीनांपञ्चोपचारैःपूजां
कृत्वासायंभोजनंकृत्वास्तोत्रपाठादिनाग्रन्थाद्यवलोकनादिविद्याभ्या-
सेनवाप्रथमयाममतिक्रामेत् । शयनात्पाक्हस्तौपादौमक्षाल्यजलपू-
र्णकुंभंशिरःस्थानेनिधायरात्रिसूक्तंपठेत् यथा-ॐआरात्रिपार्थिवꣳर-
जः÷पितुरप्पायिधामभिः ॥ दिवः?सदाꣳसिबृहतीवितिष्ठस÷आ-
त्वेषंवर्त्ततेतमः÷ ॥ ३३/३४ ॥ उषस्तच्चित्रमाभरास्मभ्यंवाजिनीवति ॥
येनतोकञ्चतनयञ्चधामहे ॥ ३३/३४ ॥ ॐनमोनंदीश्वराय। जलेरक्षतुवा-
राहःस्थलेरक्षतुवामनः । अटव्यांनारसिंहश्चसर्वतःपातुकेशवः ॥ जले
रक्षतुनंदीशःस्थलेरक्षतुभैरवः । अटव्यांवीरभद्रश्चसर्वतःपातुशङ्करः ॥
अर्जुनःफाल्गुनोजिष्णुःकिरीटीश्वेतवाहनः । बीभत्सुर्विजयःकृष्णः
सव्यसाचीधनञ्जयः ॥ तिस्रोभार्याःकफल्लस्यदाहिनीमोहिनीसती ।
तासांस्मरणमात्रेणचोरोगच्छतिनिष्फलः॥ अगस्तिर्माधवश्चैवमुचुकु-
न्दोमहाबलः । कपिलोमुनिरास्तीकःपञ्चैतेसुखशायिनः ॥ ततो
गारुडमंत्रान्पठेत्–नर्मदायैनमःप्रातर्नर्मदायैनमोनिशि । नमोऽस्तुन-
र्मदेतुभ्यंत्राहिमांविषसर्पतः ॥ सर्पापसर्पभद्रंतेदूरंगच्छमहाविष ।
जनमेजयस्ययज्ञान्तेआस्तीकवचनंस्मर ॥ आस्तीकवचनंश्रुत्वाय-
सर्पोननिवर्तते । शतधाभिद्यतेमूर्ध्निशिंशवृक्षफलंयथा ॥ योजरत्का
रुणाजातोजरत्कन्यांमहायशाः । तस्यसर्पोपिभद्रंतेदूरंगच्छमहाविष ॥
एतान्गारुडमंत्रांस्तुनिशायांपठतेयदि । मुच्यतेसर्वबाधाभ्योनात्रका-
र्याविचारणा ॥ इतिपठित्वासमाधिस्थमव्ययंविष्णुंनमस्कृत्यएककाष्ठ-
भवायांअदग्धायांनान्यवर्णोपसेवितायांशुचिरूपायांशुचिदेशस्थापि-

तायांशुचिवस्त्रावृतायांअभग्नायांआस्तृतायांजन्तुरहितायांछायायांप्राच्यंयाम्यायांवाशिरःकृत्वाशुचिरनार्द्रकरचरणोअनग्नोअतैलाभ्यक्तशिराःभार्यायासहपृथक्वास्वपेत् महादेवालयेभस्मनिदिवासन्ध्यायां शून्यालयश्मशानचतुष्पथससर्पगृहकूलमहावृक्षच्छायालोष्टपाषाणवल्मीकभूतयक्षाद्यायतनेषुतथादेवविप्रगुरूणामुपरिउच्छिष्टोनग्नःआर्द्रवासानस्वपेत् । निद्रासमयेतांबूलंत्यजेत् । उपानहौवेणुदंडंताम्बूलादीनिसमीपेस्थापयेत् ॥ इतिशयनविधिः ॥

॥ २४ ॥ अथ यज्ञोपवीतनिर्माणप्रकारः ॥

कार्पासंयज्ञोपवीतम् । ब्राह्मणेनब्राह्मणस्त्रीभिर्विधवादिभिश्च निर्मितंसूत्रंग्राह्यंसंहतचतुरङ्गुलिमूलेषुषण्णवत्यासूत्रमावेष्टयतत्त्रिगुणीकृत्योर्ध्ववृत्तंवलितंकृत्वापुनरधोवृत्तरीत्यात्रिगुणीकृतंतत्सूत्रंनवतंतुकं संपद्यतेतत्त्रिरावेष्टयदृढग्रंथिकुर्यात् । अन्यत्र—वामावर्तंत्रिगुणंकृत्वाप्रदक्षिणावर्तंनवगुणंविधायतदेवंत्रिसरंकृत्वाग्रन्थिमेकंविदध्यात् ॥

॥ २५ ॥ अथ नूतनयज्ञोपवीतधारणप्रयोगः ॥

विच्छिन्नंअधोयातंभुक्त्वानिर्मितंतथाचितिकाष्ठचितिधूमचंडालरजस्वलाशवसूतिकास्पर्शेतथाकंठलंबितत्वाद्यकृत्वामलमूत्रोत्सर्गेतथाजननशावाशौचयोरन्तेतथामासचतुष्टयान्तेचयज्ञोपवीतंत्यक्त्वानूतनंधार्यम् । तत्रप्रयोगः-स्नात्वाचम्यप्राणानायम्यहस्तेजलमादायसङ्कल्पः-अत्राद्य ० अमुकमासेअमुकपक्षेअमुकतिथौअमुकवासरेममश्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंनूतनयज्ञोपवीतधारणमहंकरिष्ये । इतिसङ्कल्प्यसिद्धेमंत्राःप्रयोक्तव्याइतिन्यायेनसिद्धयज्ञोपवीतेत्रिगुणीकरणादिविधिःतत्तन्मंत्रैःप्रयोक्तव्यःयथा—सूत्रत्रिगुणीकरणम्—इदंवि-

ष्णुरितिमेधातिथिर्ऋषिःविष्णुर्देवतागायत्रीछन्दः सूत्रत्रिगुणीकरणे विनियोगः—ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्य पाᳬसुरेस्वाहा ॥ १५/५ ॥ प्रक्षालनम्—आपोहिष्ठेतितिसृणां सिन्धुद्वीपऋषिःआपोदेवतागायत्रीछन्दःयज्ञोपवीतप्रक्षालनेविनियोगः—ॐआपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन । महेरणायचक्षसे ॥ १५/३६ ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५/३६ ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ । आपोजनयथाचनः ॥ १६/३६ ॥ एतैर्यज्ञोपवीतानिप्रक्षाल्यततोदशगायत्रीमंत्रैरभिमंत्र्यतन्तुदेवानामावाहनम्—प्रणवस्यब्रह्माऋषिःपरमात्मादेवतागायत्रीछन्दःप्रथमतन्तौॐकारवाहनेविनियोगः । प्रथमतन्तौॐकारमावाहयामि ॥ अग्निन्दूतमितिमेधातिथिर्ऋषिःअग्निर्देवतागायत्रीछन्दःद्वितीयतन्तौअग्न्यबाहनेविनियोगः । ॐअग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे । देवाँ२आसादयादिह ॥ १७/२२ ॥ द्वितीयतन्तौअग्निमावाहयामि । नमोस्तुसर्पेभ्यइत्यस्यप्रजापतिर्ऋषिः सर्प्पादेवताःअनुष्टुप्छन्दः तृतीयतन्तौसर्प्पावाहनेविनियोयः । ॐ नमोस्तुसर्प्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सर्प्पेभ्योनमः ॥ ६/१३ ॥ तृतीयतन्तौसर्पानावाहयामि । वयᳬसोमेत्यस्यबंधुर्ऋषिःसोमोदेवतागायत्रीछन्दः चतुर्थन्तौसोमावाहनेविनियोगः ॥ वयᳬसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तᳬसचेमहि ॥ ५६/३ ॥ चतुर्थतन्तौसोममावाहयामि ॥ उदीरतामित्यस्यशङ्खऋषिःपितरोदेवतात्रिष्टुप्छन्दः पञ्चमतन्तौपित्रावाहनेविनियोगः । ॐउदीरतामवरऽउत्परासऽउन्मध्यमाः?पितरः?सोम्म्या-

सं÷ ॥ असुंय्वऽईयुरबृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥ ४१/१९ ॥ पञ्चमतन्तौपितॄनावाहयामि॥ प्रजापतेरित्यस्याहिरण्यगर्भऋषिःप्रजापतिर्देवतात्रिष्टुप्छन्दः षष्ठतन्तौप्रजापत्यावाहनेविनियोगः ॥ ॐ प्रजांपतेनत्वदेतान्य्न्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्ते जुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ॥ ६५/२३ ॥ षष्ठतन्तौ प्रजापतिमावाहयामि ॥ आनोनियुद्भिरिषस्यवसिष्ठऋषिःअनिलोदेवतात्रिष्टुप्छन्दःसप्तमतन्तौअनिलावाहनेविनियोगः ॥ ॐआनोनियुभि÷श्शतिनीभिरध्वरꣳसꣳसन्त्सिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वयूयंम्पातस्वस्तिभिꣳसदानꣳ ॥ २८/२७ ॥ सप्तमतन्तौअनिलमावाहयामि ॥ सुगावइत्यस्यात्रिर्ऋषिःगृहपतयोदेवताआर्षीत्रिष्टुप्छन्दः अष्टमतन्तौयमावाहनेविनियोगः—ॐसुगावोदेवाꣳसदंनाऽअकर्म्मयऽआजग्मेदꣳसवनꣳसुषाणा? ॥ भरमाणाववहमानाहवीꣳष्यस्मेधत्तवसवोवसूनिस्वाहा ॥ १८/८ ॥ अष्टमतन्तौयमं आवाहयामि ॥ विश्वेदेवासऽआगतइत्यस्यमधुच्छंदाऋषिःविश्वेदेवादेवताःत्रिष्टुप्छन्दःनवमतन्तौविश्वेषांदेवानामावाहनेविनियोगः ॥ ॐविश्वेदेवासऽआगतशृणुतामऽइमꣳहवम् ॥ एदम्बर्हिर्निषीदत ॥ ३४/७ ॥ नवमतन्तौविश्वान्देवानावाहयामि ॥ ततोयज्ञोपवीतग्रन्थिदेवताऽवाहनम् ॥ ब्रह्मजज्ञानमित्यस्यप्रजापतिर्ऋषिःब्रह्मादेवताग्रन्थिमध्येब्रह्मावाहनेविनियोगः ॥ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमत?सुरुचोवेनऽआवꣳ ॥ सबुध्न्याऽउपमाऽअस्यविष्ठा?सतश्चयोनिमसतश्चविवः÷ ॥ ३३/१३ ॥ ग्रन्थिमध्येब्रह्माणमावाहयामि ॥ इदंविष्णुरित्यस्यमेधातिथिर्ऋषिः विष्णुर्देवतागायत्रीछन्दःग्रन्थिमध्ये

विष्ण्वावाहनेविनियोगः ॥ ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेप-दम् ॥ समूढमस्यपाꣳसुरेस्वाहा ॥ १५/५ ॥ ग्रन्थिध्येविष्णुंआवाह-यामि ॥ त्र्यम्बकमित्यस्यवसिष्ठऋषिःरुद्रोदेवताविराड्ब्राह्मीत्रिष्टु-प्छन्दःग्रन्थिमध्येरुद्रावाहनेविनियोगः ॥ ॐत्र्यम्बकंय्यजामहेसु-गन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ ६०/३ ग्रन्थिमध्येरुद्रंआवाहयामि ॥ प्रणवाद्यावाहितदेवताभ्यो नमःयथास्थानमहंन्यसामि ॥ मानसोपचारैःसंपूज्यध्यानम्— प्रजापतेर्यत्सहजंपवित्रंकार्पाससूत्रोद्भवब्रह्मसूत्रम् । ब्रह्मत्वसिद्ध्यै चयशःप्रकाशंजपस्यसिद्धिंकुरुब्रह्मसूत्रम् ॥ [illegible]रङ्गुष्ठतर्ज-नीमध्यप्रदेशेधृत्वासूर्यायदर्शयेत् तत्रमंत्राः—ॐउदुत्त्यजा० २१/३३ ॥ चित्रन्देवाना० ४६/१३ ॥ तच्चक्षुर्देव० ३४/३६ ॥ एतैर्मंत्रैःसूर्यायप्रदर्श्य धारणम्—यज्ञोपवीतमितिमंत्रस्यपरमेष्ठीऋषिः लिङ्गोक्तादेवतात्रिष्टु-प्छन्दःयज्ञोपवीतधारणेविनियोगः ॥ ॐयज्ञोपवीतंपरमंपवित्रंप्रजा-पतेर्यत्सहजम्पुरस्तात्। आयुष्यमग्र्यम्प्रतिमुञ्चशुभ्रंयज्ञोपवीतम्बलम-स्तुतेजः ॥ यज्ञोपवीतमसियज्ञस्यत्वायज्ञोपवीतेनोपनह्यामि ॥ अने-नमन्त्रेणप्रथमंदक्षिणबाहुमुद्धृत्यपश्चात्कंठेयज्ञोपवीतानांपृथक्पृथक्धा-रणंकुर्यात् ॥ प्रतियज्ञोपवीतधारणान्तेआचमनंकुर्यात् । जीर्णोप-वीतत्यागः तत्रमंत्र—ॐसमुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳ सवितारङ्गच्छस्वाहामित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाच्छ-न्दाꣳसिगच्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्ग-च्छस्वाहादिव्यन्नभोगच्छस्वाहाग्निंवैश्वानरङ्गच्छस्वाहामनोमेहार्दिय-च्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिः÷पृथिवीम्भस्म्मनापृणस्वाहा २१/६ ॥

एतावद्दिनपर्यंतंब्रह्मत्वंधारितंमया । जीर्णत्वात्त्वत्परित्यागोगच्छसू-त्रययासुव्रम् ॥ जीर्णोपवीतंशिरेधार्योदेहःसार्यशुद्धभूमौत्यजेत् ॥ पश्चाद्यथाशक्तिगायजीजपंकृत्वाअर्पणम्—अनेननवयज्ञोपवीतधार-णाङ्गभूतेनयथाशक्तिगायत्रीजपकर्मणाश्रीसवितादेवताप्रीयतांनमम॥ इतिनूतनयज्ञोपवीतधारणप्रयोगः ॥

॥ २६ ॥ अथ प्रमादाद्यज्ञोपवीतनाशेवि-ोषप्रयोगः ।

यज्ञोपवीतंप्रमादाद्गतंचेत्तूष्णींलौकिकंधृत्वासङ्कल्पः—अत्राद्यअ-मुकमासेअमुकपक्षेअमुकतिथौअमुकवासरेममयज्ञोपवीतनाशजन्यदो-षनिवारणार्थंप्रायश्चित्तांगभूतं आज्यहोममहंकरिष्ये इतिसङ्कल्प्य-कुण्डेस्थण्डिलेवाअग्निंप्रतिष्ठाप्यमंत्रचतुष्टयेनचतस्रआज्याहुतीर्जुहुयात् यथा—ॐनमोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञंसमिमंदधातु । याइ-ष्टाउषसोनिम्रुचश्चताःसंदधामिहविषाघृतेनस्वाहा ॥ १ ॥ ॐअग्ने व्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतांस्वाहा ॥ २ ॥ ॐवायो व्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतांस्वाहा ॥ ३ ॥ ॐआ-दित्यव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतांस्वाहा ॥ ४ ॥ इति हुत्वापूर्वोक्तविधिनानूतनंधारयेत् ॥

अथान्यप्रकारःयथा—अद्यपूर्वोच्चारित०शुभपुण्यतिथौममयज्ञो-पवीतनाशजन्यदोषनिरासार्थंप्रायश्चित्तंकरिष्येइतिसङ्कल्प्यआचार्यव-रणाग्निप्रतिष्ठादिआज्यभागान्तेसवितारंगायत्र्याघृतेनैराज्येनचाष्टो-त्तरशतशतंसहस्रंवाजुहुयात् ततःपूर्वोक्तविधिनानूतनंधृत्वातिक्रान्तं संध्याद्याचरेत् ॥ यज्ञोपवीतहीनःक्षणंतिष्ठेच्चेच्छतगायत्रीजपः । यज्ञो-पवीतंविनाभोजनेविण्मूत्रकरणेवागायत्र्यष्टसहस्रंजपः । यज्ञोपवीतं

विनाजलपानेऽपोशानेऽद्भिर्गव्यपानेनचशुद्ध्यति । वामस्कन्धात्कूर्परेमणिबन्धान्तेवापतितेयथास्थानंधृत्वात्रीन्षट्वायथाक्रमंप्राणायामान्कृत्वानवंधारयेत् । कोपादिनास्वयंयज्ञोपवीतत्यागेपूर्ववल्लौकिकंधृत्वाप्रायश्चित्तान्तेनवंधारयेत् । ब्रह्मचारिणएकंयज्ञोपवीतं स्नातकस्यद्वेउत्तरीयाभावेतृतीयकंआयुष्कामस्यत्र्यधिकानिबहूनियज्ञोपवीतानि ॥ कंठादुत्तार्यक्षालनेपुनःसंस्कारः ॥

॥ २७ ॥ सूतकेसन्ध्याविधिः ॥

तूष्णींत्रिराचम्यप्राणानायम्यआपोहिष्ठेतिमार्जनमंत्रान्मनसोच्चार्यमार्जयेत् गायत्रीमंत्रंसम्यगुच्चार्यसूर्यायार्घ्यंदद्यात् जलेनप्रदक्षिणं कृत्वागायत्रीजपं मनसादशवारंकृत्वासूर्यंध्यायन्नमस्कुर्यात् ॥ इति ॥ अशौचेहोम(वैश्वदेव)दानप्रतिग्रहस्वाध्यायपरान्नभक्षणादिनकुर्यात् ॥

॥ २८ ॥ अथ सूत्रोक्तत्रिकालसन्ध्याप्रयोगः ॥

भस्मधारणम्—ॐत्र्यायुषंजमदग्नेः—ललाटे । कश्यपस्यत्र्यायुषम्—ग्रीवायाम् । यद्देवेषुत्र्यायुषम्—बाह्वोः । तन्नोऽअस्तुत्र्यायुषम्—हृदये । आचमनम्—ॐआमागन्यशससःसृजवर्चसा । तंमाकुरुप्रियंप्रजानामधिपतिंपशूनामरिष्टितनूनाम् ॥ इत्यनेनमंत्रेणाचम्यगायत्रीमंत्रेणशिखांबद्ध्वाप्राणायामः— ॐभूः ॐभुवः ॐ स्वःॐमहःॐजनःॐतपः ॐसत्यम् ॐतत्सवितुर्वरेण्यंभर्गोदेवस्य धीमहि ॥ धियोयोनःप्रचोदयात् ॥ ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम् । एवंपूरकःकुंभकःरेचकःक्रमेणत्रिवारंपठेत् । न्यासाः-वाङ्मऽआस्येऽस्तु—मुखंकराग्रेणस्पृशेत् । नसोर्मेप्राणोऽस्तु—तर्ज-

न्यङ्गुष्ठाभ्यांनासारन्ध्रद्वयंस्पृशेत् । अक्ष्णोर्मेचक्षुरस्तु–अनामिकाङ्गुष्ठाभ्यांचक्षुर्द्वयंस्पृशेत् । कर्णयोर्मेश्रोत्रमस्तुमध्यमाङ्गुष्ठाभ्यां कर्णौस्पृशेत् । बाह्वोर्मेबलमस्तु–कराग्रेणबाहूस्पृशेत् । ऊर्वोर्मेऽओजोऽस्तु–युगपद्धस्तेनोरूपस्पृशेत् । अरिष्टानिमेऽङ्गानितनूस्तन्वामेसह–शिरःप्रभृतिपादान्तानिसर्वाङ्गाण्युभाभ्यांहस्ताभ्यामालभेत् । सङ्कल्पः—ॐतत्सत्परमेश्वरप्रीत्यर्थंप्रातःसन्ध्योपासनमहंकरिष्ये । अर्घ्यदानम्—ॐभूर्भुवःस्वःॐतत्सवितुर्वरेण्यम्भर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोदयात् । अनेनमंत्रेणार्घ्यत्रयंदद्यात् ॥ सूर्योपस्थानम्—ॐउद्वयन्तमसस्परिस्वःपश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्मज्योतिरुत्तमम् ॥ २१/२० ॥ ॐउदुत्त्यजातवेदसन्देवंवहन्तिकेतवःदृशेविश्वायसूर्य्यम् ॥ ३१/३३ ॥ ॐचित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यआत्माजगतस्तस्थुषश्च ॥ ४६/१३ ॥ ॐतच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्रवामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदःशतात् ॥ २४/३६ ॥ इत्युपस्थायगायत्रीमंत्रजपःकार्यः ॥ अर्पणम्—अनेनाष्टोत्तरशतसंख्याकेनगायत्रीजपाख्येनकर्मणाश्रीसवितादेवतामीयतांनमम ॥ इतिसूत्रोक्तत्रिकालसन्ध्याप्रयोगः ॥ जत्रमध्याह्नेमध्याह्नसन्ध्योपासनंकरिष्ये तथा सायाह्नेसायंसंध्योपासनंकरिष्ये इत्यूहः कार्यः ॥

॥ अथ नैमित्तिककर्मात्मको द्वितीयविभागः ॥

॥ १ ॥ भूशुद्ध्यादिमहान्याससमन्वितश्चक्र-पूजनपूर्वकरुद्राभिषेकप्रयोगः ॥

श्रीगणेशायनमः । अथ संभृतसंभारः परिहिताहतशुक्लवासाः सोत्तरीयः दक्षिणपार्श्वेबद्धशिखाभिन्नकेशः सव्येपाणौकृतकुशोपग्रहः दक्षिणेपाणौधृतपवित्रः श्रीपर्ण्यादिप्रशस्तदारुनिर्मितेकुशोत्तरकंबलाद्यास्तृतेस्वासनेउदङ्मुखउपविश्य तदक्षिणतःपत्नी च स्ववामभागे अग्रोदककलशस्थापनं स्वदक्षिणभागे घंटादिपूजोपकरणानां पुरतो गंधादिपात्राणांस्थापनं करादिक्षालनार्थपात्रं स्वपृष्ठतःस्थापनीयंघृतदीपस्याभावेतिलतैलदीपस्थापनम् ॥आचम्यप्राणानायम्य। ॐद्यौ? शान्ति० यतोयत० सुशान्तिर्भवतु । ॐश्रीगुरुभ्योनमः ॐ सिद्धिबुद्धिसहिताय श्रीगणाधिपतयेनमः । ॐलक्ष्मीनारायणाभ्यांनमः ॐउमामहेश्वराभ्यांनमः । सुमुखश्चैकदन्तश्च० धूम्रकेतुर्गणाध्यक्षो० विद्यारंभे० शुक्लाम्बरधरं० अभीप्सितार्थ० सर्वमङ्गल० सर्वदासर्वकार्येषु० तदेवलग्नं० लाभस्तेषां० यत्रयोगेश्वरःकृष्णो० सर्वेष्वारंभकार्येषु० विनायकंगुरुं० । सङ्कल्पः—विष्णुर्विष्णुः इत्यारभ्यशुभपुण्यतिथौ ममसभार्यस्यसापत्यस्यसबान्धवस्यश्रीमहारुद्रप्रसादद्वारेणदीर्घायुःसुपुत्रसन्ततिप्राप्तिद्वाराइहजन्मनिजन्मान्तरार्जितसकलकल्मषनिवृत्त्यर्थं कर्मणाह्याक्रियमाणभूतानेकमहाग्रहभूतादिबाधानिरसनार्थं सच्चिदानंदानन्ताद्वयाखंडाचलाजाक्रियकूटस्थाच्युतब्रह्मात्मज्ञानरहितस्य स्वश्रियास्वविषयावस्तुरूपाविद्याावि-

लसितसंसारचक्रभुक्तनानादेहस्य इदानींकेनचित्पुण्यपुञ्जातिशयेन प्राप्तनरकुलायस्यतत्रस्रक्चन्दनवनितादिप्राप्तनानेन्द्रियकलाजलसत्वजादेहात्माभिमानस्यमरीचितोयसन्निभनानाविषयसुखासक्ततया जातकामाद्यरिषड्वर्गकृतमूर्छाकुलस्यश्रुत्याप्ररोचनार्थंप्रद्योतितस्वर्गादिफलानुसन्धानाभिनिविष्टतयाकृतनानाकर्मजातस्यस्वर्गादिप्राप्तावपि नश्वरत्वात्केनचिदपिप्रकारेणसुखमलभमानस्यअधुनाकेनचित्प्रारब्धसंस्कारेणप्राप्तप्रसादाचारश्रोत्रियशमदमादिसंपन्नब्रह्मात्मज्ञाननिष्ठ साधुसंगतस्यतन्मुखपङ्कजनिःसृतभगवद्गुणकथामकरन्दश्रवणपुटकृत पानजातसन्तोषस्य निर्विकल्पानिर्विकारनिरामयनिरालम्बनिर्वाणरूपस्यात्मसुखानुभवलालसतयैहिकामुष्मिकनानाविधजातवैराग्यभाग्योदयस्यचित्तशुद्धिद्वाराज्ञानप्राप्तावात्मसाक्षात्कारताभवतीति न्यायात् चित्तशोधकधर्मसाधनेनात्मज्ञानप्रकाशात्स्वरूपसंसिद्ध्यै अखण्डाव्यभिचारिण्याभक्त्यानित्यानन्दनिर्मलकीर्तिनामरूपगुणातिरिक्तभक्तजनसंस्तुतिनिरस्तिगृहीतसदाशिवस्वरूपश्रीमत्कर्पूरगौरवृषभवाहनगौरीदेहार्द्धधारिसच्चिदानन्दमूर्तिप्रेरणयाश्रीसाम्बसदाशिवप्रीत्यर्थंतथा च श्रुतिस्मृतिपुराणोक्तफलावाप्त्यर्थंदेशकालाद्यनुसारतः यथाशक्तिभूशुद्धिभूतशुद्धिप्राणप्रतिष्ठान्तर्मातृकाबाहिर्मातृकापूर्वकमहान्याससमन्वितपञ्चवक्त्रपूजनपूर्वकंअमुकरुद्रेणरुद्राभिषेकं (ऋत्विग्द्वारा वा) करिष्ये । तदङ्गत्वेनब्राह्मणवरणंपूजनंचकरिष्ये इतिसङ्कल्प्यवृत्वापूजनंकृत्वाऋत्विग्भिःसाकंभस्मोद्धूलनादिकुर्यात् ।

॥ २ ॥ अथ भस्मोद्धूलनप्रयोगः ॥

सद्योजातमित्यस्यसद्योजातऋषिः त्रिष्टुप्छन्दःब्रह्मादेवतावामदे-

वायेत्यस्यवामदेवऋषिःजगतीछन्दः विष्णुर्देवताअघोरेत्यस्यअघोर-
ऋषिःअनुष्टुप्छन्दःरुद्रोदेवतातत्पुरुषायेत्यस्यतत्पुरुषऋषिः गायत्रीछ-
न्दःरुद्रोदेवताईशानइत्यस्यईशानऋषिःअनुष्टुप्छन्दःरुद्रोदेवतासर्वेषां
भस्मपरिग्रहणेविनियोगः–ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमो
नमः । भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ वामदेवायनमो
ज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमो
बलविकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमो
मनोन्मनायनमः ॥ अघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यः
सर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ तत्पुरुषायविद्महेमहादेवायधी-
महि। तन्नोरुद्रःप्रचोदयात् ॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मशिवोमेअस्तुसदाशिवोम् ॥ इतिपञ्च-
भिर्मंत्रैर्नयसंभवस्यावसथ्यसंभवस्यवाभस्मनःसव्यहस्तेपरिग्रहणंदक्षि
णहस्तेनाच्छादनम् । अग्निरितिभस्माभिमंत्रणमंत्राणांपिप्पलाद-
ऋषिःगायत्रीछन्दःकालाग्निरुद्रोदेवताभस्माभिमंत्रणेविनियोगः–
अग्निरितिभस्मवायुरितिभस्मजलमितिभस्मस्थलमितिभस्मव्योमेति
भस्मसर्वꣳहवाइदंभस्ममनएतानिचक्षूंषिभस्मानितस्माव्रतमेतत्पाशुप-
तंयद्भस्मनाङ्गानिसंस्पृशेत्तस्माव्रतमेतत्पाशुपतंपशुपाशविमोक्षायेति
मन्त्रेणत्रिःकृत्वाभस्मनोभिमंत्रणम् । आपोज्योतिरित्यस्यप्रजापति-
र्ऋषिःयजुर्ब्रह्माग्निवायुसूर्याश्चदेवताःभस्मन्यपआसेचनेविनियोगः–
ॐआपोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोमितिमंत्रेणजलाधिपंविष्णु-
मभिध्यायन्भस्मन्यपआसेचनम् । ॐनमःशिवायेतिषडक्षरेणसंमर्द-
नम् । सर्वाङ्गेभस्मोद्धूलनम्–ईशानइत्यस्यईशानऋषिःअनुष्टुप्छन्दः

रुद्रोदेवताशिरसिभस्मोद्धूलनेविनियोगः । ॐईशानःसर्वविद्यानामी श्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदा-शिवोम्–इतिमंत्रेणशिरसि । तत्पुरुषायेत्यस्यतत्पुरुषऋषिः गाय-त्रीछन्दःरुद्रोदेवतामुखेभस्मोद्धूलनेविनियोगः–ॐतत्पुरुषायविद्महे महादेवायधीमहि । तन्नोरुद्रःप्रचोदयात्–मुखे। अघोरेभ्यइत्यस्यअ-घोरऋषिःअनुष्टुप्छन्दःरुद्रोदेवताहृदयेभस्मोद्धूलनेविनियोगः— ॐअघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः । सर्वेभ्यःसर्वशर्वेभ्योन-मस्तेअस्तुरुद्ररूपेभ्यः–हृदये । वामदेवायेत्यस्यवामदेवऋषिःजगती-छन्दःविष्णुर्देवतागुह्येभस्मोद्धूलनेविनियोगःॐवामदेवायनमोज्ये-ष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःकलविकरणायनमोबल-विकरणायनमोबलायनमोबलप्रमथनायनमःसर्वभूतदमनायनमोमनो न्मनायनमः–गुह्ये । सद्योजातमितिसद्योजातऋषिःत्रिष्टुप्छन्दःब्रह्मा देवतापादयोर्भस्मोद्धूलनेविनियोगः–ॐसद्योजातंप्रपद्यामिसद्योजा-तायवैनमोनमः । भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः—पाद-योः । प्रणवेनमस्तकादिपादतलपर्यंतंसर्वाङ्गे । ततस्त्रिपुंड्रधारणम्— मानस्तोकइत्यस्यकुत्सऋषिःजगतीछन्दः एकोरुद्रोदेवताभस्मोद्धरणे विनियोगः–ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वे-षुरीरिषः। मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवा-महे॥ १६/१६ ॥ इत्यनेनभस्मोद्धरणम् । त्र्यंबकमित्यस्यवसिष्ठऋषिःअनु-ष्टुप्छन्दःत्र्यम्बकोरुद्रोदेवताऽऽयुषमित्यस्यनारायणऋषिःउष्णिक्छ-न्दःआशीर्देवताभस्मनात्रिपुंड्रधारणेविनियोगः। इतिस्मृत्वायास्यप्रथ मारेखासागार्हपत्यश्चाकारोरजोभूर्लोकश्चात्माक्रियाशक्तिर्ऋग्वेदःमा-

तःसवनंमहादेवोदेवतायास्यद्वितीयारेखासादक्षिणाग्निरुकारः सत्व-
मंतरिक्षमंतरात्माचेच्छाशक्तिर्यजुर्वेदोमाध्यंदिनंसवनं महेश्वरोदेवता
यास्यतृतीयारेखासाआहवनीयोमकारस्तमोद्यौःपरमात्माज्ञानशक्तिः
सामवेदस्तृतीयसवनं शिवोदेवता । इतिध्यायन् त्र्यंबकं यजामहे
त्र्यायुषंजमदग्नेरितिद्वाभ्यामृग्भ्यां मध्यमांगुलिभिस्तिसृभिः शिरसि
त्रिपुंड्रधारणम् । एवमेताभ्यामृग्भ्यांनेत्रयुग्मप्रमाणंभ्रुवोरंतरंयावत्त्रि-
पुंड्रंललाटेएताभ्यामेवऋग्भ्यां तथैववक्षसिएवमेवदक्षिणोत्तरयोःस्क-
न्धयोश्चएवं पञ्चसुस्थानेषु त्रिपुण्ड्रधारणम् । ततोरुद्राक्षमालाधारणं
कुर्यात् ॥

॥ ३ ॥ अथरुद्राक्षमालाधारणप्रयोगः ॥

स्वपुरतःपात्रेरुद्राक्षान्निधायजलेनप्रोक्ष्यगन्धपुष्पैरभ्यर्च्यध्यानम्
विविक्तदेशेचसुखासनस्थःशुचिःसमग्रीवशिरःशरीरः।अत्याश्रमस्थः
सकलेन्द्रियाणिनिरुध्यभक्त्यास्वगुरुंप्रणम्य । हृत्पुण्डरीकंविरुजंवि-
शुद्धंविचिन्त्यमध्येविशदंविशोकम् । तथादिमध्यान्तविहीनमेकंविभुं
चिदानन्दमरूपमद्भुतम् । उमासहायंपरमेश्वरंप्रभुंत्रिलोचनंनीलकण्ठं
प्रशान्तम् ॥ इतिउमासहायंशिवंध्यात्वात्र्यम्बकंयजामहइत्यनेनशैव-
षडक्षरेणवामंत्रेणप्रतिष्ठितरुद्राक्षधारणम् । प्रतिष्ठामंत्रयोरन्यतरेणमं
त्रेण ॥

---

१ यद्वाललाटेबाह्वोर्हृदयेनाभौचेत्येवंपंचसुस्थानेषुत्रिपुण्ड्रधारणं। इदंभस्मधार
णं त्रिपुण्ड्रधारणं च चतुराश्रमिणांसाधारणंनित्यंच। भस्मोद्धूलनेऽशक्तश्चेच्छिरोल-
लाटवक्षःस्कन्धेषुत्रिपुण्ड्रधारणमेवकुर्यादितिरुद्रकल्पद्रुमे ॥ २ इतिजाबालोपनिष-
दि ॥ ३ रुद्राक्षधारणनिर्णयः—रुद्राक्षान्कण्ठदेशेदशैकपरिमेतान्मस्तकेविंशतीद्वे

॥ ४ ॥ अथभूशुद्धिः ॥

हस्तेजलमादाय ॐनमोभगवतेरुद्रायेतिदशाक्षरमंत्रस्यप्रजापतिर्ऋषिःरुद्रोदेवताविराट्छन्दःआचमनेप्राणायामेचविनियोगः । ॐनमोभगवतेरुद्रायस्वाहा । ॐनमोभगवतेरुद्रायस्वाहा । ॐनमोभगवतेरुद्रायस्वाहा । हस्तप्रक्षालनम्—ॐनमोभगवतेरुद्राय । प्राणायामः—ॐनमोभगवतेरुद्राय । ॐनमोभगवतेरुद्राय । ॐनमोभगवतेरुद्राय । हस्तेजलमादायरुद्राभिषेकंकर्तुंयोग्यतासिद्धयेऋत्विग्भिः सहभूशुद्धिभूतशुद्धिप्राणप्रतिष्ठान्तर्मातृकाबहिर्मातृकान्यासान्महा-

---

षट्षट्कर्णप्रदेशेकरयुगलकृतेद्वादशद्वादशैव । बाह्वोरिन्दोःकलौभिर्नयनयुगकृते एकमेकंशिखायांवक्षस्यष्टाधिकंयःकलयतिशतंकंसस्वयंनीलकण्ठः । क्वचित्तु—इन्दोःकलाभिःपृथगथशिखासूत्रयोरेकमेकम्—इतिपाठः ब्रह्मोत्तरखण्डेऽपि—रुद्राक्षधारणंपुण्यंकेनवासदृशंभवेत् । महाव्रतमिदंप्राहुर्मुनयस्तत्त्वदर्शिनः ॥ सहस्रं धारयेद्यस्तुरुद्राक्षाणांधृतव्रतः । तंनमन्तिसुराःसर्वेयथारुद्रस्तथैवसः ॥ अभावे तुसहस्रस्यबाह्वोःषोडशषोडश । एकंशिखायांकरयोर्द्वादशद्वादशैवहि ॥ द्वात्रिंशत्कण्ठदेशेतुचत्वारिंशच्चमस्तके । एकैककर्णयोःषट्षट्वक्षस्यष्टोत्तरंशतम् ॥ योधारयतिरुद्राक्षान्रुद्रवत्सोऽपिपूज्यते ॥ मुक्ताप्रवालस्फटिकरौप्यवैडूर्यकाञ्चनैः । समेतान्धारयेद्यस्तुरुद्राक्षान्सशिवोभवेत्॥ केवलान्वापिरुद्राक्षान्यथालाभंबिभर्तियः। तंनस्पृशन्तिपापानितमांसीवविभावसुम् ॥

१ परशुरामकारिकायाम्—भूरसीतिचभूशुद्धिःकार्याकार्यस्यसिद्धये । २ रामतापिन्याम्—देवोभूत्वायजेद्देवंनादेवोदेवमर्चयेत् । देवार्चायोग्यताप्राप्त्यैभूतशुद्धिं समाचरेत् । भूतशुद्धिविधायैवप्राणस्थापनमाचरेत् । एवंप्राणान्प्रतिष्ठाप्यमातृ-

न्यासांश्चकरिष्ये । नमस्काराः–दक्षिणे–ॐसरस्वत्यैनमः ॐशंखनिधयेनमःवामभागे–ॐलक्ष्म्यैनमःॐपद्मनिधयेनमःआसनम्–पृथिवित्वयेतिमंत्रस्यमेरुपृष्ठऋषिःकूर्मोदेवतासुतलंछन्दःआसनेविनियोगः–ॐपृथिवित्वयाधृतालोकादेवित्वंविष्णुनाधृता । त्वंचधारयमांदेविपवित्रंकुरुचासनम् । प्रार्थना–ॐविश्वशक्त्यैनमःॐमहाशक्त्यैनमःॐकूर्मासनायनमःॐयोगासनायनमःॐअनंतासनायनमः ॐविमलासनायनमः मध्ये–ॐपरमसुखासनायनमः । ॐभूर्भुवःस्वः आत्मासनायनमः–इत्यनेनमंत्रेणपुष्पादिनाआत्मनःआसनदानम् । शिखाबंधनम्–ऊर्ध्वकेशिविरूपाक्षिमांसशोणितभोजने । तिष्ठदेविशिखाबन्धेचामुण्डेचापराजिते । विष्णोर्नामसहस्रैस्तुशिखाबन्धंकरोम्यहम् । दिग्बन्धः–अपसर्पन्तुतेभूतायेभूताभूमिसंस्थिताः । येभूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया ॥ अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशम् । सर्वेषामविरोधेनब्रह्मकर्मसमारभे ॥ तीक्ष्णदंष्ट्रमहाकाय कल्पान्तदहनोपम । भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि ॥ तालत्रयकरणम्–ॐसर्वभूतनिवारकायशार्ङ्गायसशरायसुदर्शनायाऽस्त्रराजायहुंफट्स्वाहाअनेनतालत्रयंकृत्वास्वस्यपरितःसर्वदिक्षुअस्त्रमुद्रांप्रदर्शयेत् । ततःस्वदक्षिणभागे–ॐगुरुभ्योनमःॐपरमगुरुभ्योनमः ॐपरमेष्ठीगुरुभ्योनमः ॐपूर्वसिद्धेभ्योनमःॐआचार्येभ्योनमः ।

कान्यासमाचरेत् ॥ रुद्रकल्पद्रुमस्याभिषेकपरिच्छेदे–भूतशुद्ध्यादिकंकार्यमिति परशुरामादयः नैवेतिदेवयाज्ञिकनारायणभट्टादयः हेमाद्रौमहार्णवेचाप्येवम्। भूतशुद्ध्याद्यकरणेनरुद्रैवगुण्यंकरणेतुफलभूयस्त्वमितिकेचित् ।

स्ववामभागे–ॐगणेशायनमःॐदुर्गायैनमःॐक्षेत्रपालायनमः ॐयो गिनीभ्योनमःॐक्षेत्रेशायनमः । भूमिताडनम्–अपसर्पन्तुतेभूताये भूताभूमिसंस्थिताः । येभूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया ॥ अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशम् । सर्वेषामविरोधेनभूशुद्ध्यादि समारभे–अनेनमंत्रेणस्ववामपार्ष्णिनात्रिवारंभूमिंताडयेत् । भूरसीत्यस्यप्रजापतिर्ऋषिःमातृकादेवताप्रस्तारपंक्तिश्छन्दःभूशुद्धौविनियोगः । भूमौहस्तंकृत्वा–ॐभूरसिभूमिरस्यदितिरसिविश्वधायाविश्वस्यभुवनस्यधर्त्री॥पृथिवींच्छपृथिवींदृंहपृथिवीम्माहिंसीः॥ भैरवनमस्कारः–योभूतानामित्यस्य कौण्डिण्यऋषिः नारायणोदेवता अनुष्टुप्छन्दः भैरवनमस्कारे विनियोगः–ॐयोभूतानामधिपतिर्यस्मिँल्लोकाऽअधिश्रिताः ॥ षऽईशेमहतोमहाँस्तेनगृह्णामित्वामहम्मायिगृह्णामित्वामहम् ॥ ॥ भैरवायनमः । इतिभूशुद्धिः ॥

॥ ९ ॥ अथभूतशुद्धिः ॥

कुंभकप्राणायामेन मूलाधारात्कुंडलींपरदेवतां बिसतन्तुनिभां समुत्थाप्य ब्रह्मरंध्रगतां स्मृत्वा हृदयस्थं जीवं प्रदीपकलिकाकारं गृहीत्वासुषुम्नामार्गेण ब्रह्मरंध्रं गत्वा ॐहंसः सोहमिति मंत्रेणजीवं ब्रह्मणिसंयोजयेत् । मातृकोपसंहारः–ॐक्षकारं हकारेउपसंहरामि ॐहकारं सकारे उप० ॐसकारं षकारे उप० ॐषकारं शकारे उप० ॐशकारं वकारे उप० ॐवकारं लकारे उप० ॐलकारं रकारे उप०

---

१ मूलाधारात्समुत्थाप्यकुंडलींपरदेवताम् । सुषुम्नामार्गमाश्रित्यब्रह्मरंध्रगतां स्मरेत् । जीवंब्रह्मणिसंयोज्यहंसमंत्रेणसाधकः ॥ २ अयंमातृकोपसंहारःआह्निकसूत्रावल्यां अस्तिपरंतुकेष्वपिप्राचीनग्रन्थेषु न दृश्यते तत्र मूलं मृग्यम् ॥

ॐरकारं यकारे उप० ॐयकारं मकारे उप० ॐमकारं भकारे उप०
ॐभकारं बकारे उप० ॐबकारं फकारे उप० ॐफकारं पकारे उप०
ॐपकारं नकारे उप० ॐनकारं धकारे उप० ॐधकारं दकारे उप०
ॐदकारं थकारे उप० ॐथकारं तकारे उप० ॐतकारं णकारे उप०
ॐणकारं ढकारे उप० ॐढकारं डकारे उप० ॐडकारं ठकारे उप०
ॐठकारं टकारे उप० ॐटकारं ञकारे उप० ॐञकारं झकारे उप०
ॐझकारं जकारे उप० ॐजकारं छकारे उप० ॐछकारं चकारे उप०
ॐचकारं ङकारे उप० ॐङकारं घकारे उप० ॐघकारं गकारे उप०
ॐगकारं खकारे उप० ॐखकारं ककारे उप० ॐककारं अःकारे उ०
ॐअःकारंअंकारेउप०ॐअंकारंऔकारे उप०ॐऔकारं ओकारे उ०
ॐओकारं ऐकारे उप० ॐऐकारं एकारे उप० ॐएकारं ऌकारे उ०
ॐऌकारं ऍकारे उप० ॐऍकारं ॠकारे उप० ॐॠकारं ऋकारे उ०
ॐऋकारं ऊकारे उप० ॐऊकारं उकारे उप० ॐउकारं ईकारे उप०
ॐईकारं इकारे उप० ॐइकारंआकारे उप० ॐआकारंअकारे उ०
ॐअकारःसहस्रदलाम्बुजाकारेब्रह्मरन्ध्रेपरमात्मनिलयंगतइतिभाव-
येत्।शरीरस्यात्माऋषिःप्रकृतिश्छन्दःपरमात्मादेवताशरीरभूतशुद्ध्य
र्थेजपेविनियोगः। ॐपृथ्वीबीजमंत्रस्यब्रह्माऋषिःगायत्रीछन्दःपृथ्वी
देवतापृथ्वीभूतशुद्ध्यर्थे जपेविनियोगः—पादादिजानुपर्यंतंपृथिवी-

---

१ शरीराकारभूतानां भूतानां यद्विशोधनम् । अव्यक्तब्रह्मसंपर्काद्भूतशुद्धि-
रियंमता ॥ भूतशुद्धिंविनाकर्मक्रियतेयज्जपादिकम् । तत्सर्वंनिष्फलंयस्मात्तस्मात्तां
पूर्वमाचरेत् ॥ २ परशुराममहारुद्रपद्धतौ–पादादिजानुपर्यंतंभूतत्त्वंतत्रमण्डलम् ।
पार्थिवंचतुरस्रंतल्लँबीजं वज्रलांछितम् ॥ पीतवर्णंचतंध्यात्वाबीजोच्छ्रेतेन

स्थानंचतुरस्रंपीतवर्णंसबिंदुकं लँबीजसहितंध्यायेत् ॐवरुणबीजमंत्र स्यहिरण्यगर्भऋषिः अनुष्टुप्छन्दःवरुणोदेवतावारुणीभूतशुद्ध्यर्थे जपे विनियोगः—जान्वादिनाभिपर्यंतंवरुणमंडलं धनुषाकारं शुभ्रवर्णंस-बिन्दुकं वँबीजसहितं ध्यायेत् । ॐवह्निबीजमंत्रस्य कश्यपऋषिः जगतीछन्दःजातवेदोऽग्निर्देवता आग्नेयभूतशुद्ध्यर्थे जपे विनियोगः—नाभ्यांआरभ्यहृदयपर्यन्तं त्रिकोणं अग्निमंडलंरक्तवर्णं सबिंदुकंरँबी-जसहितंध्यायेत् । ॐवायुबीजमंत्रस्यकिष्कंदऋषिःबृहतीछन्दः वायु-र्देवता वायव्याख्यभूतशुद्ध्यर्थे जपे विनियोगः—हृदयादारभ्यभ्रूम-ध्यपर्यन्तंवायुमंडलं वर्तुलं धूम्रवर्णंसबिंदुकं यँबीजसहितं ध्यायेत् । ॐआकाशबीजमंत्रस्यरुद्रऋषिः त्रिष्टुप्छन्दः परमात्मादेवता आका-शाख्यभूतशुद्ध्यर्थे जपेविनियोगः—भ्रूमध्यादारभ्यललाटान्तपर्यन्तं आकाशमंडलं निरूपंअवर्णं सबिंदुकं हँबीजसहितं ध्यायेत् । ततः वायुंसम्यक्निरुध्यपृथिवींअप्सुलयंनयेत्तत्रमंत्रः—ॐ लँ ह्रौं ह्रुँ फट्

वापुनः । भावितेन च तेनैवपृथिवींप्राग्विशोधयेत् ॥ १ जान्वादिनाभिपर्यंतं आप-स्तत्त्वं द्वितीयकम् । वारुणं मंडलं तत्रधनुर्वद्विन्दुलांछितम् ॥ वंबीजंशुक्लवर्णं तद्ध्यात्वापस्तेन शोधयेत् ॥ २ नाभिहृदयपर्यन्तं तेजस्तत्त्वं तृतीयकम् । मंडलं वह्निसंज्ञंतत्त्रिकोणं पद्मलांछितम् ॥ रंबीजं रक्तवर्णं तद्ध्यात्वातेजस्तु शोधयेत् ॥ ३ हृदयादिभ्रुवोरन्तंवायुतत्त्वंचतुर्थकम् । वायव्यं मंडलं तत्र वर्तुलं स्वस्तिका-न्वितम् ॥ कृष्णवर्णं च यंबीजंध्यात्वा वायुं विशोधयेत् ॥ ४ भ्रूमध्याद्ब्रह्मरंध्रान्तं व्योमतत्त्वं च पंचमम् । हंबीजंनिर्मलं ध्यात्वातेनैव व्योमशोधयेत् ॥ ५ एवंभूतानिसंचिन्त्यप्रत्येकंप्रविलापयेत् । भुवंजलेजलं वह्नौवह्निंवायौ नभ-स्यमुम् ॥ विलाप्यखमहंकारेमहत्तत्त्वेऽप्यहंकृतम् । महान्तं प्रकृतौ मायामात्म-

भुवं जलेप्रविलापयामि । ततोजलंअग्नौसंहरेत्तत्रमंत्रः—ॐवँह्रीं ह्रः-फट् जलं शुचौप्रविलापयामि । ततःअग्निंवायौसंहरेत्तत्रमंत्रः—ॐरँह्रूँ ह्रःफट्अग्निंवायौप्रविलापयामि । ततःवायुंआकाशेलयंनयेत्तत्रमंत्रः—ॐयँह्रैंह्रूँह्रः फट् वायुं आकाशेप्रविलापयामि । ततःआकाशंअहंकारे संहरेत्तत्रमंत्रः—ॐ हँ ह्रौं ह्रः फट् आकाशंअहंकारे प्रविलापयामि । ॐअहंकारं प्रकृतौप्रविलापयामि । ॐप्रकृतिंपरमात्मनिप्रविलाप-यामि । ततः शिरसिकर्णिकाकेसरैर्युतेअष्टदले पद्मनिचंद्रसन्निभं चित्प्रकाशितं शिवंस्मृत्वाशुद्धचिन्मयोभूत्वावामकुक्षिस्थितं कृष्णं अङ्गुष्ठपरिमाणकं विप्रहत्याशिरोयुक्तंकनकस्तेयबाहुकंमदिरापान-हृदयं गुरुतल्पकटीयुतंततत्संयोगिपदद्वन्द्वं उपपातकरोमकंखड्गचर्मधरं दुष्टं अधोवक्त्रंदुःसहं पापपूरुषं चिन्तयेत् । यँ इतिवायुबीजं नाभौएकादशवारंस्मृत्वाएनं पापपूरुषं शोषयेत्—ॐयमितिवायुबी-जमंत्रस्यकिष्कंदऋषिःबृहतीछन्दःवायुर्देवतापापपूरुषशोषणे विनि-योग—ःनाभिकुहरादुत्थितेन महावायुना ॐ यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ यँ (जप्त्वा) ॐपापपूरुषंशोषयामि ॥ ॐरंमितिअग्निबीजमंत्रस्यकश्यपऋषिःजगतीछन्दः जातवेदोऽग्निर्देव-तापापपूरुषदहने विनियोगः—मूलाधारादुत्थितेन अग्निकलापेन नव-

---

निप्रविलापयेत् ॥ १ नाभौस्मृत्वामरुद्बीजंयमित्यक्षरसंयुतम् । कृष्णंषट्कोणमं-गस्थंशोषयेत्तच्चवायुना ॥ २ रमित्यक्षरसंयुक्तं त्रिकोणं वह्निमण्डलम् । रुद्रवारं जपित्वा तु निर्दहेत्पापपूरुषम् ॥ अन्यग्रन्थेषुयमितिबीजंषोडशवारंरमितिचतुः षष्टिवारंवमितिद्वात्रिंशद्वारंजप्त्वाशोषणादिविधिर्दर्शितस्तथाप्यत्रप्रयोगेकाशिदीक्षि-तकृतरुद्रपद्धत्यनुसारेणसर्वाण्यपिबीजान्येकादशवारंजप्त्वाशोषणादिविधिरुक्तः ।

रंध्रप्रविष्टेन ॐ रँरँरँरँरँरँरँरँरँरँरँ (जप्त्वा) ॐपापपूरुषं संदहामि ॥ ॐवंमितिवरुणबीजमंत्रस्य हिरण्यगर्भऋषिः अनुष्टुप्छन्दः वरुणोदेवताजीवसंदोहाप्लवने विनियोगः–दग्ध्वातद्दक्षिणयानासिकयाविरेच्यमूलाधारात्सुषुम्णामार्गेण कुंडलिनीं सच्चिदानंदमयीं द्वादशान्तंनीत्वा तत्संसर्गाद्गुतच्चिन्द्रमण्डलाद्विगलितसुधाधारापूरेण ॐ वँ वँ वँ वँवँवँवँवँ वँवँवँ (इत्यमृतबीजंजप्त्वा) ॐजीवसंदोहं आप्लावयामि ॥ ॐलँमितिपृथिवीबीजमंत्रस्य ब्रह्माऋषिः गायत्रीछन्दःपृथिवीदेवताभस्मपिण्डीकरणेविनियोगः–ॐ लँ लँ लँ लँ लँ लँ लँ लँ लँ लँ (जप्त्वा) ॐअमृतपिण्डाच्छरीरमुत्पादयामि ॥ ॐहँमितिआकाशबीजमंत्रस्यब्रह्माऋषिःगायत्रीछन्दःपरमात्मादेवता अवकाशीकरणेविनियोगः–ॐ हँ हँ हँ हँ हँ हँ हँ हँ हँ हँ (जप्त्वा) ॐसावकाशंकरोमि ॥ ततः सृष्टिमार्गेणब्रह्मणःसकाशादाकाशादीनि भूतानिउत्पादयेत्–ब्रह्मणः प्रकृतिःप्रकृतेर्महत्महतोऽहंकारःअहंकारादाकाशःआकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यःपृथिवीपृथिव्याओषधयःओषधीभ्योऽन्नम् अन्नाद्रेतःरेतसःपुरुषःसवाएषपुरुषोऽन्नरसमयः ॐहंसःसोहम् ब्रह्मण्येकभूतं जीवंस्वहृदयाम्बुजे संस्थाप्य कुंडँलींमूलाधारगतांसंस्मरेत् ॥ इतिभूतशुद्धिः ॥

---

१ ततो हृत्पद्ममध्यस्थाच्चन्द्रबिंबात्परेरितात् । वमित्यक्षरसंयुक्तान्निर्गतामृतवृष्टिभिः । सुधाबीजेनदेहोत्थंभस्मसंप्लावयेत्सुधीः ॥ २ भूबीजेनघनीकृत्यभस्मतत्कनकाण्डवत् । ३ हंबीजंनिर्मलं जप्त्वासावकाशंतुकारयेत् ॥ ४ कुंडली जीवमादायपरसङ्घात्सुधामयीम् । संस्थाप्यहृदयाम्भोजेमूलाधारगतंस्मरेत् ॥

॥ ६ ॥ अथप्राणप्रतिष्ठाप्रयोगः ॥

अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः ऋग्यजुः-सामानिछन्दांसि जगत्सृष्टिःप्राणशक्तिर्देवता आँबीजं ह्रीँशक्तिः क्रौँकीलकंस्वशरीरेप्राणप्रतिष्ठापने विनियोगः–ॐब्रह्मविष्णुमहेश्वर-ऋषिभ्योनमःशिरसि । ऋग्यजुःसामच्छन्दोभ्योनमःमुखे । जगत्सृष्टयेप्राणशक्तयेनमःहृदये । आँबीजायनमः लिङ्गे । ह्रीँशक्तयेनमः पादयोः । क्रौँ कीलकायनमःसर्वाङ्गेषु । अथकरन्यासाः–ॐआँ ह्रीँ क्रौँ अँ कँ खँ गँ घँ ङँ पृथिव्यप्तेजोवाय्वाकाशात्मने आँअंगुष्ठाभ्यांनमः ॐआँह्रीँ क्रौँ इँ चँ छँ जँ झँ ञँ शब्दस्पर्शरूपरसगन्धात्मने ईँ तर्जनी-भ्यांनमः । ॐआँ ह्रीँ क्रौँ उँ टँ ठँ डँ ढँ णँ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणा-त्मने ऊँमध्यमाभ्यांनमः । ॐ आँ ह्रीँ क्रौँ एँ तँ थँ दँ धँ नँ वाक्पा-णिपादपायूपस्थात्मने ऐँ अनामिकाभ्यांनमः । ॐ आँ ह्रीँ क्रौँ ओँ पँ फँ बँ भँ मँ वक्तव्यादानगमनविसर्गानंदात्मने औँ कनिष्ठिकाभ्यां नमः । ॐ आँ ह्रीँ क्रौँ अँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ मनोबुद्ध्य-हङ्कारचित्तविज्ञानात्मने अः करतलकरपृष्ठाभ्यांनमः । अथहृदया-दिन्यासाः–ॐ आँ ह्रीँ क्रौँ अँ कँ खँ गँ घँ ङँ पृथिव्यप्तेजोवाय्वा-काशात्मने आँहृदयायनमः । ॐ आँ ह्रीँ क्रौँ इँ चँ छँ जँ झँ ञँ शब्द-स्पर्शरूपरसगन्धात्मने ईँ शिरसे स्वाहा । ॐ आँ ह्रीँ क्रौँ उँ टँ ठँ डँ ढँ णँ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊँ शिखायैवषट् । ॐ आँ ह्रीँ क्रौँ एँ तँ थँ दँ धँ नँ वाक्पाणिपादपायूपस्थात्मने ऐँ कवचायहुम् । ॐ

आँ ह्रीँ क्रौँ ओँ पँ फँ बँ भँ मँ वक्तव्यादानगमनाविसर्गानंदात्मने औँ नेत्रत्रयायवौषट् । ॐ आँ ह्रीँ क्रौँ अँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ मनोबुद्ध्यहंकारचित्तविज्ञानात्मने अः अस्त्रायफट् । आँ इति पाशबीजंनाभेरारभ्यपादान्तंन्यसामि । ह्रीँ इति शक्तिबीजंहृदयादारभ्यनाभ्यन्तंन्यसामि । क्रौँ इति अंकुशबीजं मस्तकादारभ्यहृदयान्तं न्यसामि । ॐयँत्वगात्मने हृदयायनमः । ॐ रँ असृगात्मने दोर्मूलाभ्यांनमः । ॐ लँ मांसात्मने ग्रीवायैनमः । ॐ वँ मेदात्मने कुक्षिभ्यांनमः ॐ शँ अस्थ्यात्मने दक्षिणकरायनमः । ॐ षँ मज्जात्मनेवामकरायनमः । ॐ सँशुक्रात्मनेदक्षिणपादायनमः । ॐ हँप्राणात्मने वामपादायनमः । ॐ ळँ शक्त्यात्मनेजठरायनमः ॐ क्षं बीजात्मनेआस्यायनमः । ध्यानम्—रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैःपाशंकोदण्डमिक्षूद्भवमथगुणमप्यङ्कुशंपञ्चबाणान्। बिभ्राणासृक्कपालंत्रिनयनलसितापीनवक्षोरुहाढ्यादेवीबालार्कवर्णा भवतुसुखकरीप्राणशक्तिःपरानः ॥ ततोहृदयेहस्तंनिधाय—ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ हंसः सोहंममप्राणाइहप्राणाः ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ हंसः सोहंममजीवइहस्थितः ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ हंसः सोहंममसर्वेन्द्रियाणिइहायान्तु ॐ आँ ह्रीँ क्रौँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ हंसः सोहंममवाङ्मनश्चक्षुः श्रोत्रघ्राणप्राणाःइहैवागत्यस्वस्तयेसुखंचिरंतिष्ठन्तुस्वाहा । ततःषोडशवारंप्रणवंजपन् षोडशसंस्कारान्भावयेत्—ॐ गर्भाधानंसंपादया-

मि ॐ पुंसवनंसं० ॐ सीमन्तोन्नयनंसं० ॐ जातकर्मसं० ॐ नाम करणंसं० ॐ निष्क्रमणंसं० ॐ अन्नप्राशनंसं० ॐ चूडाकरणंसं० ॐ उपनयनंसं० ॐ वेदव्रतचतुष्टयंसं० ॐ गोदानंसं० ॐ व्रतविसर्गंसं० ॐ विवाहंसं० ॥ इतिप्राणप्रतिष्ठाप्रयोगः ॥

॥ ७ ॥ अन्तर्मातृकान्यासप्रयोगः ॥

अस्य श्रीअन्तर्मातृकान्यासस्यब्रह्माऋषिः दैवीगायत्रीच्छन्दः अन्तर्मातृकासरस्वतीदेवता हलोबीजानिस्वराःशक्तयःबिन्दवःकीलकंअनुष्ठीयमानश्रीपूजनपूर्वकरुद्राभिषेकाङ्गत्वेनन्यासेविनियोगः । ऋष्यादिन्यासाः—ॐ ब्रह्मणेनमः[1] शिरसि ॐ गायत्रीच्छन्दसेनमो मुखे ॐ अन्तर्मातृकासरस्वतीदेवतायैनमोहृदि ॐ हल्बीजेभ्योनमः गुह्ये ॐ स्वरशक्तिभ्योनमः पादयोः ॐ बिन्दुकीलकायनमः सर्वाङ्गे॥ ततः प्राणायामत्रयंकृत्वाकरन्यासाः—ॐ अँ कँ खँ गँ घँ ङँ आँ अङ्गुष्ठाभ्यांनमः ॐ इँ चँ छँ जँ झँ ञँ ईँ तर्जनीभ्यांनमः ॐ उँ टँ ठँ डँ ढँ णँ ऊँ मध्यमाभ्यांनमः ॐ एँ तँ थँ दँ धँ नँ ऐँ अनामिकाभ्यांनमः ॐ ओँ पँ फँ बँ भँ मँ औँ कनिष्ठिकाभ्यांनमः ॐ अँ यँ रँ लँ वँ शँ षँ सँ हँ ळँ क्षँ अः करतलकरपृष्ठाभ्यांनमः। हृदयादिषडङ्गन्यासाः—ॐ अँ कँ खँ गँ घँ ङँ आँ हृदयायनमः ॐ इँ चँ छँ जँ झँ ञँ ईँ शिरसेस्वाहा ॐ उँ टँ ठँ डँ ढँ

---

१ सोहमिति ॥ २ उच्चार्यैवंऋषिच्छन्दोदेवताबीजशक्तयः । शिरोवदनहृद्गुह्यपादेषुक्रमतोन्यसेत् ॥ ३ इडयापूरयेत्प्राणान्स्वरैर्वर्गैश्चकुंभयेत् । रेचयेद्यादिकैर्वर्णैस्ततःपिङ्गलयापुनः । तथैवपूरणंवायोःकुंभकंरेचनंपुनः । इडयास्यात्ततोद्वाभ्यांपूरणाद्यित्रयंपुनः । प्राणायामत्रयंत्वेवंकृत्वान्यासान्समारभेत् ॥

णँ ऊँ शिखायैवषट् ॐ एँ तँ थँ दँ धँ नँ ऐं कवचायहुम् ॐ ओं पँ फँ बँ भँ मँ औं नेत्रत्रयायवौषट् ॐ अं यँ रँ लँ वँ शँ षँ सँ हँ क्षँ अः अस्त्राय-फट् । ध्यानम्–पञ्चाशल्लिपिभिर्विभज्यमुखदोर्हृत्पद्मवक्षस्थलांभास्व-न्मौलिनिबद्धचन्द्रशकलामापीनतुङ्गस्तनीम् । मुद्रामक्षगुणंसुधाढ्यक-लशंविद्यांचहस्ताम्बुजैर्बिभ्राणांविशदप्रभांत्रिनयनांवाग्देवतामाश्रये । ततः कंठस्थषोडशदलपद्मेअकारादिषोडशस्वरान्यसेत्–ॐ अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ ऌँ ॡँ एँ ऐं ओं औं अं अः । हृदयस्थेद्वादशदलपद्मेका-दिठान्तान्न्यसेत्–ॐ कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ । नाभौदशदल पद्मेडादिफान्तान्न्यसेत्–ॐ डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ । तदधःलिङ्ग षड्दलेबादिलान्तान्न्यसेत्–ॐ बँ भँ मँ यँ रँ लँ । आधारेगुदेचतुर्दलेवा-दिसान्तान्न्यसेत्–ॐ वँ शँ षँ सँ । ललाटेद्विदले ॐ हँ क्षँ इति द्वौव-र्णौविन्यसेत् । ध्यानम्–आधारेलिङ्गनाभौमकटितहृदयेतालुमूलेल-लाटेद्वेपत्रेषोडशारेद्विदशदशदलेद्वादशार्द्धेचतुष्के । वासान्तेबालमध्ये डफकठसहितेकण्ठदेशेस्वराणांहंक्षंतत्त्वार्थयुक्तंसकलदलगतंवर्णरूपंन-मामि ॥ बंधूकाभांत्रिनेत्रांपृथुजघनलसत्कुक्षिमुद्रक्तवस्त्रांपीनोत्तुङ्गप्र वृद्धस्तनजघनभरांयौवनारंभरूढाम्। सर्वालङ्कारयुक्तांसरसिजवदना मिन्दुसंक्रान्तमौलिमंबापाशाङ्कुशेष्टाभयवरदकरामंबिकांतांनमामि ॥ वर्णांगवर्णमालांगींभारतींभाललोचनाम् । रत्नसिंहासनांदेवींवन्दे ऽहंसिद्धमातृकाम् ॥ इतिअन्तर्मातृकान्यासप्रयोगः ॥

॥ ८ ॥ अथ बहिर्मातृकान्यासप्रयोगः ।

अस्य श्रीबहिर्मातृकान्यासस्य ब्रह्माऋषिः दैवीगायत्रीच्छन्दः

बहिर्मातृकासरस्वतीदेवताहलोबीजानिस्वराःशक्तयःबिन्दवःकीलकं अनुष्ठीयमानश्रीपूजनपूर्वकरुद्राभिषेकाङ्गत्वेनन्यासेविनियोगः । ऋष्यादिन्यासाः—ॐ ब्रह्मणेनमः शिरसि ॐ गायत्रीच्छन्दसेनमो मुखे ॐ बहिर्मातृकासरस्वतीदेवतायैनमोहृदि ॐ हल्बीजेभ्योनमः गुह्ये ॐ स्वरशक्तिभ्योनमः पादयोः । ॐ अँ नमःमौलौ ॐ आँ नमः मुखे ॐ इँ नमः दक्षिणनेत्रे ॐ ईँ नमः वामनेत्रे ॐ उँ नमः दक्षिणकर्णे ॐ ऊँ नमः वामकर्णे ॐ ऋँ नमः दक्षिणनासापुटे ॐ ॠँ नमः वामनासापुटे ॐ ऌँ नमः दक्षिणकपोले ॐ ॡँ नमः वामकपोले ॐ एँ नमः ऊर्ध्वदन्तपङ्क्तौ ॐ ऐँ नमः अधोदन्तपङ्क्तौ ॐ ओँ नमः ऊर्ध्वोष्ठे ॐ औँ नमः अधरोष्ठे ॐ अँ नमः जिह्वामूले ॐ अः नमः ग्रीवायाम् ॥ ॐ कँ[1] नमः दक्षिणबाहुमूले ॐ खँ नमः दक्षिणकूर्परे ॐ गँ नमः दक्षिणमणिबन्धे ॐ घँ नमः दक्षिणकराङ्गुलिमूले ॐ ङँ नमः दक्षिणकराङ्गुल्यग्रे ॐ चँ नमः वामबाहुमूले ॐ छँ नमः वामकूर्परे ॐ जँ नमः वाममणिबन्धे ॐ झँ नमः वामाङ्गुलिमूले ॐ ञँ नमः वामकराङ्गुल्यग्रे ॐ टँ नमः दक्षिणपादमूले ॐ ठँ नमः दक्षिणजानुनि ॐ डँ नमः दक्षिणगुल्फे ॐ ढँ नमः दक्षिणपादाङ्गुलिमूले ॐ णँ नमः दक्षि-

---

१ आद्योमौलिरथापरोमुखमिईनेत्रेचकर्णावुऊनासावंशपुटेऋऋतदनुजौवर्णौ कपोलद्वये। दन्ताश्चोर्ध्वमधस्तथोष्ठयुगलंसन्ध्यक्षराणिक्रमात्जिह्वामूलमुदग्रबिन्दुरपरोग्रीवाविसर्गीश्वरः ॥ २ कादिर्दक्षिणतोभुजस्तदपरोवर्गश्चवामोभुजष्टादिस्तादिरनुक्रमेणचरणौकुक्षिद्वयंवैपफौ । अंसःपृष्ठभवोऽथनाभिरुदरंबादित्रयंधातवोयाद्याःसप्तसमीरणाश्चसपराःक्षान्तास्तुक्रोडेन्यसेत् ॥ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणिधातवः । प्राणशक्तयात्मपरमात्मोचिताव्यापकास्त्वमी ॥

णपादाङ्गुल्यग्रे ॐ तँ नमः वामपादमूले ॐ थँ नमः वामजानुनि ॐ दँ नमः वामगुल्फे ॐ धँ नमः वामपादाङ्गुलिमूले ॐ नँ नमःवामपादाङ्गुल्यग्रे ॐ पँ नमः दक्षिणकुक्षौ ॐ फँ नमः वामकुक्षौ ॐ बँ नमः पृष्ठे ॐ भँ नमः नाभौ ॐ मँ नमः उदरे ॐ यँ त्वगात्मनेनमः हृदि ॐ रँ असृगात्मनेनमः दक्षिणांसे ॐ लँ मांसात्मनेनमःककुदि ॐ वँ मेदात्मनेनमः वामांसे ॐ शँ अस्थ्यात्मनेनमःहृदादिदक्षिणहस्तान्तम् ॐ षँ मज्जात्मनेनमः हृदादिवामहस्तान्तम् ॐ सँ शुक्रात्मनेनमः हृदादिदक्षिणपादान्तम् ॐ हँ प्राणात्मनेनमः हृदादिवामपादान्तम् ॐ ळँ शक्त्यात्मनेनमः उदरे ॐ क्षँ परमात्मनेनमः मुखे ॥ ध्यानम्—पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशांभास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् । अक्षस्रक्कुंभचिंतालिखितवरकरांत्रीक्षणांपद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरांभारतींतांनमामि॥ इतिबहिर्मातृकान्यासप्रयोगः ॥

॥ ९ ॥ अथ महान्यासप्रयोगः ।

छन्दःपुरुषन्यासः—ॐ तिर्यग्बिलायचमसायोर्ध्वबुध्नायछन्दःपुरुषायनमः शिरसि ॐगोतमभरद्वाजाभ्यांनमः नेत्रयोः ॐविश्वामित्रजमदग्निभ्यांनमः श्रोत्रयोः ॐ वसिष्ठकश्यपाभ्यांनमः नासापुटयोः ॐ अत्रयेनमः वाचि ॐ गायत्र्यैछन्दसेनमः अग्नयेनमः शिरसि ॐ उ-

---

१ यादयोहृदयेंऽसेथककुद्यंसेहृदादिच । करपादयुगेन्यस्येदुदराननयोस्तथा । लिपिवर्णाश्शरीरेस्वेदेशिकोयतमानसः ॥ २ एतेअनादेशेसर्वेष्यङ्गुष्ठानामिकाभ्यां कार्याःआदेशेतुयथादेशम् ॥

ष्णिहेछन्दसेनमः सवित्रेनमः ग्रीवायाम् ॐ बृहत्यैछन्दसेनमः बृहस्पतयेनमः अनूके[1] ॐ बृहद्रथन्तराभ्यांनमः द्यावापृथिवीभ्यांनमः बाह्वोः ॐ त्रिष्टुभेछन्दसेनमः इन्द्रायनमः मध्ये[2] ॐ जगत्यैछन्दसेनमः आदित्यायनमः श्रोण्योः ॐ अतिछन्दसेनमः प्रजापतयेनमः लिङ्गे ॐ यज्ञायज्ञियायछन्दसेनमः वैश्वानरायनमः पायौ ॐ अनुष्टुभेछन्दसेनमः विश्वेभ्योदेवेभ्योनमः ऊर्वोः ॐ पङ्क्त्यैछन्दसेनमः मरुद्भ्योनमः अष्ठीवन्तोः[3] ॐ द्विपदायैछन्दसेनमः विष्णवेनमः पादयोः ॐ विच्छन्दसेनमः वायवेनमः प्राणेषु[4] ॐ न्यूनाक्षरायछन्दसेनमः अद्भ्योनमः हस्तद्वयविपर्यासेनमस्तकादिपादान्तंसर्वाङ्गेषु[5] । इति सर्वानुक्रमसूत्रविहितश्छन्दःपुरुषन्यासः ॥

अथ बृहत्पराशरस्मृतिविहितःपञ्चाङ्गरुद्राणांन्यासःप्रथमः—मनोजूतिरित्यस्यआङ्गिरसोबृहस्पतिर्ऋषिः यजुश्छन्दः विश्वेदेवादेवता हृदये न्यासेविनियोगः । हृदयंस्पृष्ट्वा—ॐ मनोजूतिर्ज्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोऽइम्प्रतिष्ठ ॥ १३/२ ॥ हृदयायनमः । अबोध्यग्निरित्यस्यबुधगविष्ठिराबृषी त्रिष्टुप्छन्दः अग्निर्देवताशिरसिन्यासेविनियोगः । शिरः स्पृष्ट्वा—ॐ अबोध्यग्नि?समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ॥

---

१ अनूकंपृष्ठवंशम् ॥ २ मध्यमुदरम् ॥ ३ अष्ठीवान्जानु ॥ ४ प्राणवायोः सचारस्थानं नासिकाप्राणशब्देनोच्यते ॥ ५ वक्ष्यमाणेषुसर्वेष्वंगन्यासेषुतत्तदंगं स्पृष्ट्वासर्वेन्यासमंत्राः सस्वराएवन्यस्तव्याः ॥ ६ जूतिर्ज्जुषतामित्यस्यस्थानेज्योतिर्ज्जुषतामित्येवंकाण्वपाठःएवंन्यासपूजादौप्रतीकेनविनियुक्तमंत्राःस्वशाखासमधीतपाठाः पठनीयानपुनर्माध्यंदिनशाखासमधीतपाठाः इतितेषांविशेषः ॥

मुहूर्ब्राऽइवप्पवयामुज्जिहानाᳬप्रभानवः÷सिस्रतेनाकमच्छ ॥ २४/१८ ॥ शिरसेस्वाहा । मूर्द्धानमित्यस्यभरद्वाजऋषिः त्रिष्टुप्छन्दःवैश्वानरोऽग्निर्देवताशिखायांन्यासेविनियोगः । शिखांस्पृष्ट्वा–ॐमूर्द्धानन्दिवोऽअरतिम्पृथिव्याऽवैश्वानरमृतऽआजातमग्निम् ॥ कविᳬसम्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवा? ॥ २४/७ ॥ शिखायैवषट् । मर्म्माणितइत्यस्यविवस्वानृषिःत्रिष्टुप्छन्दःलिङ्गोक्तादेवताःकवचन्यासेविनियोगः– ॐमर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्बरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ ४९/१७ ॥ कवचायहुम् । मानस्तोकइत्यस्यकुत्सऋषिःजगतीछन्दःएकोरुद्रोदेवताअस्त्रन्यासेविनियोगः–ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषᳬ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तᳬसदमित्त्वाहवामहे ॥ १६/६ ॥ अस्त्रायफट् । इतिपंचांगन्यासःप्रथमः ॥

अथ द्वितीयोन्यासः–यातेरुद्रेत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःएकोरुद्रोदेवताशिखायांन्यासेविनियोगः–ॐयातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ १६/२ ॥शिखायाम् । अस्मिन्महत्यर्णवइत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःबहवोरुद्रादेवताःशिरसिन्यासेविनियोगः–ॐअस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाᳬसहस्रयोजनेवधन्वानितन्मसि ॥ १६/६ ॥ शिरसि । असङ्ख्याताइत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःबहवोरुद्रादेवताललाटेन्यासेविनियोगः ॐअसङ्ख्याताᳬसहस्राणिये रुद्राऽअधिभूम्यांम् ॥ तेषाᳬसहस्रयोजनेवधन्वानितन्मसि ॥ १६/६ ॥ ललाटे । त्र्यम्बकमितिद्वयोराद्यस्यवसिष्ठऋषिःद्वितीयस्यप्रजापतिर्ऋषिःअनुष्टु-

पृछन्दःत्र्यम्बकोरुद्रोदेवतानेत्रयोर्न्यासेविनियोगः—ॐत्र्यम्बकंय्यजा महेसुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यम्बकंय्यजामहेसुगन्धिम्पतिवेदनम् । उर्व्वारुकमिवबन्धनाद्दितोमुक्षीयमामुतः÷ ॥ ६० ॥ नेत्रयोः । मानस्तोकइत्यस्यकुत्सऋषिः जगतीछन्दःएकोरुद्रोदेवतानासिकायांन्यासेविनियोगः—ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे ॥ १६ ॥ नासिकायाम् । अवतत्येत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःएकोरुद्रोदेवता मुखेन्यासेविनियोगः—ॐअवतत्यधनुष्टवंसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोनःसुमनाभव ॥ १३ ॥ मुखे । नीलग्रीवाइति द्वयोःपरमेष्ठीऋषिःअनुष्टुप्छन्दःबहवोरुद्रादेवताःकंठेन्यासेविनियोगः ॐनीलग्रीवाःशितिकण्ठादिवंरुद्राऽउपश्रिताः ॥ तेषाःसहस्रयोजनेवधन्वानितन्मसि ॥ १५ ॥ ॐनीलग्रीवाःशितिकण्ठाःशर्व्वाऽअधःक्षमाचराः ॥ तेषाःसहस्रयोजनेवधन्वानितन्मसि ॥ १७ ॥ कण्ठे । नमस्तऽआयुधायेत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःएकोरुद्रोदेवतापकोष्ठयोर्न्यासेविनियोगः—ॐनमस्तऽआयुधायानाततायधृष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यान्तवधन्वने ॥ १४ ॥ प्रकोष्ठयोः । येतीर्थानीत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःबहवोरुद्रादेवताःहस्तयोर्न्यासेविनियोगः—ॐयेतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः÷ ॥ तेषाःसहस्रयोजनेवधन्वानितन्मसि ॥ ६१ ॥ हस्तयोः । नमोवः

१ मणिबन्धादुपरिकूर्परादधोभागः प्रकोष्ठः ॥

किरिकेभ्यइत्यस्यपरमेष्ठीऋषिःसामोष्णिक्यजुरुष्णिक्यजुरुष्णिक्यजुरुष्णिक्दैवीजगतीवाछन्दांसिकिरिकादयोमंत्रवर्णावगताअन्यतरतोनमस्काराबहवोरुद्रादेवताःहृदयेन्यासेविनियोगः—ॐनमोव८ंकिरिकेब्भ्योदेवानाᳬहृदयेब्भ्योनमोविचिन्वत्केब्भ्योनमोविक्षिणत्केब्भ्योनमऽआनिर्हतेब्भ्यः ॥ ४६ ॥ हृदये । नमोहिरण्यबाहवइत्यस्यपरमेष्ठीऋषिःअत्रैकादशाक्षराणांयजुस्त्रिष्टुप्अष्टाक्षराणांयजुरनुष्टुप् दशाक्षरस्ययजुःपङ्क्तिरितिछन्दांसिहिरण्यबाह्वादयोमंत्रवर्णावगताउभयतोनमस्काराबहवोरुद्रादेवतानाभौन्यासेविनियोगः—ॐनमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमोनमोवृक्षेब्भ्योहरिकेशेब्भ्यव८ंपशूनाम्पतयेनमोनमः शष्पिञ्जरायत्विषीमतेपथीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमः ॥ ४७ ॥ नाभौ । इमारुद्रायेत्यस्यकुत्सऋषिःजगतीछन्दःएकोरुद्रोदेवतागुह्येन्यासेविनियोगः—ॐइमारुद्रायतवसेकपर्दिनेक्षयद्वीरायप्रभरामहेमती? ॥ यथाशमसद्द्विपदेचतुष्पदे विश्वंपुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ गुह्ये । मानोमहान्तमित्यस्यकुत्सऋषिःजगतीछन्दःएकोरुद्रोदेवताऊर्वोर्न्यासेविनियोगः ॐमानोमहान्तमुतमानोऽअर्भकम्मान्नऽउक्षन्तमुतमान्नऽउक्षितम् ॥ मानोवधी८ंपितरम्मोतमातरम्मान्ऽप्रियास्तन्वोरुद्ररीरिष८ं ॥ ४९ ॥ ऊर्वोः । एषतइत्यस्यप्रजापतिर्ऋषिःसामपङ्क्तिर्यजुर्जगतीछन्दांसिरुद्रोदेवताजान्वोर्न्यासेविनियोगः—ॐएषतेरुद्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ ५० ॥ जान्वोः । अवरुद्रमित्यस्यप्रजापतिर्ऋषिःपङ्क्तिश्छन्दःरुद्रोदेवताजङ्घयोर्न्यासेविनियोगः—ॐअवरुद्रमदीमहावदेवन्त्र्यम्बकम् ॥ यथानोवस्यसस्करद्यथानव८ं

श्रेयसस्करद्यथानोऽवसाययात् ॥ ५८/३ ॥ जङ्घयोः । अद्ध्यवोच-
दित्यस्यपरमेष्ठीऋषिःपङ्क्तिश्छन्दःएकोरुद्रोदेवताकवचन्यासेविनियो
गः—ॐअद्ध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहीꣳश्चसर्वाञ्ज-
म्भयन्तसर्वाश्चयातुधान्योधराचीःपरासुव ॥ ५८/४ ॥ कवचायहुम् ।
नमोबिल्मिनइत्यस्यपरमेष्ठीऋषिःषडक्षराणांयजुर्गायत्रीपञ्चाक्षरयो-
र्दैवीपङ्क्तिःसप्ताक्षरस्ययजुरुष्णिक्छन्दांसिबिल्मिनादयोमंत्रवर्णावग-
ताअन्यतरतोनमस्काराबहवोरुद्रादेवताउपकवचन्यासेविनियोगः—
ॐनमोबिल्मिनेचकवचिनेचनमोवर्म्मिणेचवरूथिनेचनमः श्रुतायं
चश्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायच ॥ ५८/५ ॥ उपकवचम् ।
नमोस्तुनीलग्रीवायेत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःएकोरुद्रोदेवता
तृतीयनेत्रन्यासेविनियोगः—ॐनमोस्तुनीलग्रीवायसहस्राक्षायमीदु
षे ॥ अथोयेऽअस्यसत्वानोहन्तेभ्योकरन्नमः ॥ ५८/६ ॥ मुष्टितोविमुक्तया
मध्यमयातृतीयनेत्रे । प्रमुञ्चेत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःएकोरु-
द्रोदेवताअस्त्रन्यासेविनियोगः—ॐप्रमुञ्चधन्वनस्त्वमुभयोरात्न्योर्
ज्यार्म् ॥ याश्चतेहस्तऽइषवःपरातार्भगवोवप ॥ ५८/७ ॥ अस्त्रायफट् ।
यऽएतावन्तश्चेत्यस्यपरमेष्ठीऋषिःअनुष्टुप्छन्दःबहवोरुद्रादेवतादिग्ब-
न्धनेविनियोगः—ॐयऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्राविंतस्थि
रे ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥ ५८/८ ॥ दिक्षुविदिक्षुच
परस्परंतर्जन्यङ्गुष्ठाग्रस्फोटनेनदिग्बन्धः ॥ इतिशिखाद्यस्त्रान्तोदिग्बन्ध
सहितएकोनविंशत्यङ्गन्यासोद्वितीयः ॥

---

१ जानुगुल्फयोरन्तरालं जङ्घा ॥ २ कवचाद्विपरीतमुपकवचमिति महार्णवकारा-
नुसारिणः सर्वेनिबन्धकाराः पद्धतिकाराश्च । कवचोपरिकवचमुपकवचमित्यपरे ॥

अथ तृतीयोन्यासः—ॐनमोभगवतेरुद्रायेतिदशाक्षरमंत्रस्यप्रजापतिर्ऋषिःविराट्छन्दःश्रीरुद्रोदेवतान्यासेविनियोगः—ॐनमःमूर्द्धनि ॐनंनमःनासिकायाम् ॐमोंनमःललाटे ॐभंनमःमुखे ॐगंनमःकण्ठेॐवंनमःहृदये ॐतेंनमःदक्षिणहस्तेॐरुंनमःवामहस्ते ॐद्रांनमःनाभौ ॐयंनमः पादयोः ॥ इति दशाक्षरमंत्रन्यासस्तृतीयः ॥

अथ चतुर्थोन्यासः—त्रातारमित्यस्यगर्गऋषिःत्रिष्टुप्छन्दः इन्द्रोदेवतापाच्यांसंपुटीकरणेविनियोगः—ॐत्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् ॥ ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः ॥ ५ । ८ ॥ प्राच्याम् । त्वन्नोऽअग्नइत्यस्यहिरण्यस्तूपआङ्गिरसऋषिःजगतीछन्दःअग्निर्देवताआग्नेय्यांसंपुटीकरणेविनियोगः—ॐत्वन्नोऽअग्नेतवदेवपायुभिर्म्मघोनोरक्षतन्वश्चवन्द्य ॥ त्रातातोकस्यतनयेगवामस्यनिमेषꣳरक्षमाणस्तवव्रते ॥ १ । ३ ॥ आग्नेय्याम् । सुगन्नुपन्थामित्यस्यप्रजापतिर्ऋषिःत्रिष्टुप्छन्दःवैवस्वतोदेवतादक्षिणस्यांदिशिसंपुटीकरणेविनियोगः—ॐसुगन्नुपन्थांप्रदिशंनऽएहिज्योतिष्मद्धेह्यजरन्नऽआयुः॥अपैतुमृत्युरमृतंमऽआगाद्वैवस्वतोनोऽअभयंकृणोतु॥ दक्षिणस्याम् । असुन्वन्तमित्यस्यप्रजापतिर्ऋषिःत्रिष्टुप्छन्दःनिर्ऋतिर्देवतानैर्ऋत्यांसंपुटीकरणेविनियोगः—ॐअसुन्वन्तमयजमानमिच्छस्तेनस्येत्यामान्विहितस्करस्य ॥ अन्यमस्मदिच्छसातऽइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ ६ । ३ ॥ नैर्ऋत्याम् । तत्त्वायामीत्यस्यशुनःशेपऋषिःत्रिष्टुप्छन्दःवरुणोदेवताप्रतीच्यांसंपुटीकरणे विनियोगः—

---

१ सचमुद्रिताञ्जलिनाप्राच्यादिदिक्षुवक्ष्यमाणमंत्रैःकार्यः ॥

ॐतत्त्वायामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोव्वरुणेहबोध्युरुशꣳसमानऽआयुꣳप्रमोषीꣳ ॥ ४५/१८ ॥ प्रतीच्याम् । आनोनियुद्भिरित्यस्यवसिष्ठऋषिःत्रिष्टुप्छन्दःवायुर्देवतावायव्यांसंपुटीकरणेविनियोगः—ॐ आनोनियुद्भिः शतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञम् ॥ वायोऽअस्मिन्त्सवनेमादयस्वऽऊर्य्यम्पात्स्वस्तिभिꣳसदानꣳ ॥ ३६/३८ ॥ वायव्याम् । त्र्यꣳसोमेत्यस्यबन्धुऋषिःगायत्रीछन्दः सोमोदेवताउदीच्यांसंपुटीकरणे विनियोगः—ॐत्र्यꣳसोमव्रतेतवमनस्तनूषुबिभ्रतꣳ ॥ प्रजावन्तꣳसचेमहि॥ ५/३६॥ उत्तरस्याम् । तमीशानमित्यस्यगोतमऋषिःजगती छन्दः ईशानोदेवताऐशान्यांसंपुटीकरणे विनियोगः—ॐतमीशानञ्जगतस्तस्थुषस्पतिंन्धियञ्जिन्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धꣳस्वस्तये ॥ ३६/६ ॥ ऐशान्याम् । अस्मेरुद्राइत्यस्यप्रगाथऋषिःत्रिष्टुप्छन्दःब्रह्मादेवताऊर्ध्वायांसंपुटीकरणेविनियोगः—ॐअस्मेरुद्रामेहनापर्व्वतासोवृत्रहत्येभरहूतौसजोषाꣳ ॥ यꣳशꣳसंतेस्तुवतेधायिपज्रऽइन्द्रज्येष्ठाऽअस्माँ२अवन्तुदेवाः ॥ ५/३६ ॥ ऊर्ध्वायाम् । स्योनापृथिवीत्यस्यमेधातिथिऋषिः गायत्रीछन्दः अनन्तोदेवताअधोदिशिसंपुटीकरणेविनियोगः—ॐस्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानꣳशर्म्मसप्रथाꣳ ॥ १३/३६ ॥ अधोदिशि । त्रातारमित्यस्यगर्गऋषिः त्रिष्टुप्छन्दः इन्द्रोदेवताप्राच्यांनमस्कारेविनियोगः—ॐत्रातारमिन्द्रं० इंद्रायनमः । त्वन्नोऽअग्नइत्यस्यहिरण्यस्तूपआङ्गिरसऋषिः जगतीछन्दः अग्निर्देवताआग्नेय्यांनमस्कारेविनियोगः—ॐत्वन्नोऽअग्ने०अग्नयेनमः । सुगन्नुपन्थामित्यस्यप्रजापतिर्ऋ-

षिःत्रिष्टुप्छन्दःवैवस्वतोदेवतादक्षिणस्यांदिशिनमस्कारेविनियोगः-ॐसुगन्नुपन्था० यमायनमः । असुन्वन्तमित्यस्यप्रजापतिर्ऋषिःत्रिष्टुप्छन्दः निर्ऋतिर्देवतानैर्ऋत्यांनमस्कारे विनियोगः—ॐअसुन्वन्त० नैर्ऋतयेनमः । तत्त्वायामीत्यस्यशुनःशेपऋषिः त्रिष्टुप्छन्दःवरुणोदेवताप्रतीच्यांनमस्कारे विनियोगः—ॐतत्त्वायामि० वरुणायनमः । आनोनियुद्भिरित्यस्यवसिष्ठऋषिःत्रिष्टुप्छन्दः वायुर्देवतावायव्यांनमस्कारेविनियोगः—ॐआनोनियुद्भि÷० वायवेनमः । ध्रुवꣳसोमेत्यस्यबन्धुऋषिःगायत्रीछन्दः सोमोदेवताउदीच्यांनमस्कारेविनियोगः—ॐध्रुवꣳसोम०कुबेरायनमः । तमीशानमित्यस्यगोतमऋषिः जगतीछन्दःईशानोदेवताऐशान्यांनमस्कारेविनियोगः—ॐतमीशानं० ईशानायनमः । अस्मेरुद्राइत्यस्यप्रगाथऋषिःत्रिष्टुप्छन्दःब्रह्मादेवता ऊर्ध्वायांनमस्कारेविनियोगः—ॐअस्मेरुद्रा० ब्रह्मणेनमः । स्योनापृथिवीत्यस्यमेधातिथिऋषिःगायत्रीछन्दःअनन्तोदेवताअधोदिशिनमस्कारेविनियोगः—ॐस्योनापृथिवि० अनन्तायनमः । इतिसंपुटाख्योन्यासश्चतुर्थः ॥

अथ पञ्चमोन्यासः-यज्जाग्रतइतिषड्ऋचशिवसंकल्पसूक्तस्यशिवसंकल्पऋषिःत्रिष्टुप्छन्दःमनोदेवताहृदयेन्यासेविनियोगः । मुष्टिविनिर्गतां गुष्ठौसंयुक्तौकृत्वाहृदयेसंस्थाप्य-ॐयज्जाग्रतो०येनकर्म्मा०यत्प्रज्ञा० येनेदम्भू०यस्मिन्नृचः÷०सुषारथि०हृदयायनमः । सहस्रशीर्षेतिषोडशर्चस्यपुरुषसूक्तस्यनारायणपुरुषऋषिःआद्यानांपंचदशानामनुष्टुप्छ-

१ काण्वशाखायां त्वेकस्या एव ऋचः शिवसंकल्पदृष्टायाः समाम्नातत्वाद्यज्जाग्रत इत्येकया ऋचा हृदयन्यास इति काण्वानां विशेषः ॥

न्दःयज्ञेनयज्ञमित्यस्यास्त्रिष्टुप्छन्दःजगद्धीजंपुरुषोदेवताशिरसि न्यासे विनियोगः। मुष्टिविनिर्गतांगुष्ठौसंयुक्तौनिस्तर्जनी कौललाटेकृत्वा– ॐसहस्रशीर्षा०पुरुषऽएवे० एतावानस्य०त्रिपादूर्द्ध्व० ततोविराट० तस्माद्यज्ञा०तस्माद्यज्ञा०तस्माद्यज्ञा०तस्माद्यश्वा०तंयज्ञं०यत्पुरुषं०ब्राह्मणोस्य० चन्द्रमा०नाभ्यां०यत्पुरुषेण०सप्तास्यां० यज्ञेनयज्ञ०शिरसे-स्वाहा॥ अद्भ्यःसंभृतइतिषड्ऋचस्यउत्तरनारायणस्यनारायणपुरुषऋषिः आद्यानांतिसृणांत्रिष्टुप्छन्दःचतुर्थपञ्चमयोरनुष्टुप्छन्दः अंत्यस्यास्त्रिष्टुप्छन्दःआदित्योदेवताशिखायांन्यासेविनियोगः । मुष्टिपुटौकरौकृत्वांगुष्ठावधः प्रसक्ताग्रौकनिष्ठेचोर्ध्वतः प्रसक्ताग्रेकृत्वाशिखांस्पृष्ट्वा– ॐअद्भ्य?० वेदाहमे० प्रजापति० योदेवेभ्य÷० रुचम्ब्रा०श्रीश्चते० शिखायैवषट् । आशुः शिशानइतिद्वादशर्चस्यामतिरथस्यअमतिरथऋषिःत्रिष्टुप्छन्दःइन्द्रोदेवताकवचन्यासेविनियोगः। ॐआशु?०संक्रन्दने०सऽइषु०बृहस्पते०बलविज्ञा० गोत्राभिदं० अभिगोत्राणि०इन्द्रऽआसा०इन्द्रस्य०उद्धर्षय० अस्माक० अमीषांश्चित्तं० कवचायहुम् इत्युच्चार्यअङ्गुष्ठौप्रसक्ताग्रौतर्जन्यौचत्रिकोणवत्कृत्वामूर्द्धिपश्चान्मुखंकृत्वाउभयपार्श्वतःकरौहृदन्तंनयन्कवचंन्यसेत् ॥ विभ्राडित्यस्यविभ्राट्सौर्यऋषिःजगतीछन्दःसूर्योदेवताउदुत्यमितितिसृणांप्रस्कण्वऋषिःगायत्रीछन्दःसूर्योदेवतातम्प्रत्क्रथेत्यस्यब्रह्मस्वयंभुऋषिः जगतीछन्दःविश्वेदेवादेवताअयंवेनइत्यस्यब्रह्मस्वयंभुऋषिः त्रिष्टुप्छन्दः सोमोदेवताचित्रमित्यस्यब्रह्मस्वयंभुऋषिःत्रिष्टुप्छन्दःसूर्योदेवताआनइत्यस्यअगस्त्यऋषिःत्रिष्टुप्छन्दःसूर्योदेवतायदद्येत्यस्यश्रुतकक्षसुतं-

कक्षावृषीगायत्रीछन्दःसूर्योदेवतातरणिरित्यस्यप्रस्कण्वऋषिःगायत्री छन्दःसूर्योदेवतातत्सूर्यस्येतिद्वयोःकुत्सऋषिःत्रिष्टुप्छन्दःसूर्योदेवता बण्महानितिद्वयोर्जमदग्निर्ऋषिः आद्यस्यबृहतीछन्दः द्वितीयस्यसतो बृहतीछन्दःसूर्योदेवताश्रायन्तइवेत्यस्यनृमेधऋषिःबृहतीछन्दः सूर्यो देवताअद्यादेवाइत्यस्यकुत्सऋषिःत्रिष्टुप्छन्दःसूर्योदेवताआकृष्णेने-त्यस्यहिरण्यस्तूपआंगिरसऋषिःत्रिष्टुप्छन्दःसूर्योदेवतानेत्रत्रयन्या-सेविनियोगः–ॐविष्णोरराट्० उदुत्यं० येनापावक० दैव्यावद्धर्ष्णू० तम्प्रत्क्नथा० अयंवेन० चित्रन्देवा० आनऽइडा० षदद्य० तरणि० तत्सूर्यस्य० तन्मित्रस्य० बण्महाँ० बट्सूर्य० श्रायन्त० अद्यादेवा० आकृष्णेन० नेत्रत्रयायवौषट् । नमस्तेरुद्रेतिशतरुद्रियाख्यस्यरौद्रा-ध्यायस्यपरमेष्ठीऋषिःदेवाऋषयःप्रजापतिर्वाऋषिः नमस्तेरुद्रेत्यस्य गायत्रीछन्दःयातेरुद्रेत्यादीनांतिसृणामनुष्टुप्छन्दःअद्ध्यवोचदधीत्या दितिसृणांपङ्क्तिछन्दः नमोऽस्तुनीलग्रीवायेत्यादिसप्तानामनुष्टुप्छ-न्दःमानोमहान्तमितिद्वयोःकुत्सोऽपिऋषिःजगतीछन्दःसर्वासामेको रुद्रोदेवतानमोहिरण्यबाहवइत्यादिद्रापेत्यन्तःप्राक्तनेषुचतुरक्षराणां यजुषांदैवीबृहतीछन्दःपंचाक्षराणांदैवीपङ्क्तिः षडक्षराणांदैवीत्रिष्टुप्य जुर्गायत्रीवासप्ताक्षराणांदैवी जगतीयजुरुष्णिग्वाअष्टाक्षराणांयजुरनु

---

१ विभ्राडित्यादिकं भुवनानि पश्यन् इत्यन्तं प्रतीकचोदिताभिस्तिसृभिः सहसप्तदशर्चमनुवाकं जप्त्वानेत्रत्रयेन्यसेत् ॥ २ नमो हिरण्यबाहव इत्यादीनां यजुषामनियताक्षरत्वाच्छन्दोनास्तीत्येकेषांमते । पिंगलमते तु एकाक्षरप्रभृत्ये-कैकाक्षरवृद्ध्यानियताक्षराणां षडधिकशताक्षरपर्यन्तानां यजुषां छन्दोविशेष-नियमोऽस्त्येव ॥

ष्टुप्प्राजापत्यागायत्रीवानवाक्षराणांयजुर्बृहतीआसुरीजगतीवादशाक्ष
राणांयजुःपङ्क्तिः एकादशाक्षराणांयजुस्त्रिष्टुप्आसुरीपङ्क्तिर्वाद्वादशाक्ष
राणांयजुर्जगतीआसुरीबृहतीवाप्राजापत्योष्णिग्वासामगायत्रीवाच-
तुर्दशाक्षरस्यसामोष्णिक्नमो हिरण्यबाहवइत्यादीनांश्वपतिभ्यश्चवोन
मइत्यन्तानांयजुषांहिरण्यबाहुःसेनानीर्दिशांपतिरित्यादिमंत्रवर्णाव-
गतनामकाउभयतोनमस्काराबहवोरुद्रादेवताः नमोभवायचरुद्रायचे-
त्यादीनांप्रखिदतेचेत्यन्तानांयजुषांभवादयो मंत्रलिङ्गावगताअन्यत
रतोनमस्काराबहवोरुद्रादेवताः नमइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमइत्यस्य
यजुषउभयतोनमस्काराबहवोरुद्रादेवताःनमोहिरण्यबाहवइत्यादयो
नमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमइत्यन्ताद्वन्द्विनः नमःसभाभ्यइत्यादयो
नमआनिर्हतेभ्यइत्यन्ताजातौक्याःनमोवःकिरिकेभ्यइत्यादीनामग्नि-
वायुसूर्यहृदयभूतव्याहृतीनांअन्यतरतोनमस्काराबहवोरुद्रादेवताःद्रा
पेत्यस्याउपरिष्टाद्बृहतीछन्दःइमारुद्रायेत्यस्याः कुत्सोपिऋषिःजगती
छन्दःयातइत्यस्याअनुष्टुपूछन्दःपरिनइतिद्वयोस्त्रिष्टुप्छन्दःविकिरि-
द्रसहस्राणीतिद्वयोःअनुष्टुप्छन्दःसप्तानामेकोरुद्रोदेवताअसङ्ख्याते
त्यादीनांदशानामनुष्टुप्छन्दः बहवोरुद्रादेवतानमोस्तुरुद्रेभ्यइत्यादी
नांत्रयाणांयजुषांधृतिश्छन्दःबहवोरुद्रादेवताःसकलाध्यायस्यशतशी-
र्षोरुद्रोवादेवताअस्त्रन्यासे विनियोगः—ॐनमस्तेरुद्रमन्यवइत्याद्यार-
भ्यतमेषाञ्जम्भेदध्मःइत्यन्तं षट्षष्टिकण्डिकात्मकशतरुद्रियाख्यरौद्रा-

---

१ नमो वः किरिकेभ्य इति चतुर्दशाक्षरं सामोष्णिगेकमेव ॥ २ तत्र दे-
वतामंत्रवर्णादेवचतुर्थ्यन्ताः प्रसिद्धाः ॥ ३ चतुःषष्टिकण्डिकात्मकोरौद्राध्याय
इति काण्वानां विशेषः ॥

ध्यायंजप्त्वाअस्त्रायफट्इत्युच्चार्यपरस्परतालंकुर्वन्नस्त्रंन्यसेत् ॥ इतिपञ्चमोन्यासः ॥

अथ षष्ठोन्यासः—प्रजननेब्रह्मातिष्ठतुपादयोर्विष्णुस्तिष्ठतुहस्तयोर्हरस्तिष्ठतुबाह्वोरिन्द्रस्तिष्ठतुजठरेऽग्निस्तिष्ठतुहृदयेशिवस्तिष्ठतुकण्ठेवसवस्तिष्ठन्तुवक्त्रेसरस्वतीतिष्ठतुनासिकयोर्वायुस्तिष्ठतुनयनयोःसूर्याचन्द्रमसौतिष्ठताम् कर्णयोरश्विनौतिष्ठताम् ललाटे रुद्रास्तिष्ठन्तुमूर्द्धिं आदित्यास्तिष्ठन्तुशिरसिमहापुरुषस्तिष्ठतुशिखायांचामुंडातिष्ठतुपृष्ठे पिनाकीतिष्ठतुपुरतःशूलीतिष्ठतुपार्श्वयोःशिवाशङ्करौतिष्ठताम् सर्वतो वायुस्तिष्ठतुबहिःसर्वतोऽग्निर्ज्वालामालापरिवृतस्तिष्ठतुसर्वेष्वङ्गेषुसर्वादेवतास्तिष्ठन्तुसर्वाङ्गेमांरक्षन्तु ॥ इतिषष्ठोन्यासः ॥

अथलघुन्यासः—अग्निर्मेवाचिश्रितइत्यादिभिर्मन्त्रैर्यथालिंगमंगानिसंस्पृशेत्तद्यथा ॥ ॐ अग्निर्मेवाचिश्रितःवाक्हृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणि—वाचंस्पृशेत् ॐ वायुर्मेप्राणेश्रितःप्राणोहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणि—हृदयंस्पृशेत् ॐसूर्योमेचक्षुषिश्रितःचक्षुर्हृदयेहृदयंमयि अहममृतेअमृतंब्रह्मणि—चक्षुषीस्पृशेत् ॐचन्द्रमामेमनसिश्रितःमनोहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणि—वक्षःस्पृशेत् ॐ दिशोमेश्रोत्रेश्रिताःश्रोत्रंहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणि—श्रोत्रे स्पृशेत् ॐ आपोमेरेतसिश्रिताःरेतोहृदयेहृदयंमयिअहममृतेअमृतंब्र-

---

१ स च अभिषेक एव भवति ॥ २ अग्निर्वायुश्च सूर्यश्च चन्द्रमा दिश एव च । आपः पृथिव्योषधय इन्द्रः पर्जन्य एव च । ईशान आत्मा च पुनर्लघुन्यासे त्रयोदश ॥ ३ मनसः स्थानत्वात् ॥

ह्मणि–लिङ्गंस्पृशेत् ॐ पृथिवीमेशरीरेश्रिताशरीरंहृदयेहृदयंमयिअ-
हममृतेअमृतंब्रह्मणि–शरीरंस्पृशेत् ॐ ओषधिवनस्पतयोमेलोमसु
श्रिताःलोमानिहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणि–रोमकूपान्स्पृ-
शेत् ॐ इन्द्रोमेबलेश्रितःबलंहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणि–
सर्वाङ्गेस्पृशेत् ॐ पर्जन्योमेमूर्द्धिश्रितःमूर्द्धाहृदयेहृदयंमयिअहममृते
अमृतंब्रह्मणि-मस्तकंस्पृशेत् ॐईशानोमेमन्यौश्रितःमन्युर्हृदयेहृदयंम
यिअहममृतेअमृतंब्रह्मणि–हृदयंस्पृशेत् ॐ आत्मामआत्मनिश्रितः
आत्माहृदयेहृदयंमयिअहममृतेअमृतंब्रह्मणि–वक्षःस्पृशेत् ॐ पुनर्म-
आत्मापुनरायुरागात्पुनःप्राणःपुनराकूतमागात् । वैश्वानरोरश्मिभि-
र्वावृधानःअन्तस्तिष्ठत्वमृतस्यगोपाःसर्वशरीरंस्पृशेत् ॥ एषतइत्यस्य
प्रजापतिऋषिःसामपंक्तिर्यजुर्जगतीछन्दसीरुद्रोदेवतायोनिमुद्राप्रदर्श
नेविनियोगः ॐ एषतेरुद्रभागःसहस्वस्राम्बिकयातꣳसुष्वस्वाहैषतेरु
द्रभागऽआखुस्तेपशुः ॥ ५७/३ ॥ अनेनमंत्रेणयोनिमुद्रांप्रदर्श्य ॥

---

१ क्रोधादिस्थानत्वात् ॥ २ चित्तस्थानत्वात् ॥ ३ रुद्रकल्पद्रुमे-एवं न्यासविधिं कृत्वा ततो मुद्रां प्रदर्शयेत् । शिवपुष्टिः शिवस्योक्ता सैव शान्तिप्रदायिनी । एष ते रुद्रभाग इति मुद्राप्रदर्शनम् । श्रीकामः शीर्ष्णि कुर्वीत तेजस्कामस्तुनेत्रयोः । मुखेत्वन्नाद्यकामस्तु ग्रीवायां रोगनाशने । हृदये सर्वकामस्तु नाभौ ज्ञानी प्रदर्शयेत् । प्रजाकामस्तु गुह्ये वै पशुकामस्तु जंघयोः । जानुभ्यां ग्रामकामस्तु राष्ट्रकामस्तु पादयोः । वशीकरणकामस्तु वामहस्ते प्रदर्शयेत् । पापक्षयेऽभिचारे च व्याधेरपगमे तथा । बहिः शरीरात्कुर्वीत शिवस्याज्ञेति च स्मरन् । एवं प्रदर्शयित्वा तु ततो ध्यानं समारभेत् ॥

॥ १० ॥ अथ रुद्रपूजनप्रयोगः ॥

आत्मनःश्रीरुद्रस्वरूपेणध्यानम्—पंचास्यंसौम्यमात्मानं सर्वाभरणभूषितम् । मृगलाञ्छनमूर्द्धानंशुद्धस्फटिकसन्निभम् । फणासहस्रविस्फूर्जदुरगेन्द्रोपवीतिनम् । सप्तार्चिर्विज्वलज्ज्वालजटाजूटकिरीटिनम् । सहस्रकरविभ्राजत्खट्वांगादिविभूषितम् । ब्रह्मांडखंडवत्काशत्कपालवरधारिणम् । देदीप्यमानंचन्द्रार्कज्वलदग्नित्रिनेत्रिणम् । त्रैलोक्यद्योतिकृद्भास्वत्स्कन्धेकपालमालिनम् । दीप्तनक्षत्रमालावदक्षमालाधरंविभुम् । निःशेषवारिसंपूर्णकमंडलुकरंत्वजम् । जगद्बाधिर्यकृन्नादमुच्चंडमरुधारिणम् । केयूरबद्धनागेन्द्रमूर्द्धमणिविराजितम् । मेखलाकिंकिणीमालामुक्तारावविराजितम् । घर्घराव्यक्तनिर्गच्छद्गंभीरारावनूपुरम् । व्याघ्रचर्मपरीधानंगजचर्मवसानकम् । सहेमपट्टनीलाभव्याघ्रचर्मोत्तरीयकम् । विद्युल्लताप्रभागंगाभातमूर्द्धसुरार्चितम् । समस्तभुवनाधारधरणोक्षासनस्थितम् । त्रैलोक्यवनितामूर्द्धनतदेहार्धपार्वतीम् । लक्षसूर्यप्रभाभास्वत्त्रैलोक्यकृतपाण्डुरम् । अमृतप्लुतहृष्टांगंदिव्यभोगसमाकुलम् । दिग्देवतासमायुक्तंसुरासुरनमस्कृतम् । नित्यंशाश्वतमव्यक्तंव्यापिनंनन्दिनंध्रुवम् ॥ इत्थंश्रीरुद्रस्वरूपमात्मानंध्यात्वाआत्मनिपुष्पाक्षतमक्षेपेण श्रीरुद्रस्यावाहनम्—ॐआराधितोमनुष्यैस्त्वंसिद्धैर्देवासुरादिभिः । आराधयामिभक्त्यात्वांगृहाणपरमेश्वर ॥ श्रीरुद्रइहागच्छइहतिष्ठइ-

---

१ द्विजो ध्यात्वैवमात्मानं सम्यग्रुद्रस्वरूपिणम् । संप्रध्वस्तांतरायः सन्ततो यजनमारभेत् ॥

त्यात्मनिपुष्पाक्षतप्रक्षेपणंकुर्यात् । त्र्यम्बकमित्यस्यवसिष्ठऋषिः अनुष्टुप्छन्दः त्र्यम्बकोरुद्रोदेवतास्वात्मनिश्रीरुद्रपूजनेविनियोगः—ॐ त्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धना-न्मृत्योर्मुक्षीयमामृतात् ॥ ६०/३ ॥ स्वशरीरेवस्थितश्रीरुद्रस्वरूपिणे जीवात्मनेनमःगन्धाक्षतपुष्पाणिसमर्पयामि । नैवेद्यंपरिकल्पयामि[1] । स्वदक्षिणभागेसाधारस्थताम्रपात्रस्यस्थापनम् । नमःशंभवायेत्य-स्यपरमेष्ठीऋषिःअत्रसप्ताक्षराणांयजुरुष्णिक्छन्दःषडक्षराणांयजुर्गा-यत्रीछन्दःशंभवादयोमंत्रवर्णावगताअन्यतरतोनमस्काराबहवोरुद्रादे वताअर्घपूरणेविनियोगः—ॐ नमः शम्भवायचमयोभवायचनमः शङ्कायचमयस्कायचनमः शिवायचशिवतरायच ॥ ५१/६६ ॥ अनेन मंत्रेणतीर्थोदकेनार्घपूरयित्वातस्मिन्गन्धाक्षतपुष्पाणिप्रक्षिपेत् । नमः शंभवायेत्यस्यपरमेष्ठीऋषिःअत्रसप्ताक्षराणांयजुरुष्णिक्छन्दःषडक्ष-राणांयजुर्गायत्रीछन्दःशंभवादयोमंत्रवर्णावगताअन्यतरतोनमस्का-राबहवोरुद्रादेवताअर्घाभिमंत्रणेविनियोगः—ॐनमः शम्भवाय० इतिमंत्रमष्टवारंजपित्वाअर्घाभिमंत्रणंकुर्यात् । नमःशंभवायेत्यस्यप-रमेष्ठीऋषिःअत्रसप्ताक्षराणांयजुरुष्णिक्छन्दः षडक्षराणांयजुर्गायत्री छन्दःशंभवादयोमंत्रवर्णावगताअन्यतरतोनमस्काराबहवोरुद्रादेवताः संभारप्रोक्षणेविनियोगः—ॐनमः शम्भवाय० इतिमंत्रेणपात्रान्त-रगृहीतेनतदर्घोदकेनपूजासंभारान्संप्रोक्षयेत् । [आसनाद्युपचारस-मर्पणादिवक्ष्यमाणंसर्वंदेवकार्यमनेनैवार्घोदकेनकर्तव्यम्] अथाक्षतैः

---

१ अत्र नैवेद्यमपि मानसं परिकल्पयेदिति महार्णवः ॥

पुष्पैर्वापीठपूजा । पीठस्याधोभागे—ॐआधारशक्त्यैनमः ॐकूर्मायनमः ॐअनन्तायनमः ॐवराहायनमः ॐपृथिव्यैनमः ॐविचित्रदिव्यमंडपायनमः । मंडपपरितः—ॐकल्पवृक्षेभ्योनमः ॐसुवर्णवेदिकायैनमः ॐरत्नसिंहासनायनमः एभिर्मंत्रैरुपर्युपरिपूजा । सिंहासनपादेषु—ॐधर्मायनमः आग्नेय्याम् ॐज्ञानायनमः नैर्ऋत्याम् ॐवैराग्यायनमः वायव्याम् ॐऐश्वर्यायनमः ऐशान्याम् । गात्रेषु—ॐअधर्मायनमः पूर्वस्याम् ॐअज्ञानायनमःदक्षिणस्याम् ॐ अवैराग्यायनमः पश्चिमायाम् ॐ अनैश्वर्यायनमः उत्तरस्याम् । सिंहासनोपरि—ॐ तल्पाकारायानन्तायनमः ॐ पद्मायनमः ॐ आनन्दकन्दायनमः ॐ संविन्नालायनमः ॐ प्रकृतिमयपत्रेभ्योनमः ॐ विकारमयकेसरेभ्योनमः ॐ पंचाशद्वर्णाढ्यकर्णिकायैनमः । पद्मस्यदलकेसरकर्णिकास्वर्चनम्—ॐअंसत्त्वायनमः पद्मदलेषु ॐ उँ रजसेनमः केसरेषु ॐ मं तमसेनमः कर्णिकासु । एवं प्रतित्रिकंसर्वत्रयथा—ॐ अँ द्वादशकलात्मनेऽर्कमंडलायनमः पद्मदलेषु ॐ उँ षोडशकलात्मने सोममंडलायनमः केसरेषु ॐ मं दशकलात्मनेऽग्निमंडलायनमः कर्णिकासु । ॐ अँ ब्रह्मणेनमः पद्मदलेषु ॐ उँ विष्णवेनमः केसरेषु ॐ मं महेश्वरायनमः कर्णिकासु । ॐ अं आत्मनेनमः पद्मदलेषु ॐ उँ अन्तरात्मनेनमः केसरेषु ॐ मं परमात्मनेनमः कर्णिकासु ॐ आं ज्ञानात्मनेनमः पद्मेषु सर्वत्र ॥ स्वाग्रतः पद्मपूर्वादिपत्रेषु—ॐवामायैनमः ॐज्येष्ठायैनमः ॐरौद्र्यैनमः ॐकाल्यैनमः ॐकलविकरण्यैनमः ॐबलविकरण्यैनमः ॐबलप्रमथिन्यैनमः ॐसर्वभूतदमन्यैनमः इत्यष्टौशक्तीः

संपूज्य । कर्णिकायाम्—ॐ मनोन्मन्यैनमः । ॐ नमोभगवतेसकलगुणात्मशक्तियुक्तायानन्तायोगपीठात्मनेनमः इति कर्णिकायां पुष्पाञ्जलिनापीठंसंपूज्यसत्यज्ञानानन्तानन्दरूपंपरंधामैवसकलंपीठमितिचिन्तयेत् ॥ इतिपीठपूजा ॥ पीठोपरिस्थापितपात्रेशिवलिंगंधातुमयींशैवींप्रतिमांवाप्रतिष्ठाप्यआवाहनम्—अञ्जलौपुष्पाण्यादायसूर्यमंडलेस्वहृत्कमलेवाश्रीरुद्रंध्यात्वा ॐआत्वावहन्तुहरयःसचेतसःश्वेतैरश्वैःसहकेतुमद्भिः । वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रंममहव्यायशर्वोम् ॥ ॐत्र्यंम्बकंय्यजामहे०सद्योजातंप्रपद्यामि भगवन्तंसहस्राक्षंविरूपाक्षंमहादेवंसाम्बशिवंआवाहयामि । इतिसूर्यमंडलेस्वहृत्कमलेवास्थितायाःदेवमूर्तेःसकाशादीपादीपान्तरमिनिर्गतंदक्षिणनासापुटेनाञ्जलिस्थपुष्पेष्वागतंदेवंविभाव्यपीठस्थेशिवलिंगादावंजलिस्थपुष्पप्रक्षेपेणशिवमावाहयेत् । ॐत्र्यम्बकंय्यजामहे० सद्योजातायवैनमोनमःभगवतेसाम्बशिवायआसनंसमर्पयामि । ॐत्र्यम्बकंय्यजामहे०भवेभवेनातिभवेभवस्वमांभगवतेसाम्बशिवायपाद्यंसमर्पयामि ॐत्र्यम्बकंय्यजामहे० भवोद्भवायनमः भगवतेसाम्बशिवायअर्घ्यंसमर्पयामि ॐआपोहि० योवः०तस्माअरङ्ग०ॐत्र्यम्बकंय्यजामहे० वामदेवायनमः भगवतेसाम्बशिवायस्नानंसमर्पयामि । अङ्गिस्तर्पणम्—ॐभवंदेवंतर्पयामि ॐशर्वंदेवंतर्पयामि ॐईशानंदेवंतर्पयामि ॐपशुपतिंदेवंतर्पयामि ॐरुद्रंदेवंतर्पयामि ॐउग्रंदेवंतर्प-

---

१ एवं त्र्यम्बकं यजामह इति मंत्रेण सह समुच्चितैः सद्योजातं प्रपद्यामीति मंत्रैः सर्वेऽप्युपचाराः कार्या इति रुद्रकल्पद्रुमे ॥

यामि ॐभीमंदेवंतर्पयामि ॐमहान्तंदेवंतर्पयामि । इतितर्पयित्वा ॐत्र्यम्बकंय्यजामहे० ज्येष्ठायनमः भगवतेसाम्बशिवायआचमनीयं समर्पयामि ॐत्र्यम्बकंय्यजामहे० श्रेष्ठायनमोरुद्रायनमः भगवतेसाम्बशिवायमधुपर्कंसमर्पयामि ॐत्र्यम्बकंय्यजामहे० कालायनमः भगवतेसाम्बशिवायगन्धंसमर्पयामि ॐत्र्यम्बकंय्यजामहे० कलविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायनमः भगवतेसाम्बशिवायपुष्पाणिसमर्पयामि ॐत्र्यम्बकंय्यजामहे० सर्वभूतदमनायनमः भगवतेसाम्बशिवायधूपंसमर्पयामि ॐत्र्यम्बकंय्यजामहे० मनोन्मनायनमः भगवतेसाम्बशिवायदीपंसमर्पयामि ॐत्र्यम्बकंय्यजामहे० भवोद्भवायनमः भगवतेसाम्बशिवायनैवेद्यंसमर्पयामि नैवेद्यान्तेआचमनीयंसमर्पयामि । ततोऽष्टाभिर्मंत्रैरष्टौपुष्पाणिदद्यात् ॐभवायदेवायनमः ॐशर्वायदेवायनमः ॐईशानायदेवायनमः ॐपशुपतयेदेवायनमः ॐरुद्रायदेवायनमः ॐउग्रायदेवायनमः ॐभीमायदेवायनमः ॐमहतेदेवायनमः । अघोरेभ्यइत्यस्यअघोरऋषिः अनुष्टुप्छन्दः रुद्रोदेवतातत्पुरुषायेत्यस्यतत्पुरुषऋषिः गायत्रीछन्दः रुद्रोदेवताईशानइत्यस्यईशानऋषिःअनुष्टुप्छन्दः रुद्रोदेवतासर्वेषामघोरादिशरीरोपस्थानेविनियोगःॐअघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः । सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ तत्पुरुषाय विद्महेमहादेवायधीमहि । तन्नोरुद्रःप्रचोदयात् ॥ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तु सदाशिवोम् ॥ इत्युपस्थाय ॥

॥ ११ ॥ अथपञ्चवक्त्रपूजनम् ।

अथसमाचारात्पञ्चवक्त्रपूजा । तत्रगन्धसिताक्षतश्वेतपुष्पैःपश्चिमवक्त्र-पूजनम्—सद्योजातोव्यमिमीतेत्यस्यजमदग्निऋषिःत्रिष्टुप्छन्दःस्वाहा-कृतिर्देवतापश्चिमवक्त्रपूजने विनियोगः—ॐसद्योजातोव्यमिमीतयज्ञम-ग्निर्देवानांमभवत्पुरोगा? ॥ अस्यहोतुः÷प्रदिशृतस्यवाचिस्वाहाकृ-तꣳहविरदन्तुदेवा? ॥ ३६ ॥ सद्योजातायपश्चिमवक्त्रायनमःगन्धसि-ताक्षतश्वेतपुष्पाणिसमर्पयामि । गन्धतुलसीशतपत्रैश्चोत्तरवक्त्रपूज-नम्—वाममद्येत्यस्यभरद्वाजऋषिःत्रिष्टुप्छन्दःसवितादेवताउत्तरवक्त्र पूजने विनियोगः—ॐवाममद्यसवितर्वाममुश्वोदिवेदिवेवाममस्म-भ्यꣳसावीः ॥ वामस्यहिक्षयस्यदेवभूरेरयाधियावामभाजः÷स्याम ॥ ६ ॥ वामदेवायोत्तरवक्त्रायनमः गन्धादितुलसीशतपत्राणिसमर्प-यामि । गन्धनीलाब्जकरवीरैश्चदक्षिणवक्त्रपूजनम्—यातेरुद्रशिवेत्यस्य परमेष्ठीऋषिःअनुष्टुप्छन्दःएकोरुद्रोदेवतादक्षिणवक्त्रपूजनेविनियोगः-ॐयातेरुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागि रिशन्ताभिचाकशीहि ॥ ७ ॥ अघोरायदक्षिणवक्त्रायनमःगन्धादि-नीलाब्जकरवीरपुष्पाणिसमर्पयामि । गन्धादिदूर्वाकुरार्कपुष्पैश्चपूर्व-वक्त्रपूजनम्—यत्पुरुषमित्यस्यनारायणऋषिः अनुष्टुप्छन्दःजगद्बीजं पुरुषोदेवताप्राग्वक्त्रपूजने विनियोगः—ॐयत्पुरुषꣳव्यदधुःकतिधाव्य-कल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ ३९ ॥ तत्पुरुषायपूर्ववक्त्रायनमः गन्धादिदूर्वाङ्कुरार्कपुष्पाणिसमर्पयामि । गन्धादिबिल्वकनकपुष्पैश्चोर्ध्ववक्त्रपूजनम्—तमीशानमित्यस्यगोतम-ऋषिःजगतीछन्दः ईशानोदेवताऊर्ध्ववक्त्रपूजनेविनियोगः—ॐतमी-

शानञ्जगतस्तस्थुषस्पतिंन्धियञ्जिन्वमवसेहूमहेवयम् ॥ पूषानोयथा वेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ १६ ॥ ईशानायोर्ध्ववक्त्रायनमःगन्धादिबिल्वकनकपुष्पाणिसमर्पयामि । इतिरुद्रकल्पद्रुमान्तर्गतअभिषेकपरिच्छेदोक्तएकतरप्रकारेणपञ्चवक्त्रपूजनम् ।

अथप्रकारान्तरेणपञ्चवक्त्रपूजा–सद्योजातमित्यस्यसद्योजातऋषिःत्रिष्टुपूछन्दःसद्योजातोदेवताश्वेतवर्णहंसवाहनंपश्चिमवक्त्रंपृथिवीतत्त्वंपश्चिमवक्त्रनमस्कारेविनियोगः–ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमोनमः । भवेभवेनातिभवेभवस्वमांभवोद्भवायनमः ॥ सद्योजातायश्वेतवर्णायहंसवाहनायपश्चिमवक्त्रायपृथिवीतत्त्वायसृष्टिरूपात्मनेब्रह्मणेनमः ह्रीँ इतिप्रणम्यधनुर्बाणमुद्राप्रदर्शनम् । सद्योजातमित्यस्यसद्योजातऋषिः त्रिष्टुप्छन्दः सद्योजातोदेवताश्वेतवर्णहंसवाहनंपश्चिमवक्त्रंपृथिवीतत्त्वंपश्चिमवक्त्रपूजनेविनियोगः–ॐसद्योजातं० सद्योजातायश्वेतवर्णायहंसवाहनायपश्चिमवक्त्रायनमःइत्यनेनगन्धमनःशिलाचन्दनश्वेताक्षतश्वेतपुष्पगुग्गुलधूपघृतदीपपायसनैवेद्यादिभिःपूजनम् । ततःकलापूजनम्–ॐऋद्ध्यैनमः ॐसिद्ध्यैनमः ॐधृत्यैनमः ॐलक्ष्म्यैनमः ॐमेधायैनमः ॐकान्त्यैनमः ॐस्वधायैनमःॐप्रभायैनमः इत्यष्टौकलाः संपूज्यध्यानम्-प्रालेयामलबिन्दु-

---

१ वामस्यमध्यमाग्रंतुतर्जन्यग्रेनियोजयेत् । अनामिकांगानिष्ठांचतस्याङ्गुष्ठेन पीडयेत् । दर्शयेद्दक्षिणस्कन्धेधनुर्मुद्रेयमीरिता । दक्षमुष्टिस्थतर्जन्यादीर्घयाबाणमुद्रिका ॥ २ श्वेताक्षतैःश्वेतपुष्पैःपूजयेद्धंसवाहनम् । सिद्ध्यन्तिसर्वकार्याणि पूजनेननसंशयः ॥ ३ ऋद्धिःसिद्धिर्धृतिर्लक्ष्मीर्मेधाकान्तिःस्वधाप्रभा । सद्योजातकलाह्येताअष्टौचपरिकीर्तिताः ॥

कुन्दधवलंगोक्षीरफेनप्रभंभस्माभ्यंगमनंगदेहदमनज्वालावलीलोचनम् । ब्रह्मेन्द्रादिमरुद्गणैःस्तुतिपरैरभ्यर्चितंयोगिभिर्वन्देहंसकलंकलङ्करहितंस्थाणोर्मुखंपश्चिमम् ॥ शुभ्रंत्रिलोचनंनानाम्नासद्योजातंशिवप्रदम् । शुद्धस्फटिकसंकाशंवंदेऽहंपश्चिमंमुखम्॥ इतिपश्चिमवक्त्रपूजा ॥

अथोत्तरवक्त्रपूजा–वामदेवायेत्यस्यवामदेवऋषिःजगतीछन्दःविष्णुर्देवताकृष्णवर्णंगरुडवाहनंउत्तरवक्त्रंआपस्तत्त्वंउत्तरवक्त्रनमस्कारेविनियोगः—ॐवामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमः । कालायनमः कलविकरणायनमोबलविकरणायनमः ॥ वामदेवाय कृष्णवर्णायगरुडवाहनायोत्तरवक्त्रायापस्तत्त्वायामृतरूपात्मनेविष्णवेनमः ह्रींइतिप्रणम्यपद्ममुद्राप्रदर्शनम् । वामदेवायेत्यस्यवामदेवऋषिःजगतीछन्दः विष्णुर्देवताकृष्णवर्णंगरुडवाहनंउत्तरवक्त्रंआपरतत्त्वं उत्तरवक्त्रपूजनेविनियोगः–ॐवामदेवाय० वामदेवायकृष्णवर्णाय गरुडवाहनायोत्तरवक्त्रायनमः इत्यनेनहरिचन्दनतुलसीशतपत्रपुष्पपंचसौगंधिकधूपघृतपक्कगोधूमान्ननैवेद्यादिभिःपूजनम् । ततःकलाँपूजनम्–ॐरजसेनमः ॐरक्षायैनमः ॐरत्यैनमः ॐपाल्यायैनमः ॐकामायैनमःॐसंजीविन्यैनमःॐप्रियायैनमःॐबुद्ध्यैनमःॐक्रियायैनमःॐधात्र्यैनमः ॐभ्रामर्यैनमःॐमोहिन्यैनमःॐज्वरायैनमः

---

१ करौतुसंहतौकृत्वासंमुखावुन्नताङ्गुली । तलान्तर्मिलिताङ्गुष्ठौकुर्यादेषाब्जमुद्रिका ॥ २ तुलसीशतपत्रैश्चपूजयेद्गरुडासनम् । सर्वदोषविनाशेनप्राप्नोतिश्रियसंपदम् ॥ ३ कंकोलपूगकर्पूरजातीफललवंगकैः । सुगन्धपंचकं प्रोक्तमायुर्वेदप्रकाशकैः ॥ ४ रजोरक्षारतिःपाल्याकामासंजीविनीप्रिया । बुद्धिःक्रियाचधात्रीचभ्रामरीमोहिनीज्वरा । वामदेवकलाह्येतास्त्रयोदशवरानने ॥

इतित्रयोदशकलाःसंपूज्यध्यानम्—गौरंकुंकुमपिङ्गलंद्युतिलकंव्यापांडुगंडस्थलंभ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् । स्निग्धंबिंबफलाधरंप्रहसितं नीलालकालंकृतं वंदेपूर्णशशांकमंडलनिभंवक्त्रंहरस्योत्तरम् ॥ वामदेवंसुवर्णाभंदिव्यास्त्रगणसेवितम् । अजन्मानमुमाकान्तंवंदेहंह्युत्तरंमुखम् ॥ इत्युत्तरवक्त्रपूजा ॥

अथदक्षिणवक्त्रपूजा—अघोरेभ्यइत्यस्यअघोरऋषिःअनुष्टुप्छन्दःरुद्रोदेवतानीलवर्णंकूर्मवाहनंदक्षिणवक्त्रंतेजस्तत्त्वंदक्षिणवक्त्रनमस्कारेविनियोगःॐअघोरेभ्योऽथघोरेभ्योघोरघोरतरेभ्यः । सर्वेभ्यःसर्वशर्वेभ्योनमस्तेअस्तुरुद्ररूपेभ्यः ॥ अघोरायनीलवर्णायकूर्मवाहनायदक्षिणवक्त्रायतेजस्तत्त्वायविश्वरूपात्मनेकालाग्निरुद्रायनमःहूंइतिप्रणम्यज्ञानमुद्राप्रदर्शनम् । अघोरेभ्यइत्यस्यअघोरऋषिः अनुष्टुप्छन्दःरुद्रोदेवतानीलवर्णंकूर्मवाहनं दक्षिणवक्त्रंतेजस्तत्त्वंदक्षिणवक्त्रपूजनेविनियोगः—ॐअघोरेभ्यो०अघोरायनीलवर्णायकूर्मवाहनायदक्षिणवक्त्रायनमःइत्यनेनकृष्णागरुचन्दननीलोत्पलकरवीरपुष्पसितागरुधूपमाषान्ननैवेद्यादिभिःपूजनम् । ततःकलापूजनम्—ॐतमसेनमः ॐमोहायैनमः ॐक्षयायैनमः ॐनिद्रायैनमः ॐव्याधयेनमः ॐमृत्यवेनमः ॐक्षुधायैनमः ॐतृष्णायैनमः इत्यष्टौकलाःसंपूज्यध्यानम्—कालाभ्रभ्रमराञ्जनाचलनिभंव्यावृत्तपिङ्गेक्षणंखंडेन्दुद्वयमिश्रितांशुद-

---

१ तर्जन्यङ्गुष्टकौसक्तावग्रतोह्यदिविन्यसेत् । ज्ञानमुद्राभवेदेषाकथितातत्त्वदर्शिभिः ॥ २ नीलोत्पलैःकरवीरैःपूजयेत्कूर्मसंस्थितम् । सर्वबाधाविनाशाय ज्ञानमोक्षप्रसावकम् ॥ ३ तमोमोहाक्षयानिद्राव्याधिर्मृत्युःक्षुधातृषा । अघोरस्यकलाह्येताअष्टौचपरिकीर्तिताः ॥

शनप्रोद्भिन्नदंष्ट्राङ्कुरम् । सर्पप्रोतकपालशक्तिसकलंव्याकीर्णसच्छेखरं वंदेदक्षिणमीश्वरस्यकुटिलभ्रूभंगरौद्रंमुखम् ॥ नीलाभ्रवर्णमोंकारमघोरंघोरदंष्ट्रकम् । दंष्ट्राकरालमत्युग्रंवन्देऽहंदक्षिणंमुखम् । इतिदक्षिणवक्त्रपूजा ॥

अथपूर्ववक्त्रपूजा–तत्पुरुषायेत्यस्यतत्पुरुषऋषिःगायत्रीछन्दःरुद्रो देवतापीतवर्णअश्ववाहनंपूर्ववक्त्रंवायुस्तत्त्वंपूर्ववक्त्रनमस्कारोविनियोगः ॐतत्पुरुषायविद्महेमहादेवायधीमहि। तन्नोरुद्रःप्रचोदयात् ॥ तत्पुरुषायपीतवर्णायाश्ववाहनायपूर्ववक्त्रायवायुतत्त्वायचैतन्यात्मनेआदित्यायनमःहृँइतिप्रणम्यकवंचमुद्राप्रदर्शनम् । तत्पुरुषायेत्यस्यतत्पुरुषऋषिःगायत्रीछन्दः रुद्रोदेवतापीतवर्णअश्ववाहनंपूर्ववक्त्रंवायुतत्त्वं पूर्ववक्त्रपूजनेविनियोगः ॐतत्पुरु०तत्पुरुषायपीतवर्णायाश्ववाहनाय पूर्ववक्त्रायनमः इत्यनेनहरितालचन्दनदूर्वाङ्कुरार्कपुष्पान्यतरपुष्पकृष्णागरुधूपमोदकनैवेद्यादिभिःपूजनम् । ततःकलापूजनम्-ॐनिवृत्त्यैनमःॐप्रतिष्ठायैनमःॐविद्यायैनमःॐशान्त्यैनमःइतिचतस्रःकलाः संपूज्यध्यानम्–संवर्त्ताग्नितडित्प्रतप्तकनकप्रस्पर्द्धितेजोरुणंगंभीरस्मृतिनिःसृतोग्रदशनप्रोद्भासिताम्राधरम् । बालेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगंवन्देसिद्धसुरासुरेन्द्रनमितंपूर्वंमुखंशूलिनः ॥ बालार्कवर्णमारक्तंपुरुषंचतडित्प्रभम् । दिव्यंपिङ्गजटाधारंवन्देऽहंपूर्वदिङ्मुखम् ॥ इतिपूर्ववक्त्रपूजा ॥

---

१ कवचमुद्रालक्षणम्–करद्वन्द्वाङ्गुलयोर्वर्मणिस्युः ॥ २ दूर्वाङ्कुरैरर्कपुष्पैः पूजयेदश्ववाहनम् । आयुष्यंवर्धतेतत्रविशिष्टफलदायकम् ॥ ३ निवृत्तिश्चप्रतिष्ठाचविद्याशान्तिस्तथैवच । तत्पुरुषकलाह्येताश्चतस्रश्चनसंशयः ॥

अथोर्ध्ववक्त्रपूजा—ईशानइत्यस्यईशानऋषिःअनुष्टुप्छन्दःरुद्रोदेवतागोक्षीरवर्णं वृषभवाहनं ऊर्ध्ववक्त्रंआकाशतत्त्वंऊर्ध्ववक्त्रनमस्कारे विनियोगः ॐ ईशानःसर्वविद्यानामीश्वरःसर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेअस्तुसदाशिवोम् ॥ ईशानायगोक्षीरवर्णायवृषभवाहनायोर्ध्ववक्त्रायाकाशतत्त्वायाव्यक्तायसर्वव्यापकात्मनेनमःहौंइतिप्रणम्यमहामुद्रां[1] (व्यापकमुद्रा) प्रदर्शनम् । ईशानइत्यस्यईशानऋषिः अनुष्टुप्छन्दः रुद्रोदेवतागोक्षीरवर्णंवृषभवाहनं ऊर्ध्ववक्त्रंआकाशतत्त्वंऊर्ध्ववक्त्रपूजनेविनियोगःॐईशानःसर्व०ईशानायगोक्षीरवर्णायवृषभवाहनायोर्ध्ववक्त्रायनमः इत्यनेनभस्मंचन्दनबिल्वंपत्रकनकपुष्पऋतुभवान्यपुष्पहरिचन्दनधूपशर्करादध्योदननैवेद्यादिभिःपूजनम् । ततःकलांपूजनम्—ॐशशिन्यैनमः ॐअंगदायैनमःॐइष्टायैनमःॐमरीच्यैनमः ॐज्वालिन्यैनमः इतिपञ्चकलाः संपूज्यध्यानम्—व्यक्ताव्यक्तगुणोत्तरंसुवदनंषट्त्रिंशतत्त्वाधिकंतस्मादुत्तरतत्त्वमक्षयमितिध्येयंसदायोगिभिः । वन्देतामसवर्जितेनमनसा

---

१ उत्तानौतादृशावेवव्यापकाञ्जलिकंकरौ । तादृशौसंयुतावेवनतानौकरौव्यापकाञ्जलिकंनाममुद्रा ॥ २ अत्रकेचित्भस्मचन्दनस्थानेयक्षकर्दमचन्दनेनपूजनंकार्यमितिपठन्ति । यक्षकर्दमचन्दनम्—कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यच । चन्दनस्यत्रयोभागाःशशिनस्त्वेकएवहि ॥ परंत्वस्माभिस्त्वत्ररुद्रकल्पद्रुमसंमतेनभस्मचन्दनमेवसंगृहीतम् ॥ ३ हंसहंसेतियोब्रूयाद्धंसोनामसदाशिवः । बिल्वैःकनकपुष्पैश्चअन्यैर्ऋतुभवैस्तथा । सौख्यमोक्षप्रदातारंपूजयेद्वृषवाहनम् ॥ ४ शशिनीअंगदाइष्टामरीचिर्ज्वालिनीतथा।ईशानस्यकलाःपञ्चनिरञ्जनपदानुगाः।।

सूक्ष्मातिसूक्ष्मंपरंशान्तं पञ्चममीश्वरस्यवदनं खंव्यापितेजोमयम् ॥ ईशानंसूक्ष्ममव्यक्तंतेजःपुंजपरायणम् । अमृतस्राविचिद्रूपंवन्देहं पञ्चमंमुखम् ॥ इत्यूर्ध्ववक्त्रपूजा ॥

इतिपञ्चवक्त्रपूजांकृत्वादेववामभागेशक्तिपूजनम्—ॐउमायैनमः ॐशङ्करप्रियायैनमः ॐपार्वत्यैनमः ॐगौर्यैनमः ॐकाल्यैनमः ॐकालिंद्यैनमःॐकोटर्यैनमःॐविश्वधारिण्यैनमः ॐह्रींनमःॐह्रींनमः ॐगंगादेव्यैनमः । ततः—ॐगणपतयेनमःॐकार्तिकायनमःॐपुष्पदन्तायनमःॐकपर्दिनेनमः ॐभैरवायनमः ॐशूलपाणयेनमःॐईश्वरायनमःॐदंडपाणयेनमः ॐनंदिनेनमः ॐमहाकालायनमःइतिसंपूज्यततःएकादशरुद्रार्चनम्—ॐअघोरायनमः ॐपशुपतयेनमः ॐशर्वायनमः ॐविरूपाक्षायनमः ॐविश्वरूपिणेनमः ॐत्र्यम्बकायनमः ॐकपर्दिनेनमः ॐभैरवायनमः ॐशूलपाणयेनमः ॐईशानायनमः ॐमहेश्वरायनमःइति ॥

॥ १२ ॥ **अथऋष्यादिस्मरणपूर्वकरुद्राभिषेकः** ॥

ततःशिवस्यमूर्द्धनिसौवर्णेनराजतेनताम्रेणवाकलशेनमधुनाग-व्येनसर्पिषापयसावातदभावेमाहिषेणवाइक्षुरसेननालिकेररसेनाम्ररसेनवागन्धोदकेनवाकेवलोदकेनवावक्ष्यमाणैर्मंत्रैरभिषेकः कर्तव्यः । तत्रादौअभिषेकमंत्राणांऋष्यादिस्मरणम्—गणानान्त्वेत्यस्यप्रजापतिर्ऋषिःयजुश्छन्दःलिङ्गोक्तादेवतागायत्रीत्रिष्टुबितिद्वयोः प्रजापति

१ अस्याश्चपञ्चवक्त्रपूजायादेवप्रतिष्ठायांविहितत्वेनरुद्रजपरुद्रहोमरुद्राभिषेकार्चनेष्वविहितत्वेनचप्रमाणाभावादाचारएवतस्यांप्रमाणम् ॥

र्ऋषिःउष्णिगनुष्टुभौछन्दसीअश्वोदेवतासहस्तोमाइत्यस्ययज्ञः प्राजा
पत्यऋषिःत्रिष्टुप्छन्दःऋषयोदेवताःमाङ्गल्यप्राप्त्यर्थंजपेविनियोगः
यज्जाग्रतइतिषण्णांशिवसंकल्पऋषिः त्रिष्टुप्छन्दः मनोदेवताअभिषेके
विनियोगः सहस्रशीर्षेतिपुरुषसूक्तस्यनारायणपुरुषऋषिः आद्यानां
पञ्चदशानांअनुष्टुप्छन्दः यज्ञेनयज्ञमित्यस्यात्रिष्टुप्छन्दः जगद्बीजं
पुरुषोदेवताअभिषेकेविनियोगः अद्भ्यःसंभृतइतिउत्तरनारायणस्य
नारायणपुरुषऋषिःआद्यानांतिसृणांत्रिष्टुप्छन्दःचतुर्थपंचमयोरनुष्टु-
प्छन्दःअन्त्यस्यात्रिष्टुप्छन्दःआदित्योदेवताअभिषेके विनियोगः
आशुःशिशानइतिद्वादशानांअमतिरथऋषिःत्रिष्टुप्छन्दः इन्द्रोदेवता
अभिषेकेविनियोगःविभ्राडित्यस्यविभ्राट्सौर्यऋषिः जगतीछन्दः
सूर्योदेवताउदुत्यमितितिसृणांप्रस्कण्वऋषिःगायत्रीछन्दःसूर्योदेवतातं
मन्त्रकथेत्यस्यब्रह्मस्वयंभुऋषिः जगतीछन्दःविश्वेदेवादेवताअथंवेन-
इत्यस्यब्रह्मस्वयंभुऋषिःत्रिष्टुप्छन्दः सोमोदेवताचित्रमित्यस्यब्रह्म-
स्वयंभुऋषिःत्रिष्टुप्छन्दःसूर्योदेवताआनइत्यस्यअगस्त्यऋषिःत्रिष्टु
प्छन्दःसूर्योदेवतायदद्येत्यस्यश्रुतकक्षसुतंकक्षावृषीगायत्रीछन्दःसूर्यो
देवतातरणिरित्यस्यप्रस्कण्वऋषिःगायत्रीछन्दःसूर्योदेवतातत्सूर्यस्ये-
तिद्वयोःकुत्सऋषिःत्रिष्टुप्छन्दः सूर्योदेवताषण्महानितिद्वयोर्जमदग्नि-
र्ऋषिःआद्यस्यबृहतीछन्दःद्वितीयस्यसतोबृहतीछन्दः सूर्योदेवताश्राय
न्तइवेत्यस्यनृमेधऋषिःबृहतीछन्दः सूर्योदेवताअद्यादेवाइत्यस्यकुत्स-
ऋषिःत्रिष्टुप्छन्दःसूर्योदेवताआकृष्णेनेत्यस्यहिरण्यस्तूपआङ्गिरस-
ऋषिःत्रिष्टुप्छन्दःसूर्योदेवताअभिषेके विनियोगःॐकारस्यब्रह्माऋ-

षिःदैवीगायत्रीछन्दः अग्निः परमात्मादेवतामहाव्याहृतीनांप्रजापति-
र्देवताअग्निर्गन्धर्वावाऋषयःदैवीगायत्रीदैव्युष्णिक्दैवीगायत्रीछन्दां
सिअग्निवायुसूर्याःक्रमेणदेवताः नमस्तेरुद्रेतिरौद्राध्यायस्यपरमेष्ठीऋ-
षिःदेवावाऋषयःप्रजापतिर्वाऋषिःनमस्तेरुद्रेत्यस्यगायत्रीछन्दःयाते
रुद्रेत्यादीनांतिसृणांअनुष्टुप्छन्दः अद्ध्यवोचदधीत्यादितिसृणां
पंक्तिछन्दःनमोस्तुनीलग्रीवायेत्यादिसप्तानांअनुष्टुप्छन्दः मानोमहा-
न्तमितिद्वयोःकुत्सोपिऋषिः जगतीछन्दः सर्वासामेकोरुद्रोदेवतानमो-
हिरण्यबाहवइत्यादीनिद्रापेइत्यतः प्राक्तनानिसर्वाणियजूंषिनमोहिर-
ण्यबाहवइत्यादीनांश्वपतिभ्यश्चवोनमइत्यन्तानांयजुषांहिरण्यबाहुःसे
नानीर्दिशांपतिरित्यादिमंत्रवर्णावगतनामकाउभयतोनमस्कारावह-
वोरुद्रादेवताः नमोभवायचरुद्रायचेत्यादीनांप्रखिदतेचेत्यन्तानांयजु
षांभवादयोमंत्रलिंगावगताअन्यतरतोनमस्कारावहवोरुद्रादेवताःनम-
इषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमइत्यस्ययजुषउभयतोनमस्कारावहवोरुद्रा
देवताःनमोवः किरिकेभ्यइत्यादीनामग्निवायुसूर्यहृदयभूतव्याहृतीनां
अन्यतरतोनमस्कारावहवोरुद्रादेवताः द्रापेइत्यस्याउपरिष्टाद्बृहतीछ-
न्दःइमारुद्रायेत्यस्याःकुत्सोपिऋषिर्जगतीछन्दः यातइत्यस्यानुष्टुप्छ-
न्दःपरिनइतिद्वयोस्त्रिष्टुप्छन्दः विकिरिद्रसहस्राणीतिद्वयोरनुष्टुप्छ-
न्दःसप्तानामेको रुद्रोदेवताअसङ्ख्यातेत्यादीनांदशानामनुष्टुप्छन्दः
बहवोरुद्रादेवताः नमोस्तुरुद्रेभ्यइत्यादीनांत्रयाणांयजुषांधृतिछन्दःब-
हवोरुद्रादेवताःसकलाध्यायस्यशतशीर्षोरुद्रोवादेवताअभिषेकेविनि-
योगःवयꣳसोमेत्यस्यबन्धुर्ऋषिःगायत्रीछन्दःसोमोदेवताएषतइत्यन-
योःप्रजापतिर्ऋषिःसामपंक्तिर्यजुर्जगतीछन्दसीरुद्रोदेवताअवरुद्रमित्य-

स्यप्रजापतिर्ऋषिःपंक्तिछन्दःरुद्रोदेवताभेषजमसीत्यस्यप्रजापतिर्ऋषिः
ककुप्छन्दः रुद्रोदेवताऽत्र्यम्बकमित्यनयोः क्रमेणवसिष्ठप्रजापतीऋषी
अनुष्टुप्छन्दःऽत्र्यम्बकोरुद्रोदेवताएतत्तइत्यस्यप्रजापतिर्ऋषिःआस्ता-
रपंक्तिछन्दः रुद्रोदेवताऽत्र्यायुषमित्यस्यनारायणऋषिः उष्णिक्छन्दः
आशीर्देवताशिवोनामेत्यस्यप्रजापतिर्ऋषिः प्राजापत्यबृहतीछन्दःक्षु-
रोदेवतानिवर्तयामीत्यस्यप्रजापतिर्ऋषिः प्राजापत्यत्रिष्टुप्छन्दः लिं-
गोक्तादेवताअभिषेकेविनियोगःनतंविदाथविश्वकर्मेत्यनयोर्विश्वकर्मा-
भौवनऋषिःत्रिष्टुप्छन्दःविश्वकर्मादेवताअभिषेकेविनियोगःउग्रश्चेत्यस्य
प्रजापतिःपरमेष्ठीप्राजापत्योवाऋषिः गायत्रीछन्दः मरुतोदेवताअग्निꣳ
हृदयेनेत्यादीनांयजुषांप्रजापतिर्ऋषिःलिंगोक्तादेवताआयासायस्वाहे-
त्यादीनांप्रजापतिर्ऋषिःलिंगोक्तादेवताअभिषेकेविनियोगः वाजश्चमे-
प्रसवश्चमइत्यादीनांचमकमंत्राणांअनड्वाँश्चमेधेनुश्चमेयज्ञेनकल्पन्तामि-
त्यन्तानांवाजायस्वाहेत्यादीनांवेट्स्वाहेत्यन्तानांदेवाऋषयःवाजश्चम-
इत्यादीनांचतुरक्षराणांदैवीबृहतीछन्दः ऊर्क्चमइत्यादीनांऽयक्षराणांदै-
व्यनुष्टुप्प्रयतिश्चमइत्येवं पंचाक्षराणांदैवीपंक्तिः आधिपत्यंचमइत्या-
दीनांषडक्षराणांदैवीत्रिष्टुप्यजुर्गायत्रीवाहारियोजनश्चमइत्यादीनां
सप्ताक्षराणांदैवीजगतीयजुरुष्णिग्वाआयुर्यज्ञेनकल्पतामित्यादीनांअ-
ष्टाक्षराणांयजुरनुष्टुप्प्राजापत्यागायत्रीवाभुवनस्यपतयेस्वाहेत्यादी-
नांनवाक्षराणांयजुर्बृहतीआसुरीजगतीवामुग्धायवैनꣳशिनायेत्यादी-
नांदशाक्षराणांयजुःपंक्तिः आसुरीत्रिष्टुप्वाविनꣳशिनऽआन्त्यायना-
येत्यादीनांएकादशाक्षराणांयजुस्त्रिष्टुप्आसुरीपंक्तिर्वाअङ्गुलयःशक-
रयोदिशश्चमइत्यस्यद्वादशाक्षरस्ययजुर्जगतीसामगायत्रीवाप्राजापत्यौ

ष्णिग्वाआसुरीबृहतीवासर्वेषामग्निर्देवताअभिषेकेविनियोगः । ऋचं वाचमितिशान्त्याध्यायस्यदध्यङ्ङाथर्वणऋषिःसकलाध्यायस्यैवविश्वे देवादेवताःऋचंवाचमितिचतुर्णांयजुषांदैवीजगतीछन्दःऋगादयोलि ङ्गोक्तादेवताःवागोजइत्यस्ययजुर्जगतीछन्दःवागादिलिङ्गोक्तादेवताः यन्मेइत्यस्यपङ्क्तिछन्दः बृहस्पतिर्देवतातिसृणांमहाव्याहृतीनांदध्यङ्ङा-थर्वणऋषिःदैवीगायत्रीदैव्युष्णिक्दैवीगायत्रीछन्दांसिअग्निवायुसूर्याः क्रमेणदेवताःतत्सवितुरितिदध्यङ्ङाथर्वणऋषिः गायत्रीछन्दः सविता देवताकयानइतिऋचस्यदध्यङ्ङाथर्वणऋषिःद्वयोर्गायत्रीछन्दःतृतीया-याःपादनिचृद्गायत्रीछन्दःइन्द्रोदेवताकयात्वमित्यस्यानिरुक्तागायत्री छन्दःइन्द्रोदेवताइन्द्रोविश्वस्येतिद्विपदाविराट्छन्दः इन्द्रोदेवताशन्नो-मित्रःशन्नोवातइतिद्वयोरनुष्टुप्छन्दःमित्रावरुणादयोलिङ्गोक्तादेवताः अहानिशमित्यस्यद्विपदागायत्रीछन्दःअहानिरात्रयश्चदेवताःशन्नइन्द्रा ग्नीइत्यस्यत्रिष्टुप्छन्दःइन्द्राग्नीइन्द्रावरुणौइन्द्रापूषणौइन्द्रासोमौचदेव-ताःशन्नोदेवीरित्यस्यगायत्रीछन्दःआपोदेवताः स्योनापृथिवीत्यस्य दध्यङ्ङाथर्वणऋषिःगायत्रीछन्दः पृथिवीदेवताआपोहिष्ठेतिऋचस्यद-ध्यङ्ङाथर्वणऋषिःगायत्रीछन्दःआपोदेवताः द्यौःशान्तिरित्यस्यशक्व-रीछन्दःद्यौरादयोलिङ्गोक्तादेवताःदृतेदृंहेत्यस्यब्राह्मीअनुष्टुप्छन्दः आशीर्देवतादृतेदृंहेत्युष्णिक्छन्दः आशीर्देवतानमस्तेहरसेइत्यस्यद-ध्यङ्ङाथर्वणऋषिःबृहतीछन्दःअग्निर्देवतानमस्तेअस्तुयतोयतइत्यनयो रनुष्टुप्छन्दःआद्यायाविद्युतस्तनयित्नुर्भगवान्देवताद्वितीयायामहा-वीरोदेवतासुमित्रियाइत्यस्यदध्यङ्ङाथर्वणऋषिःप्राजापत्याजगतीआ-

पोदेवताःतच्चक्षुरित्यस्यपुरउष्णिक्छन्दःब्राह्मीत्रिष्टुप्व्यूहनादत्यष्टि-
र्वाअक्षरातीतंपुरउष्णिग्वासूर्योदेवतासर्वाध्यायस्यशान्तिकरणेविनि-
योगः ॥

हरिं÷ॐगणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वाप्रियपतिꣳ
हवामहेनिधीनान्त्वानिधिपतिꣳहवामहेवसोमम ॥ आहमजानिगर्भ-
धमात्वमजासिगर्भधम् ॥ १११६३ ॥ गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्-
यासह ॥ बृहत्युष्णिहाककुप्सूचीभिः÷शम्म्यन्तुत्वा ॥ २३३३ ॥
द्विपदायाश्चतुष्पदास्त्रिपदायास्श्चषट्पदाः ॥ विच्छन्दायाश्चसच्छ-
न्दाःसूचीभिः÷शम्म्यन्तुत्वा ॥ ३३४३ ॥ सहस्तोमाःसहच्छन्दसऽ-
आवृतं÷सहप्रमाऽऋषयःसप्तदैव्याः ॥ पूर्वेषाम्पन्थामनुदृश्य-
धीराअन्वालेभिरेरथ्योनरश्मीन् ॥ ४४३३ ॥ ॐयज्जाग्रतोदूर-
मुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गमज्योतिषाज्योतिरेकन्तन्मे-
मनः÷शिवसङ्कल्पमस्तु ॥ १११३४ ॥ येनकर्म्माण्यपसोमनीषिणो
यज्ञेकृण्वन्तिविदथेषुधीराः ॥ यदपूर्वंयक्षमन्तःप्रजानान्तन्मेमनः÷
शिवसङ्कल्पमस्तु ॥ २२३४ ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरन्त-
रमृतम्प्रजासु ॥ यस्मान्नऽऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनः÷शिवस-
ङ्कल्पमस्तु ॥ ३३३४॥ येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन-
सर्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनः÷शिवसङ्कल्पमस्तु ॥
॥ ४४३४॥ यस्मिन्नृचःसामयजूꣳषियस्मिन्प्रतिष्ठितारथनाभावि-
वाराः ॥ यस्मिँश्चित्तꣳसर्वमोतम्प्रजानान्तन्मेमनः÷शिवसङ्कल्प-

---

१ कात्यायनसंमतम् ॥ २ सर्वानुक्रमसूत्रभाष्यकारसंमतम् ॥
३ आचारादर्शकारश्रीदत्तोपाध्यायसंमतम् ॥

मस्तु ॥ ५$\frac{५}{३४}$ ॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्वाजिनऽइव ॥ हृत्प्रतिष्ठन्यदजिरञ्जविष्ठन्तन्मेमनः÷शिवसङ्कल्पमस्तु ॥ ६$\frac{६}{३५}$ ॥ इति प्रथमोऽध्यायः ॥

ॐसहस्रशीर्षपुरुषꣳसहस्राक्ष?सहस्रपात् ॥ सभूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १$\frac{१}{३६}$ ॥ पुरुषऽएवेदꣳसर्वंयद्भूतंयच्चभाव्यम् ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २$\frac{२}{३६}$ ॥ एतावानस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ ३$\frac{३}{३६}$ ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः÷ ॥ ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ४$\frac{४}{३६}$ ॥ ततोविराड्जायतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिक्यतपश्चाद्भूमिमथोपुरः? ॥ ५$\frac{५}{३६}$ ॥ तस्माद्यज्ञात्सर्वहुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ ६$\frac{६}{३६}$ ॥ तस्माद्यज्ञात्सर्वहुतऽऋचःसामानिजज्ञिरे ॥ छन्दाꣳसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ ७$\frac{७}{३६}$ ॥ तस्मादश्वाऽअजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः÷ ॥ ८$\frac{८}{३६}$ ॥ तंयज्ञम्बर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः? ॥ तेनदेवाऽअयजन्तसाद्याऽऋषयश्चये ॥ ९$\frac{९}{३६}$ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १०$\frac{१०}{३६}$ ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः? ॥ ऊरूतदस्ययद्वैश्यःपद्भ्याꣳशूद्रोऽअजायत ॥ ११$\frac{११}{३६}$ ॥ चन्द्रमामनसोजातश्चक्षोःसूर्योऽअजायत ॥

---

१ इतिशिवसङ्कल्पसूक्तस्यहृदयरूपाङ्गस्यषण्मंत्रैरभिषेकः ॥ उक्तंच—शिवसङ्कल्पहृदयंसूक्तंस्यात्पौरुषंशिरः । प्राहुर्नारायणीयंचशिखास्याच्चोत्तराभिधम् ॥ आशुःशिशानकवचंनेत्रंविभ्राड्बृहत्स्मृतम् । शतरुद्रियमस्त्रंस्यात्षडंगक्रमईरितः॥ हृच्छिरस्तुशिखावर्मनेत्रंचास्त्रंमहामते । प्राहुर्विधिज्ञारुद्रस्यषडंगानिस्वशास्त्रतः ॥

श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥ १२ १२/३६ ॥ नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत ॥ पद्भ्यां भूमिर्दिशꣳ श्रोत्रात्तथा लोकाँ२ अकल्पयन् ॥ १३ १३/३६ ॥ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ॥ वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ १४ १४/३६ ॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ॥ देवा यद्यज्ञन्तन्वाना अबध्नन्पुरुषम्पशुम् ॥ १५ १५/३६ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ॥ तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ १६/३६ ॥

ॐ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्रे ॥ तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥ १ १७/३६ ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात् ॥ तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय ॥ २ १८/३६ ॥ प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ॥ तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥ ३ १९/३६ ॥ यो देवेभ्य आतपति यो देवानाम्पुरोहितः ॥ पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ ४ २०/३६ ॥ रुचम्ब्राह्मꣳ जनयन्तो देवा अग्रे तदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ ५ २१/३६ ॥ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ॥ २२/३६ ॥ इति द्वितीयोऽध्यायः ॥

ॐ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ॥ सङ्क्रन्दनो निमिषऽएकवीरः शतꣳ सेनाऽअजयत्साकमिन्द्रः ॥ १ २३/३६ ॥ सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ॥ तदि

---

१ इतिपुरुषसूक्तस्यशिरोनामकाङ्गस्यषोडशमंत्रैरभिषेकः ॥ २ इत्युत्तरनारायणसूक्तस्यशिखारूपाङ्गस्यषण्मंत्रैरभिषेकः ॥

न्द्रेणजयतत्त्सहद्धुंष्युधोनरऽइषुहस्तेनवृष्णा ॥ २ ३५ ॥ सऽइषुह-
स्तैᳪसनिषङ्गिभिर्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ सꣳसृष्टजित्सोम-
पाबाहुशर्द्धुग्रधन्वाप्रतिहिताभिरस्ता ॥ ३ ३५ ॥ बृहस्पतेप-
रिदीयारथेनरक्षोहामित्राँ२ऽअपबाधमानᳪ ॥ प्रभञ्जन्सेनाᳪप्रमृ-
णोयुधाजयन्नस्माकमेद्ध्यवितारथानाम् ॥ ४ ३६ ॥ बलविज्ञायस्थ
विरᳪप्रवीरᳪसहस्वान्वाजीसहमानऽउग्र? ॥ अभिवीरोऽअभिस-
त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ५ ३७ ॥ गोत्रभिद्गोवि
दंवज्रबाहुर्जयन्तमज्मंप्रमृणन्तमोजसा ॥ इमꣳसजाताऽअनुवीर-
यध्वमिन्द्रꣳसखायोऽअनुसꣳरभध्वम् ॥ ६ ३८ ॥ अभिगोत्राणिसहसा-
